एतानि मुद्रितसंस्कृतपुस्तकानि ।

१ धातुरत्नाकरः	२	३१ भामिनीविलासकाव्य सटीक	१
२ धातुरूपाणि	१।०	३२ हितोपदेश सटीक	१
३ गङ्गालहरीसमस्यानिधि	८	३३ भाषापरिच्छेदमुक्तावलीदिनकरी	
४ सिद्धान्तकौमुदी मध्यलघुसहिता-	१०	३४ मूकविवाहवाद	१
५ सिद्धान्तबिन्दुसार (वेदान्त)	॥०	३५ दशकुमारचरितगद्यकाव्य सटीक	
६ तुलादानादिपद्धति (बङ्गाक्षरै)	४	३६ परिभाषेन्दुशेखर	१
७ गयाश्राद्धादिपद्धति	१	३७ कविकल्पद्रुम (धातुपाठ)	१
८ शब्दार्थरत्नम्	८।	३८ चक्रदत्त (वैद्यक)	१।
९ वाक्यमञ्जरी (बङ्गाक्षरै)	।०	३९ ऋग्वादिभाष्य सटीक	
१० सटीक छन्दोमञ्जरी बङ्गाक्षरै	।०	४० मैत्रिणीकोष	
११ वेणीसंहारनाटक सटीक	॥०	४१ पञ्चतन्त्रम् सटीक विष्णुशर्मकृत	
१२ मुद्राराक्षसनाटक सटीक	१	४२ विद्वन्मोदतरङ्गिणी (चम्पूकाव्य)	१
१३ रत्नावलीनाटिका सटीक	।०	४३ माधवचम्पू काव्य	१
१४ मालविकाग्निमित्रनाटक सटीक	१	४४ तर्कसंग्रह दीपिकासहित	
१५ धनञ्जयविजयनाटक सटीक	।०	४५ प्रसन्नराघवनाटक जयदेवकृत	
१६ महावीरचरितनाटक सटीक	१।०	४६ विवेकचूडामणि वेदान्त	
१७ महावीरचरितनाटक मूलमात्र	।०	४७ काव्यसंग्रह मूलमात्र	
१८ वैयाकरणभूषणसार	॥०	४८ काव्यसंग्रह सटीक (संपूर्ण)	
१९ लीलावती भास्कराचार्यरचित	।०	४९ सप्तशतीका काव्य सटीक	
२० बीजगणित भास्कराचार्यरचित	०	५० विक्रमोर्वशी नाटक (सटीक)	
२१ शिशुपालवधकाव्य सटीक (माघ	२	५१ वसन्ततिलक भाषानाटक	
२२ किरातार्जुनीयकाव्य सटीक	१।०	५२ गायत्री व्याख्या	
२३ कुमारसम्भवकाव्यपूर्वखण्ड सटीक	।०	५३ साङ्गाटर्यन (भाष्यसहित)	
२४ कुमारसम्भवकाव्य उत्तरखण्डसटीक	५	५४ भोजप्रबन्ध	
२५ अष्टकम्(श्रीगिरीयम्	।०	५५ नलोदय काव्य सटीक	
२६ वाचस्पत्यम् (शब्दाभिधान)	१००	५६ ईश केन कठ प्रश्न मुण्ड माण्डूक्य उपनिषद् (सटीक सभाष्य)	
२७ कादम्बरीविस्तृतव्याख्यासहिता	३	५७ छान्दोग्य उपनिषद् सटीक सभा	
२८ राजप्रशस्ति सटीक	⁄	५८ तैत्तिरीय ऐतरेय श्वेताश्वतर (उपनिषद्) सभाष्य सटीक	
२९ अनुमानचिन्तामणि तथा अनुमानदीधिति न्यायशास्त्र	३।	५९ बृहदारण्यक सटीक सभाष्य	
३० सर्वदर्शनसंग्रह दर्शनशास्त्र	१		

काव्यादर्शः

महाकवि श्रीदण्डाचार्य्य

पण्डितकुलपतिना

वि, ए, उपाधिधारिणा

श्रीजीवानन्दविद्यासागरभट्टाचार्य्येण

विरचितया विदुषा समलङ्कृतः ।

द्वितीयसंस्करणम् ।

कलिकातानगरे

नारायणयन्त्रे मुद्रितः ।

इ' १८८० ।

काव्यादर्शस्य सूचीपत्रम् ।

प्रथमपरिच्छेदः ।

(१-५५ पृष्ठा)

	श्लोकाङ्कः
मङ्गलाचरणम्	१
वाक्प्रशंसा	३
काव्यप्रशंसा	५
काव्यलक्षणम्	१०
काव्यभेदाः	११
महाकाव्यलक्षणम्	१४
गद्यकाव्यभेदाः	२३
मिश्रकाव्यभेदाः	३१
काव्यस्य संस्कृतादिभेदान्तराणि	३२
कथा-वृहत्कथयोर्भेदः	३८
रीतिविवेकः	४०
श्लेषादिगुणाः	४१
श्लेषलक्षणम्	४३
प्रसादलक्षणम्	४५
समतालक्षणम्	४७
माधुर्य्यलक्षणम्	५१
प्रसङ्गतः अनुप्रासस्य निरूपणम्	५५
यमकलक्षणम्	५८
ग्राम्यताया माधुर्य्यप्रतिबन्धकत्वम्	६२
सौकुमार्य्यलक्षणम्	६८
अर्थव्यक्तिलक्षणम्	७३
उदारत्वलक्षणम्	७६
ओजोगुणलक्षणम्	८०
कान्तिलक्षणम्	८५
समाधिलक्षणम्	८३
काव्यस्य कारणानि	१०

द्वितीयपरिच्छेदः ।

(५६-१८४ पृष्ठा)

अलङ्कारसामान्यलक्षणम्	
अर्थालङ्कारविभागाः	
स्वभावोक्तिः	
उपमालक्षणम्	
धर्मोपमा	
वस्तूपमा	
विपर्य्यासोपमा	
अन्योन्योपमा	

	श्लोकाङ्कः		श्लोकाङ्कः
नियमोपमा	१८	मालोपमा	४२
अनियमोपमा	२०	वाक्यार्थोपमा	४३
समुच्चयोपमा	२१	प्रतिवस्तूपमा	४६
अतिशयोपमा	२२	तुल्ययोगोपमा	४८
उत्प्रेक्षितोपमा	२३	हेतूपमा	५०
अद्भुतोपमा	२४	उपमादोषः	५१
मोहोपमा	२५	उपमाबोधकशब्दाः	५७
संशयोपमा	२६	रूपकसामान्यलक्षणम्	६६
निर्णयोपमा	२७	समस्तरूपकम्	६६
श्लेषोपमा	२८	व्यस्तरूपकम्	६७
समानोपमा	२९	समस्तव्यस्तरूपकम्	६८
निन्दोपमा	३०	सकलरूपकम्	७०
प्रशंसोपमा	३१	अवयवरूपकम्	७२
आचिख्यासोपमा	३२	अवयविरूपकम्	७३
विरोधोपमा	३३	एकाङ्गादिरूपकम्	७५
तिषेधोपमा	३४	युक्तरूपकम्	७७
टूपमा	३५	अयुक्तरूपकम्	७८
तत्त्वाख्यानोपमा	३६	विषमरूपकम्	७९
असाधारणोपमा	३७	सविशेषणरूपकम्	८१
अभूतोपमा	३८	विरुद्धरूपकम्	८३
असम्भावितोपमा	३९	हेतुरूपकम्	८५
वह्नपमा	४०	श्लिष्टरूपकम्	८७
विक्रियोपमा	४१	उपमारूपकम्	८८

	श्लोकाङ्कः
व्यतिरेकरूपकम्	८८
आक्षेपरूपकम्	९१
समाधानरूपकम्	९२
रूपकरूपकम्	९३
तत्त्वापह्नवरूपकम्	९४
दीपकम्	९७
मालादीपकम्	१०७
सिद्धार्थदीपकम्	१०९
एकार्थदीपकम्	१११
श्लिष्टार्थरूपकम्	११३
आवृत्तिः तद्भेदाः	११६
आक्षेपः तद्भेदा	१२०
धर्माक्षेपः	१२७
धर्म्याक्षेपः	१२९
कारणाक्षेपः	१३१
कार्याक्षेपः	१३४
अनुज्ञाक्षेपः	१३५
प्रभुत्वाक्षेपः	१३७
अनादराक्षेपः	१३९
आशीर्वचनाक्षेपः	१४१
परुषाक्षेपः	१४३
साचिव्याक्षेपः	१४५
यत्नाक्षेपः	१४९
परवशाक्षेपः	१४९
उपायाक्षेपः	१५१
रोषाक्षेपः	१५३
मूर्च्छाक्षेपः	१५५
अनुक्रोशाक्षेपः	१५७
श्लिष्टाक्षेपः	१५९
अनुशयाक्षेपः	१६१
संशयाक्षेपः	१६३
अर्थान्तराक्षेपः	१६५
हेत्वाक्षेपः	१६७
अर्थान्तरन्यासः	१६९
तद्भेदाः	१७०
व्यतिरेकः	१८०
एकव्यतिरेकः	१८१
उभयव्यतिरेकः	१८३
सक्षेपव्यतिरेकः	१८५
साक्षेपव्यतिरेकः सहेतुव्यतिरेकः	१८६
प्रतीयमानसादृश्य-व्यतिरेकः	१८९
सादृश्यव्यतिरेक-भेदान्तराणि	१९२

	श्लोकाङ्कः
विभावना	१८८
समासोक्तिः	२०५
तद्भेदाः	२०८
अपूर्वसमासोक्तिः	२१२
अतिशयोक्तिः	२१४
अतिशयोक्तिप्रशंसा	२२०
उत्प्रेक्षा	२२१
तद्व्यञ्जकशब्दाः	२३४
हेतुः तद्भेदाः	२३५
सूक्ष्मः	२६०
लेशः	२६५
क्रमः	२७३
प्रेयोरसवदूर्जस्वि-लक्षणानि	२७५
पर्य्यायोक्तम्	२८५
समाहितम्	२८८
उदात्तम्	३००
अपह्नुतिः	३०४
श्लेषः	३१०
तद्भेदाः	३१४
विशेषोक्तिः	३२३
तुल्ययोगिता	३३०

	श्लोकाङ्कः
विरोधः	३३३
अप्रस्तुतप्रशंसा	३४०
व्याजस्तुतिः	३४३
निदर्शनम्	३४८
सहोक्तिः	३५१
परिवृत्तिः	३५१
आशीः	३५७
सङ्कीर्णम्	३५८
तद्भेदौ	३६०
भाविकम्	३६४
तद्भेदाः	३६५

तृतीयः परिच्छेदः ।

(१८५-३८० पृष्ठा)


यमकम् तद्भेदाः	१
गोमूत्रिका	७८
अर्द्धभ्रमः	८०
सर्वतोभद्रम्	८०
स्वरस्थानवर्णनियमाः	८३
प्रहेलिका	८६
तल्लक्षणानि	८७
समागताप्रहेलिका	८८
वञ्चिताप्रहेलिका	८८

	श्लोकाङ्कः
व्युत्क्रान्ता	९९
प्रमुषिता	९९
समानरूपा	१००
परुषा	१००
मन्त्रगाता	१०१
प्रजल्पिता	१०१
नामान्तरिता	१०२
निभृता	१०२
समानशब्दा	१०३
संमूढा	१०३
परिक्षारिका	१०४
एकच्छन्ना	१०४
उभयच्छन्ना	१०५
सङ्कीर्णा	१०५
दोषविभागाः	१२५
अपार्थत्वम्	१२८
व्यर्थत्वम्	१३१
एकार्थत्वम्	१३५
समयत्वम्	१३९
अपक्रमः	१४४
शब्दहीनत्वम्	१४८

	श्लोकाङ्कः
यतिभंगः	१५२
वृत्तभङ्गः	१५६
विसन्धित्वम्	१५८
देशकालकलालोकन्याया-	
गमविरोधाः	१६२
देशविरोधः	१६५।१६६
कालविरोधः	१६७।१६८
कलाविरोधः	१७०
लोकविरोधः	१७२
न्यायविरोधः	१७४।१७५
आगमविरोधः	१७७।१७८
देशविरोधे गुणः	१८०
कालविरोधे गुणः	१८१
कलाविरोधे गुणः	१८२
लोकविरोधे गुणः	१८३
न्यायविरोधे गुणः	१८४
आगमविरोधे गुणः	१८५

ग्रन्थसमाप्तिः ।

काव्यादर्शः ।



प्रथमः परिच्छेदः ।

चतुर्मुखमुखाम्भोजवनहंसवधूर्मम ।
मानसे रमतां नित्यं सर्वशुक्ला सरस्वती ॥ १ ॥

प्रणम्य कमलाकान्तं भक्ताभीष्टफलप्रदम् ।
काव्यादर्शस्य विवृतिं वितनोमि सता मुदे ॥

किंवदन्तीयं यत् महामहोपाध्यायः श्रीमान् दण्डीनाम कविः ग्रन्थमिमं स्वयं विरच्य कमपि राजपुत्रम् अध्यापयामास इति ।

ग्रन्थारम्भे निर्विघ्नेन प्रारिप्सितपरिसमाप्तिकामनया कविग्रन्थाधिष्ठातृतया वाग्देवतायाः स्मरणरूपमङ्गलमाचरन्नाह चतुर्मुखेति । चतुर्मुखस्य ब्रह्मणः मुखान्येव अम्भोजवनानि पद्मवृन्दानि तेषु हंसवधूः हंसीस्वरूपा सर्वतः सर्वावयवेन सर्वप्रकारेण च शुक्ला श्वेतवर्णा परिशुद्धा च सरस्वती वागधिष्ठात्री देवी नित्यं सततं मम मानसे चेतसि तदाख्यसरसि च रमतां विहरतु मानसे सरसि पद्मवनेषु हंसीव या ब्रह्मणो मुखकमलेषु श्रुतिरूपेण सतत विहरति सा सर्वशुद्धा वाग्देवी मम हृदये सततं वसतु इति निष्कर्षः । नित्यमित्यत्र दीर्घमिति पाठे दीर्घं सुचिरमित्यर्थः ॥ १ ॥

पूर्वशास्त्राणि संहृत्य प्रयोगानुपलभ्य च ।
यथासामर्थ्यमस्माभिः क्रियते काव्यलक्षणम् ॥२॥
इह शिष्टानुशिष्टानां शिष्टानामपि सर्वथा ।
वाचामेव प्रसादेन लोकयात्रा प्रवर्त्तते ॥ ३ ॥

सम्प्रति ग्रन्थस्य अभिधेयं निर्दिशन् प्रतिजानीते पूर्वशास्त्राणीति। पूर्वेषां कवीनां भरतादीनां शास्त्राणि काव्यग्रन्थान् सङ्गृह्य सङ्क्षेपेण तेभ्य सारमाकृष्य प्रयोगान् महाकाव्यादिषु प्रयुक्तान् विषयान् उपलभ्य समालोच्य च अस्माभिः यथासामर्थ्यं यथाशक्ति यथाज्ञानमिति यावत् काव्यस्य लक्षणं स्वरूपं लक्ष्यते ज्ञायते अनेनेति व्युत्पत्त्या लक्षणम् इतरव्यवच्छेदक असामान्यधर्म इति यावत् क्रियते निर्णीयते। एतेन काव्यमेव ग्रन्थस्य अभिधेय दर्शितम् ॥ २ ॥

इदानी ग्रन्थस्य प्रयोजनकथनाय वाचा व्यवहारोपयोगित्वम् अन्वयव्यतिरेकाभ्यामाह इहेति इदमिति च। इह संसारे शिष्टे धीरैः। तदुक्त महाभारते—न पाणिपादचपलो न नेत्रचपलो मुनि । न च वाङ्मनश्चपल इति शिष्टस्य लक्षणम् ॥ इति। महेश्वरादिभिः अनुशिष्टाना साधिताना प्रकृतिप्रत्ययादिविभागेन संस्कृताना तथा शिष्टाना जातिदेशादिविभागेन मिश्राना प्रचलिताना प्राकृतदेशीयाना वाचामेव प्रसादेन अनुकम्पया साहाय्येनेति यावत् सर्वथा सर्वैः प्रकारैः लोकानाम् उत्तममध्यमाधमभेदेन त्रिविधाना यात्रा व्यवहार प्रवर्त्तते प्रचलति तत्रोत्तमा संस्कृतयैव वाचा व्यवहरन्ति मध्यमा ततो निकृष्टया साधुभाषया, अधमा नीचभाषया इति। देशजातिभेदेन एवमेव भाषाव्यवहार इति फलितार्थः ॥ ३ ॥

इदमन्धं तमःकृत्स्नं जायेत भुवनत्रयम् ।
यदि शब्दाह्वयं ज्योतिरासंसारं न दीप्यते ॥ ४ ॥
आदिराजयशोबिम्बमादर्शं प्राप्य वाङ्मयम् ।
तेषामसन्निधानेऽपि न स्वयं पश्य नश्यति ॥ ५ ॥

इदमिति । यदि शब्दः आह्वयः अभिधानं यस्य तत् शब्दनामकं वाङ्मयमित्यर्थः ज्योतिः तेजःप्रकाशकस्वरूपधर्मबलेन वाङ्मये तथात्वारोपः । आससारं जगत् अभिव्याप्य न दीप्यते न विराजते तदा इदं कृत्स्नं सर्वं भुवनानां स्वर्गमर्त्यरसातलानां त्रयम् अन्धं तमः गाढान्धकारव्याप्तमिति यावत् जायेत सूर्योदयाभावे इव वागभावे जगत् अन्धकारमयमेव स्यात् वाग्भिरेव सर्वेषां ज्ञानलाभादिति भावः । एतेन अस्य प्रयोजनं वाग्व्यवहाररूपमेव कथितम् । अभिधेयप्रयोजनयोश्च परस्परं ज्ञाप्यज्ञापकत्वादिरूपः सम्बन्धः यथायथमवगन्तव्यः । एषाञ्च ग्रन्थादौ अवश्यवक्तव्यतोक्ता यथा,—ज्ञातार्थं ज्ञातसम्बन्धं श्रोतुं श्रोता प्रवर्त्तते । ग्रन्थादौ तेन वक्तव्यः सम्बन्धः सप्रयोजनः ॥ इति ॥ ४ ॥

इदानीं वाचामुपादेयत्वं दर्शयति, आदिराजेति । आदिराजानां मनिच्क्ष्वाकुप्रभृतीनां यशोबिम्बं कीर्त्तिरूपं प्रतिबिम्बं कर्त्तृ वाङ्मयं कविगणनिवहं काव्यप्रबन्धरूपमादर्शं दर्पणं प्राप्य तेषाम् आदिराजानाम् असन्निधानेऽपि असत्तायामपि न नश्यति न विलीयते इति स्वयं पश्य अवलोकयेति राजपुत्रं प्रत्युक्तिः । दर्पणे बिम्बपतनं सन्निहितानामेव इह तु वाङ्मयरूपे दर्पणे असन्निहितानामपीति उपमेयाधिक्यवर्णनव्यति-

गौर्गौः कामदुघा सम्यक् प्रयुक्ता स्मर्य्यते बुधैः ।
दुष्प्रयुक्ता पुनर्गौत्वं प्रयोक्तुः सैव शंसति ॥ ६ ॥
तदल्पमपि नोपेक्ष्यं काव्ये दुष्टं कथञ्चन ।
स्याद्वपुः सुन्दरमपि श्वित्रेणैकेन दुर्भगम् ॥ ७ ॥

रेकानङ्कार । दृष्टञ्च पुराहृत्तवर्णितानां यश.कीर्त्तन प्रयोजनान्तरमनुमन्तव्यम् ॥ ५ ॥

वाचामुपादेयत्व सामान्येनोक्त्वा वाग्विशेषस्य कविप्रणीतप्राशस्त्य विशेषोपादेयत्वं कौर्त्तयन्नाह गौरिति । सम्यक् प्रयुक्ता गुणालङ्कारादित्वेन दोषराहित्येन सुनिबद्धा गौ. वाक् स्वर्गेपु पशुवाग्वज्रदिङ्नेत्रपृष्णिभूजले । लक्ष्यदृष्ट्यां स्त्रिया पुमि गोरित्यमरः । बुधै. विद्वद्भिः सहृदयैः सुधीभिरित्यर्थः कामदुघा कामदोहिनी यथाभिलषितपूरणी गौः धेनु. स्मर्य्यते मन्यते । एक. शब्दः सुप्रयुक्तः सम्यक् ज्ञातः स्वर्गे लोके च कामधुक् भवति इति श्रुतेः । अपरञ्च, धर्मार्थकाममोक्षेषु वैचक्षण्यं कलासु च । करोति कीर्त्तिं प्रीतिञ्च साधुकाव्यनिषेवणम् ॥ इति । पुनः किन्तु सा एव गौः दुष्प्रयुक्ता सदोषत्वेन गुणालङ्कारादिराहित्येन च प्रयुक्ता निबद्धा सती प्रयोक्तु प्रयोगं कुर्वत' कवेरिति यावत् गोत्वं वृषत्वमज्ञत्वमिति भाव' गमति सूचयति ॥ ६ ॥

तत् तस्मात् प्रयोजकस्य गोत्वख्यापनात् काव्ये अल्पमपि दुष्ट दोष भावे क्तप्रत्यय.। कथञ्चन केनापि प्रकारेण न उपेक्ष्य न क्षन्तव्यं सर्वथा दोषः परित्याज्य इत्यर्थ.। ननु गुणालङ्कारादिमद्भावे सामान्यदोषेण का क्षतिरिति चेत् तत्राह स्यादिति । वपु' शरीर सुन्दरमपि स्वभावतः गुणादिवत्तया वा

गुणदोषान् अशास्त्रज्ञः कथं विभजते जनः ।
किमन्धस्याधिकारोऽस्ति रूपभेदोपलब्धिषु ॥ ८ ॥
अतः प्रजानां व्युत्पत्तिमभिसन्धाय सूरयः ।
वाचां विचित्रमार्गाणां निबबन्धुः क्रियाविधिम् ॥ ९ ॥

क्षुद्दर्शनमपि एकेन एकाङ्गवर्त्तिना क्षुद्रेणापि श्वित्रेण ध्वस्त-रोगेण दुर्भग दूषित स्यात् अत्र दृष्टान्तालङ्कार । तदुक्तं साहित्यदर्पणे. दृष्टान्तस्तु सधर्मस्य वस्तुन प्रतिबिम्बनम् इति ॥ ७ ॥

अशास्त्रज्ञः अविद्वान् जनः गुणदोषान् काव्यस्य उपादेयत्वव्यञ्जका धर्मा गुणा' तान् हेयत्वव्यञ्जका धर्मा दोषा' तान्च कथं विभजते विशेषेण बुध्यते नैवेत्यर्थ ओज प्रसादादि-गुणाना श्रुतिकट्वादिदोषाणाञ्च काव्यपाठश्रवणमात्रेण सामान्यतः परिज्ञानेऽपि शास्त्राविज्ञाने विशेषज्ञानामभवादिति भाव. । तथाहि रूपाणा सौन्दर्य्यादीनां भेदोपलब्धिषु विशेषज्ञानेषु अन्धस्य अधिकार. शक्ति किम् अस्ति नैवेत्यर्थ । अत्रापि दृष्टान्तालङ्कार. ॥ ८ ॥

अतः कारणात् गुणदोषाणा विभागादेः शास्त्रगम्यत्वात् हेतो. सूरय. पूर्वपण्डिताः भरतादयः प्रजाना लोकाना व्युत्पत्तिं वाग्वैचित्र्यज्ञानम् अभिसन्धाय अभिप्रेत्य उद्दिश्य इत्यर्थ. विचित्रमार्गाणा विचित्रा विविधा मार्गा पन्थान रीतय. गौड़ीप्रभृतय: यासां तथाभूताना वाचां काव्यप्रबन्धानाम् इत्यर्थ: क्रियाविधिं रचनाविधान निबबन्धु चक्रु इत्यर्थ: काव्यग्रन्थान् रचयामासु. इति यावत् । ९ ॥

तैः शरीरञ्च काव्यानामलङ्काराश्च दर्शिताः ।
शरीरं तावदिष्टार्थव्यवच्छिन्ना पदावली ॥ १० ॥
गद्यं पद्यञ्च मिश्रञ्च तत् त्रिधैव व्यवस्थितम् ।
पद्यं चतुष्पदी तच्च वृत्तं जातिरिति द्विधा ॥११॥
छन्दोविचित्यां सकलस्तत्प्रपञ्चो निदर्शितः ।
सा विद्या नौस्तितीर्षूणां गम्भीरं काव्यसागरम्॥१२॥

इदानीं प्राचीनमवादनिर्देशपुरःसरं काव्यशरीरं निरूपयति तैरिति । तै. पूर्वपण्डितैः काव्यानां शरीरम् अलङ्काराश्च अलङ्क्रियते एभिरिति व्युत्पत्त्या अलङ्काराः काव्यशरीरशोभका गुणालङ्काराश्च दर्शिताः । काव्यानामिति बहुत्व प्रकारभेदविवक्षयोक्तमवगन्तव्यम् । किं तत्शरीरमित्याकाङ्क्षाया व्यमतमुद्घाटयति शरीरमिति तावच्छब्दो वाक्यालङ्कारार्थ । इष्टा' वृत्त्या रसाद्यनुगमेन मनोहरा इत्यर्थः ये वाच्यलक्ष्यव्यङ्ग्यभेदेन विविधा अर्थाः, तैः व्यवच्छिन्ना विभूषिता पदावली पदसमष्टिः काव्यस्य शरीरमिति वर्त्तुलार्थः ॥ १० ॥

इदानीं काव्यभेदान् दर्शयति गद्यमिति । तत् काव्य त्रिधैव त्रिप्रकारेणैव व्यवस्थित, सिद्धान्तित प्राचीनैरिति शेष । गद्य छन्दोरहित पद्य छन्दोबद्ध मिश्र गद्यपद्योभयात्मकम् इत्यर्थः । तत्र पद्य चतुश्चरणनिबद्ध तदपि वृत्तं जातिरिति द्विविधम् अक्षरसङ्ख्यया निबद्ध वृत्त मात्रया निबद्धा जातिरिति ज्ञेयम् ॥ ११ ॥

छन्दांसि विचीयन्ते विज्ञायन्ते अनयेति छन्दोविचित्या पिङ्गलादिकृतच्छन्दोग्रन्थे तेषा वृत्तजातिप्रभृतीना प्रपञ्च.

मुक्तकं कुलकं कोषः सङ्घात इति तादृशः ।
सर्गवन्ध्वाङ्गरूपत्वादनुक्तः पद्यविस्तरः ॥ १३ ॥
सर्गवन्धो महाकाव्यमुच्यते तस्य लक्षणम् ।
आशीर्नमस्क्रिया वस्तुनिर्देशो वापि तन्मुखम्॥१४॥

विस्तारः निदर्शितः निरूपितः सा विद्या छन्दोज्ञानमित्यर्थं गम्भीरम् अगाध दुर्गममित्यर्थः काव्यसागर काव्यरूपमर्णव तितीर्षूणां तरितुमिच्छूनां नौः तरणिस्वरूपा इत्यर्थः काव्यानां प्रायेण छन्दोवद्धतया तत्पाठार्थिभिः छन्दोज्ञानं अवश्यमेव यतितव्यमिति भावः ॥ १२ ॥

इदानीं महाकाव्यं निरूपयिष्यन् तदवान्तरभेदकथनस्य तदन्तःपातित्वादनुपयोगित्व दर्शयति, मुक्तकमिति । अत्र इति-पदम् एवमर्थकम् । मुक्तकं श्लोकान्तरनिरपेक्षमेकमेव पद्यम् । तदुक्तम् अग्निपुराणे, मुक्तक श्लोक एवैकश्चमत्कारक्षम. सताम् इति । कुलक पञ्चश्लोकात्मक पद्यम् । तदुक्त, द्वाभ्यान्तु युग्मक ज्ञेय त्रिभिः श्लोकैः विशेषकम्। चतुर्भिस्तु कलापं स्यात् पञ्चभिः कुलकं मतम् ॥ इति । कोषः अन्योन्यनिरपेक्षः पद्यसमूहः । उक्तञ्च, कोष. श्लोकसमूहस्तु स्यादन्योन्यानवेक्षक इति । सङ्घातः प्रत्येकपरिसमाप्तार्थकपद्यैः कथासमाप्तिः । तदुक्त. यत्र कविरेकमर्थं हृत्तेनैकेन वर्णयति काव्ये। सङ्घातः स निगदितो वृन्दावनमेघदूतादिरिति एव तादृशः तथाविधः युग्मकादिश्च पद्यविस्तरः पद्यानां विस्तारः सर्गवन्धस्य महा-काव्यस्य अङ्गरूपत्वात् अवयवस्वरूपत्वात् अनुक्तः न प्रदर्शित इत्यर्थः ग्रन्थविस्तारभिया इति भावः ॥ १३ ॥

सम्प्रति महाकाव्य निरूपयति सर्गवन्ध इत्यानिना। सर्गेण

इतिहासकथोद्भूतमितरद्वा सदाश्रयम् ।
चतुर्वर्गफलोपेतं चतुरोदात्तनायकम् ॥ १५ ॥
नगरार्णवशैलर्तु चन्द्रार्कोदयवर्णनैः ।
उद्यानसलिलक्रीडामधुपानरतोत्सवैः ॥ १६ ॥

तस्यो यस्य स श्लोकमङ्गात' महाकाव्य तस्य महाकाव्यस्य लक्षणं स्वरूपम् उच्यते आशी नमस्क्रिया नमस्कार स्मापकमेवोधकवचन वापि अथवा वस्तुन' प्रकृतस्य तदगस्य वा निर्देश' कथन तस्य महाकाव्यस्य मुखम् आदि आशी प्रभृतीनामन्यतम प्रथम वर्णनीयमिति निष्कर्ष । तत्र कौशक-लाभादाशी, रघुवशादौ नमस्कार शिशुपालवधादौ वस्तु-निर्देश इति ॥ १४ ॥

इतिहासेति। इतिहासाना रामायणभारतादीना कथया उद्भूत निबद्ध भवेत् महाकाव्यमिति शेष सर्वत्र वा अथवा मन् सत्यभूत' वृत्तान्त' आश्रयो यस्य ताट्टगम् इतरत् रामा-यणमहाभारताद्व्यतिरिक्तमपि एतेन असत्यवृत्त महाकाव्ये न वर्णनीयमिति प्रदर्शितम्। चतुर्णा धर्मार्थकाममोक्षाणा वर्ग चतुर्वर्ग स एव फल तेन उपेत युक्तम्। चतुर. कार्य्य-कुशल उदात्त महान् नायक. प्रधानपुरुष यस्मिन् तथा-भूतम्। नायकलक्षणमुक्त दर्पणे यथा त्यागी कृती कुलीन मुखीको रूपयौवनोत्साही। दक्षोऽनुरक्तलोकस्तेजोवैदग्ध्य-शीलवान् नेता इति ॥ १५ ॥

केवल नायकवर्णनेन कवीना न चरितार्थता इतिहासादि एव तज्ज्ञानस्य सिद्धत्वात् अत नायकवर्णनमाश्रित्य तदानु-षङ्गिकनगरादिकमपि वर्णनीय तथात्वे काव्यशोभाजननात्

विप्रलम्भै र्विवाहैश्च कुमारोदयवर्णनैः ।
मन्त्रदूतप्रयाणाजिनायकाभ्युदयैरपि ॥ १७ ॥
अलङ्कृतमसंक्षिप्तं रसभावनिरन्तरम् ।
सर्गैरनतिविस्तीर्णैः श्रव्यवृत्तैः सुसन्धिभिः ॥ १८ ॥

श्रोतृणामुन्मुखीकरणं स्यादित्याशयेनाह नगरेत्यादि । नगर दुहृसन्मुहृजनाकीर्णः प्रदेशः अर्णवः समुद्र शैल पर्वत. चन्द्रार्कोदयः चन्द्रसूर्य्ययोरुदयः उपलक्षणमेतत् अस्तमनमपि, एतेषां वर्णनै उद्यानसलिलयोः क्रीडा मधुपान रतोत्सव. सम्भोगशृङ्गार तै विप्रलम्भैः सम्भोगशृङ्गारात् पूर्ववर्त्तिभि पूर्वरागप्रभृतिभिः चतुर्विधभावै विवाहैः परिणयव्यापारै कुमारोदयस्य पुत्रोत्पत्तेर्वर्णनै तथा मन्त्रै परामर्शः दूतप्रयाणम् आजि युद्धं नायकस्य अभ्युदय. जयलाभ तै अलङ्कृत शोभितं नगरादयो महाकाव्ये वर्णनीया इत्यर्थः । उक्तञ्च । मन्त्रादूर्येन्दुरजनीप्रदोषध्वान्तवासरा । प्रातर्मध्याह्नमृगया शैलर्तु वनसागरा । सम्भोगविप्रलम्भौ च मुनिस्वर्गपुराध्वरा. । रण-प्रयाणोपयममन्त्रपुत्रोदयादय. । वर्णनीया यथायोग साङ्गो-पाङ्गा अमी इह ॥ १६ । १७ ॥

असंक्षिप्तं सङ्क्षेपेण न वर्णनीयं संविस्तरमित्यर्थः तथा सति सहृदयहृदयङ्गमं भवतीति भाव. । रसै शृङ्गारादिभि भावै प्राधान्येनाभिव्यक्तै व्यभिचारिभि उद्बुद्धमात्रै स्थायिभि रत्यादिभि तथा देवादिविषयकै अनुरागैश्च निरन्तर संकुल पूर्णम् इति यावत् । अनतिविस्तीर्णैः शास्त्रनियमिताष्टादिभि तदुक्तमौशनसंहितायाम् । अष्टसर्गान्न तु न्यूनं त्रिंशत्सर्गाच्च नाधिकम् । महाकाव्यं प्रयोक्तव्यं महापुरुषकीर्त्तियुगिति ।

सर्वत्र भिन्नवृत्तान्तैरुपेतं लोकरञ्जकम् ।
काव्य कल्पान्तरस्थायि जायेत सदलङ्कृति ॥१९॥
न्यूनमप्यत्र यैः कैश्चिदङ्गैः काव्यं न दुष्यति ।
यद्युपात्तेषु सम्पत्तिरााधयति तद्विदः ॥ २० ॥

एतच्च प्रायिकम् आधिक्यस्यापि तत्रैव कीर्त्तनात् यथा नात्यन्तविस्तरः सर्गस्त्रिगतो वा न चोनता । त्रिगत्या नाधिक कार्य्यमेतत् पद्यस्य लक्षणमिति । अत्यवृत्तैः दोषपरिहारेण गुणालङ्कारसंयोगेन च श्रुतिसुखावहपद्यैरित्यर्थः । सुसन्धिभि परस्परमापेक्षैरित्यर्थ. यच्च कैश्चित् "सन्धयो नाटकलक्षणोक्त मुखप्रतिमुखगर्भविमर्शनिर्वहणाख्याः पञ्च" इति व्याख्यात तदभ्रान्तं महाकाव्यलक्षणे नाटकीयलक्षणयोगस्य असम्भवा इति ॥ १८ ॥

सर्वत्रेति । सर्वत्र भिन्नाः वृत्तान्ता येषु तै. सर्वेषु एव सर्गे वर्णनीयविषयाणां प्रभेदादिति भावः । अथवा भिन्न पृथक् छन्दसा रचित वृत्तं पद्यम् अन्ते येषां तैः प्रत्येक सर्गान्त प्रायशस्तथा दर्शनात् एकवृत्तमयैः पद्यै. अवसानेऽन्यवृत्तकैरि वचनाच्च यद्वा भिन्नानि पृथक्छन्दोभिर्वद्धानि तैः अन्ताः रम्य तादृशैः । तदुक्तं, नानावृत्तमयः क्वापि सर्गः कश्चन दृश्य इति । उपेत युक्तम् । सदलङ्कृति सत्यः विद्यमानाः अथव शोभनाः अलङ्कृतयः अनुप्रासोपमादयः यस्मिन् तादृशं काव लोकाना रञ्जक सद्धृदयमनोहर सत् कल्पान्तरस्थायि चिर स्थायि चिरकीर्त्तिकरमिति भावः जायेत भवेत् ॥ १९ ॥

इत्थ महाकाव्यलक्षणमुक्त्वा खण्डकाव्यमपि निरूपयति न्यूनमिति । अत्र महाकाव्ये उक्तेष्विति शेषः यैः कैश्चित् अङ्गै

गुणतः प्रागुपन्यस्य नायकं तेन विद्विषाम्।
निराकरणमित्येष मार्गः प्रकृतिसुन्दरः॥ २१॥
वंशवीर्य्यश्रुतादीनि वर्णयित्वा रिपोरपि।
तज्जयान्नायकोत्कर्षवर्णनञ्च धिनोति नः॥ २२॥
अपादः पदसन्तानो गद्यमाख्यायिका कथा।
इति तस्य प्रभेदौ द्वौ तयोराख्यायिका किल॥२३॥

न्यूनं हीनमपि काव्यं न दुष्यति यदि उपात्तेषु वर्णितेषु विषयेषु सम्यक्त्वं रचनामाधुर्य्यं तद्विदः काव्याभिज्ञान् आराधयति रसादिसङ्गावेन प्रीणाति। तदुक्तं, नावर्णनं नगर्य्यादेर्दोषाय विदुषां मतं। यदि शैलूषं राज्ञादेर्वर्णनेनैव तुष्यति॥ इति यद्युपात्तार्थसम्पत्तिरिति पाठे स एवार्थः॥ २०॥

सम्प्रति काव्ये नायकप्रतिनायकयोर्वर्णनप्रकारमाह, गुणत इति वंशेति द्वाभ्याम्। प्राक् प्रथमं नायकं गुणतः उपन्यस्य गुणवत्त्वेन कीर्त्तयित्वा तेन नायकेन विद्विषां शत्रूणां प्रतिनायकानामित्यर्थः निराकरणं पराजयः, इत्येषः मार्गः वर्णनरीतिः प्रकृतिसुन्दरः स्वभावरम्यः यथा रामायणे, रामरावणयोर्गुणदोषान् वर्णयित्वा रावणवधवर्णनम्॥ २१॥

रिपोः शत्रोरपि वंशः कौलीन्यं वीर्य्यं पराक्रमः श्रुतं शास्त्रज्ञानम् आदिना दयादाक्षिण्यादि यथायथमवगन्तव्यम्। एतानि वर्णयित्वा कीर्त्तयित्वा तज्जयात् तस्य रिपोः जयात् नायकस्य उत्कर्षवर्णनं नः अस्मान् धिनोति तोषयति। यथा किरातेदुर्योधनस्य प्रजारञ्जनम्॥ २२॥

पद्यं निरूपयन्नाह अपाद इति। अपादः पादः छन्दोवद्धः

नायकेनैव वाच्यान्या नायकेनेतरेण वा ।
स्वगुणाविष्क्रियादोषो नात्र भूतार्थशंसिनः ॥२४॥
अपि त्वनियमो दृष्टस्तत्राप्यन्यैरुदीरणात् ।
अन्यो वक्ता स्वयं वेति कीदृग्वा भेदलक्षणम् ॥२५॥

श्लोकचतुर्थांशः तद्रहित पदसन्तानः पदसमूहः गद्यं तस्य गद्यस्य द्वौ प्रभेदौ आख्यायिका कथा च। तदुक्तं, कथाऽपि सरस वस्तु गद्यैरेव विनिर्मितम्। क्वचिदत्र भवेदार्या क्वचिद्वक्त्रापवक्त्रके। आदौ पद्यैर्नमस्कारः खलादेर्वृत्तकीर्त्तनम् ॥ इति। यथा कादम्बर्य्यादिः। आख्यायिका कथावत् स्यात् कवेर्वंशादिकीर्त्तनम्। अस्यामन्यकवीनाञ्च वृत्तं गद्यं क्वचित् क्वचित् ॥ इति। तयोर्मध्ये आख्यायिका नायकेनैव वाच्या नायक एव अस्या वक्ता इत्यर्थः एवकाराटन्यव्यवच्छेदः। उक्तञ्च, वृत्तमाख्यायते यस्यां नायकेन स्वचेष्टितम् इति। अन्या कथा नायकेन तद्भिन्नेन वा वाच्या यथा कादम्बर्यां चन्द्रापीडस्य नायकस्य महाश्वेतया सलापः। ननु नायकस्य वक्तृत्वे तस्य स्वगुणाविष्करण दोषायेति शङ्का वारयन्नाह स्वगुणेति भूतार्थशंसिन यथार्थवादिनः नायकस्य अत्र वक्तृत्वे स्वगुणाविष्क्रिया निजगुणख्यापनं दोषः न भवतीति शेषः। असत्यकथनस्यैव दोषत्वात् इति भावः ॥ २३ ॥ २४ ॥

पूर्वोक्त प्राचीनमत दूषयन्नाह, अपीति। अपितु किन्तु तत्रापि आख्यायिकायामपि अन्यैः नायकभिन्नैः उदीरणात् कथनात् नायकादन्येषामपि वक्तृत्वादिति यावत् अनियमः पूर्वमतेन विरोधः दृष्टः। कथायाञ्च अन्यः नायकभिन्नः स्वयं नायको वा वक्ता इति भेदलक्षणम् आख्यायिकाया भेदकरण

वक्त्रञ्चापरवक्त्रञ्च सोच्छ्वासत्वञ्च भेदकम्।
चिह्नमाख्यायिकायास्चेत् प्रसङ्गेन कथास्वपि॥२६॥
आर्य्यादिवत् प्रवेशः किं न वक्त्रापरवक्त्रयोः।
भेदश्च दृष्टो लम्भादिरुच्छ्वासो वास्तु किं ततः॥२७॥

वा कीदृक् अकिञ्चित्करमिति भावः। आख्यायिकाया वक्ता नायकः अस्याश्च यदा स एव वक्ता तदानयोः अभेदत्वस्य दुर्वारत्वादित्यनुसन्धेयम्॥ २५॥

अपरञ्च भेदकरण दूषयति वक्त्रमिति। वक्त्रम् अपरवक्त्रञ्च छन्दसी, तदुक्तं वक्त्रं नाद्यान्नसौ स्यातामन्त्येर्योऽनुष्टुभि स्यातमिति अयुजि ननरला गुरुः समे तदपरवक्त्रमिदं नजौ जरौ इति। वैतालीयं पुष्पिताग्राञ्चेच्छन्त्यपरवक्त्रकमिति च। उच्छ्वासः कथांशव्यवच्छेदः आश्वासापरपर्य्यायः तदुक्तं कथांशाना व्यवच्छेद आश्वास इति कथ्यते। तत्साहित्यञ्च भेदकं कथाया इति शेषः। एतत् त्रयम् आख्यायिकायाः चिह्नं लक्षणं चेत् कथासु अपि प्रसङ्गेन प्रस्तावक्रमेण आर्य्यादिवत् वक्त्रापरवक्त्रयोः छन्दसोः प्रवेशः किं न भवेत् इति शेषः। अपितु भवेदेव। उक्तञ्च कथालक्षणाधिकारे आर्य्यावक्त्रापवक्त्राणां छन्दसा येन केनचिदिति। तस्मादुक्तभेदकरणं भ्रमविजृम्भितमेवेति भावः। लम्भः कथापरिच्छेदस्य संज्ञाभेदः आदिपदेन उल्लासादीनां ग्रहणं लम्भादि उच्छ्वासो वा भेदश्च दृष्टः कुत्रचित् कथायां लम्भपदेन परिच्छेदः कृतः आख्यायिकायामुच्छ्वासपदेन वा उल्लासपदेन कृत इत्यनयोर्भेदः वा अस्तु ततः किं संज्ञामात्रभेदो न किञ्चित्कर इत्यर्थः स्वरूपवैलक्षण्यस्यैव भेदकत्वेन कीर्त्तनात्॥ २६॥ २७॥

तत् कथाख्यायिकेत्येका जातिः संज्ञाद्वयाङ्किता।
अत्रैवान्तर्भविष्यन्ति शेषाश्चाख्यानजातयः ॥ २८ ॥
कन्याहरणसंग्रामविप्रलम्भोदयादयः।
सर्गबन्धसमा एव नैते वैशेषिका गुणाः ॥ २९ ॥

इदानीं स्वमतमाविष्करोति तदिति। तस्मात् कथा आख्यायिका च इति सज्ञाद्वयेन नामभ्याम् अङ्किता न तु स्वरूपत इति भाव। एका अभिन्ना जातिः उभयोरपि गद्यमयत्वात् इति भाव। अत्रैव कथाख्यायिकयोः इत्यर्थः शेषा अवशिष्टा आख्यानजातयः खण्डकथादयश्च अन्तर्भविष्यन्ति एतयो प्रकारभेदा इति भाव। तदुक्तम् आग्नेये, आख्यायिका कथा खण्डकथा परिकथा तथा। कथालिकेति मन्यन्ते गद्यकाव्यञ्च पञ्चधा ॥ इति ॥ २८ ॥

कथाख्यायिकयोर्भेदान्तरमपि दूषयति कन्येति। कन्याया हरणं युद्धादिना बलात् ग्रहणं राक्षसोद्वाह इत्यर्थः। तदुक्तं, हत्वा छित्त्वा च भित्त्वा च क्रोशन्तीं रुदतीं गृहात्। प्रसह्य कन्याहरणं राक्षसो विधिरुच्यते ॥ इति। सग्रामो युद्धं विप्रलम्भः सभोगशृङ्गारस्य पूर्वभावः स च पूर्वरागमानप्रवासकरुणात्मकश्चतुर्विध इति दर्पणकारः। उदयः सूर्यचन्द्रयोः, अभ्युन्नतिर्वा नायकस्य, आदिना उद्यानपुरनगरादयो गृह्यन्ते। एते गुणाः आख्यायिकाया इति शेषः यथा आख्यायिकासुपक्रम्य कन्याहरणसग्रामविप्रलम्भोदयान्विते इति सर्गबन्धसमाः महाकाव्यसामान्या एव कथायां किमु वक्तव्यमिति भावः अतः एते वैशेषिका भेदकाः धर्मा न। उक्तञ्च अयमेव हि भेदो भेदहेतुर्वा यदिरुद्धधर्माध्यास इति ॥ २९ ॥

कविभावकृतं चिह्नमन्यत्रापि न दुष्यति।
सुखमिष्टार्थसंसिद्धेः किं हि न स्यात् कृतात्मनाम्॥३०
मिश्राणि नाटकादीनि तेषामन्यत्र विस्तरः।
गद्यपद्यमयी काचिच्चम्पूरित्यभिधीयते॥ ३१॥

ननु कथायां कवेर्भावविशेषो लक्ष्यते आख्यायिकायान्तु न तथेत्याशङ्क्य तदपि निरस्यति कवीति। कविभावकृत कवेः भावकृतम् अभिप्रायरचितं चिह्नं लक्षणम् अन्यत्रापि कथायाम् इति शेषः न दुष्यति यथा शिशुपालवधे सर्गशेषश्लोकेषु श्री-शब्दः किराते च लक्ष्मीशब्दः प्रयुक्तः। एवम् आख्यायिकायां प्रयुक्तं तत् न दूष्यं भवति तथाहि इष्टार्थसंसिद्धेः अभिप्रेतार्थ-साधनाय कृतात्मनां सुधियां किं हि सुखं प्रारम्भः न स्यात् अपितु सर्वमेव तेषाम् इच्छाधीनत्वात् निरङ्कुशाः कवय इति भावः॥ ३०॥

सम्प्रति मिश्रकाव्यमाह मिश्राणीति। नाटकादीनि दृश्य-काव्यानि मिश्राणि गद्यपद्योभयमिश्रितानि आदिपदेन प्रक-रणादीनां परिग्रहः। उक्तञ्च नाटकमथ प्रकरणं भाणव्यायोग-समवकारडिमाः। ईहामृगाङ्कवीथ्यः प्रहसनमिति रूपकाणि दश। तथा। नाटिका त्रोटकं गोष्ठी सट्टकं नाट्यरासक प्रस्थानोल्लाप्यकाव्यानि प्रेङ्खनं रासकं तथा। संलापकं श्री-गदितं शिल्पकञ्च विलासिका। दुर्मल्लिका प्रकरणी हल्लीशो भाणिकेत्यपि। अष्टादश प्राहुरुपरूपकाणि मनीषिणः॥ इति। तेषां नाटकादीनाम् अन्यत्र भरतादिग्रन्थे विस्तरः बाहुल्येन प्रकाशः तद्विजिज्ञासुभिस्तत्रैव यतितव्यं ग्रन्थबाहुल्यभिया न ममात्र प्रयास इति भाव.। न केवलं दृश्यकाव्यस्य मिश्रत्वं

तदेतद्वाङ्मयं भूयः संस्कृतं प्राकृतं तथा ।
अपभ्रंशश्च मिश्रञ्चेत्याहुरार्य्याश्चतुर्विधम् ॥ ३२ ॥
संस्कृतं नाम दैवी वागन्वाख्याता महर्षिभिः ।
तद्भवस्तत्समो देशीत्यनेकः प्राकृतक्रमः ॥ ३३ ॥

अत्रकाव्यस्यापि कदाचित् मिश्रत्वमस्तीत्याह गद्येति । गद्यपद्यमयी काचित् वाणी इति शेषः चम्पूरिति अभिधीयते आख्यायिकादौ गद्यस्यैवाधिक्यं पद्यमल्पमेव इह तु उभयोरेव प्राधान्यमित्यनयोर्भेदः । काचित् इत्यनेन विरुदाख्यकाव्यव्यवच्छेदः तस्य राजस्तुतिविषयत्वेन विभिन्नविषयत्वात् तदुक्तं गद्यपद्यमयी राजस्तुतिर्विरुदमुच्यते इति ॥ ३१ ॥

तत् तस्मात् एतत् वाङ्मयं वाङ्मयात्मकं काव्यशास्त्रं संस्कृत देवभाषया रचितं प्राकृत तदाख्यभाषया रचितम् अपभ्रंश. वक्ष्यमाणोक्तभाषाविशेषनिबद्धं तथा मिश्रञ्च नानाभाषामयमित्यर्थः इति एवरूपेण आर्य्याः विद्वांस. चतुर्विधम् आहुः वर्णयन्ति । उक्तञ्च भोजेन, संस्कृतेनैव कोऽप्यर्थः प्राकृतेनैव चापरः । शक्यो वाचयितुं कश्चित् अपभ्रंशेन वा पुनः ॥ पैशाच्या शौरसेन्या च मागध्यान्यो निबध्यते । द्विजादिः कोऽपि भाषाभि. सर्वाभिरपि कश्चन ॥ इति ॥ ३२ ॥

संस्कृतादिकं विवृणोति संस्कृतमिति । दैवी देवसम्बन्धिनी देवव्यवहार्य्या वा वाक् महर्षिभि. संस्कृतम् अन्वाख्याता कथिता, प्राकृतानां नीचानामिदं प्राकृतं तस्य क्रमः नियमः अनेकः बहुविधः तथा तद्भव. तस्मात् संस्कृतात् भवः उत्पन्न तत्सम: संस्कृतसदृश. तथा देशी तत्तद्देशप्रचलित इत्यर्थः ।

महाराष्ट्राश्रयां भाषां प्रकृष्टं प्राकृतं विदुः।
सागरः सूक्तिरत्नानां सेतुबन्धादि यन्मयम् ॥३४॥
शौरसेनी च गौड़ी च लाटी चान्या च तादृशी।
याति प्राकृतमित्येवं व्यवहारेषु सन्निधिम् ॥३५॥
आभीरादिगिरः काव्येष्वपभ्रंश इति स्मृताः।
शास्त्रेषु संस्कृतादन्यदपभ्रंशतयोदितम् ॥ ३६ ॥

देशीनामपि संस्कृतसादृश्यात् द्वावेव भेदाविति केचित्। उक्तञ्च, आर्षोत्थमार्षतुल्यञ्च द्विविध प्राकृतं विदुः इति ॥ ३३ ॥

महाराष्ट्राश्रया महाराष्ट्रो नाम दक्षिणापथवर्त्ती जनपदविशेषः तदाश्रया तत्सम्बन्धिनीं तत्रत्यैर्व्यवहृतामित्यर्थः भाषा प्रकृष्टम् उत्कृष्टं प्राहुः विदुः जानन्ति बुधा इति शेषः। सूक्तिरत्नानां सूक्तयः सुवचनानि एव रत्नानि सहृदयानन्दजननात् रत्नस्वरूपाणि तेषां सागरः सेतुबन्धादि सेतुबन्धः तदाख्यकाव्यग्रन्थविशेषः आदिपदेन दशमुखवधादीनां परिग्रहः यन्मयः यदात्मक महाराष्ट्रीयभाषया रचित इत्यर्थः ॥ ३४ ॥

शूरसेनो नाम मथुरासन्निहितजनपदभेदः गौडः देशविशेषः लाटीव कश्चित् देशभेदः तत्तद्देशप्रचलिता तथा तादृशी तत्सदृशी अन्या च देशीया भाषा प्राकृतमिति एनं व्यवहारेषु प्राकृतनामव्याहारेषु सन्निधिं याति प्राप्नोति अन्या च तादृशीत्यनेन सर्वदेशीया एव प्राकृतनाम्ना कविभिर्निबध्यन्ते इत्यपि सूचितम् ॥ ३५ ॥

काव्येषु आभीरो गोपजातिविशेषः आदिपदेन कैवर्त्तचाण्डालादीनां ग्रहणं तेषां गिरः वाचः अपभ्रंश इति स्मृताः

संस्कृतं सर्गबन्धादि प्राकृतं स्कन्धकादिकम् ।
आसारादीन्यपभ्रंशो नाटकादि तु मिश्रकम् ॥३७॥

अपभ्रंशनामा कथिता शास्त्रेषु काव्यातिरिक्तेषु वेदादिषु तु संस्कृतात् अन्यत् सर्वं प्राकृतम् उक्तिखितमाभीरादिवचनञ्च इत्यर्थं अपभ्रंशतया उदित कथितम् ॥ ३६ ॥

संस्कृतादिक निरूप्य तत्तल्लक्ष्याणि निरूपयति संस्कृतमिति । सर्गबन्धः पूर्वमुक्त प्रबन्धविशेषः महाकाव्यमित्यर्थः आदिपदेन खण्डकाव्यादीनां परिग्रह संस्कृतं संस्कृतभाषया रचितम् । तथाच अग्निपुराणम्, सर्गबन्धो महाकाव्यमारब्ध संस्कृतेन यत् । तद्वच न विशेत्तत्र तत्सम नापि किञ्चन ॥ इति । स्कन्धकादिक स्कन्धक छन्दोभेद आदिपदेन गलितकादीना ग्रहणम् । तदुक्तं, छन्दसा स्कन्धकेनैव तथा गलितकैरपि इति । स्कन्धकादिच्छन्दोरचित काव्य प्राकृतं प्राकृतभाषामयमित्यर्थ । आसारादीनि आसारादिभि छन्दोभि निबद्धमित्यर्थं काव्यम् अपभ्रंशः । नाटकादि तु नाटकम् आदि यस्य तत् आदिना प्रकरणनाटिकादिपरिग्रहः मिश्रकं नानाभाषामयमित्यर्थः । तथाचोक्त नाटकादिप्रस्तावे, पुरुषाणामनीचाना संस्कृत स्यात् कृतात्मनाम् । शौरसेनी प्रयोक्तव्या ताद्दशीनाञ्च योषिताम् ॥ आसामेव तु गाथासु महाराष्ट्रीं प्रयोजयेत् । अत्रोक्ता मागधी भाषा राजान्तःपुरचारिणाम् ॥ चेटाना राजपुत्राणा श्रेष्ठिनाञ्चार्द्धमागधी । प्राच्या विदूषकादीना धूर्त्ताना स्यादवन्तिका ॥ योधनागरिकादीनां दाक्षिणात्याद्रि दीव्यताम् । शकाराणा शकादीना शाकारीं सम्प्रयोजयेत् ॥ इति ॥ ३७ ॥

कथाहि सर्वभाषाभिः संस्कृतेन च वध्यते।
भूतभाषामयीं प्राहुरद्भुतार्थां बृहत्कथाम् ॥ ३८
लास्यच्छलितशल्यादि प्रेक्ष्यार्थमितरत् पुनः।
श्रव्यमेवेति सैषापि द्वयी गतिरुदाहृता ॥ ३९ ॥

कथा पूर्वोक्त काव्यभेदं सर्वभाषाभिः संस्कृतेन च वध्यते विरच्यते हिशब्दोऽवधारणे तथाहि कथा द्विविधा मिश्रभाषामयी संस्कृतमयी च इति भाव। बृहत्कथां तदाख्यकाव्यन्तु भूतभाषा पैशाची भाषा तन्मयी तद्रचिताम् अद्भुतार्थां विस्मयरसपूर्णां प्राहुः विद्वांस इति शेष ॥ ३८ ॥

सम्प्रति दृश्यश्रव्यत्वभेदेन काव्यस्य द्वैविध्यमाह लास्येति। लास्य शृङ्गाररसाविष्टस्त्रीजननृत्यम्। तदुक्तं, लासं स्त्रीपुंसयोर्भावस्तदर्हं तत्र साधु वा। लास्यं मनसिजोल्लासकरं शृङ्गारभाववत्। देव्यै देवोपदिष्टत्वात् प्रायः स्त्रीभिः प्रयुज्यते ॥ इति। अन्यच्च, कोमल मधुर लास्यं शृङ्गाररससंयुतम्। गौरीतोषकरत्वापि स्त्रीनृत्यन्तु तदुच्यते ॥ इति। छलित पुरुषनर्त्तनम्। तदुक्तं, पुंनृत्यं छलितं विदुः इति। शल्या कपालदेशे करविन्यासपूर्वकं नृत्यं तदाह, भाले हस्तं समावेश्य नृत्य शल्येति कीर्त्तितम् इति। शल्येत्यत्र साम्येति क्वचित् पाठः तथात्वे साम्यं गोतवादित्रादिसमन्वित नृत्य रासाण्यरपर्य्यायमभिहितम्। आदिपदेन ताण्डवादिपरिग्रह। तथोक्तं, तल्लास्य ताण्डवञ्चेति छलितं शल्यया सह। हल्लीशकञ्च रासञ्च षट्प्रकारं विदुर्बुधा ॥ इति ताण्डवमुद्धतनृत्यं यथा, उद्धतन्तु महेशस्य शासनात् तण्डुनोदितम्। भरताय तत ख्यातं लोके ताण्डवसंज्ञया ॥ इति। हल्लीशं स्त्रीणां मण्डलाकारेण नृत्यम्। यदुक्तं, मण्ड-

अस्त्यनेको गिरां मार्गः सूक्ष्मभेदः परस्परम् ।
तत्र वैदर्भगौड़ीयौ वर्ण्येते प्रस्फुटान्तरौ ॥ ४० ॥
श्लेषः प्रसादः समता माधुर्य्यं सुकुमारता ।
अर्थव्यक्तिरुदारत्वमोजःकान्तिसमाधयः ॥ ४१ ॥

नेन तु यत् स्त्रीणां नृत्यं हस्तीशकं विदुः । तत्र नेता भवेदेको गोपस्त्रीणां यथा हरिः ॥ तदेव लाट्यादिमद्घटित काव्य प्रेक्षार्थं प्रेक्ष्य. दृश्य अर्थं प्रतिपाद्य वस्तु यस्मिन् तत् नटै रामाद्यवस्थानुकरणस्य दर्शनविषयत्वात् इतरत् अन्यत् दृश्य-काव्याद् भिन्न मुक्तकादिश्रव्यमेव श्रवणमात्रविषयत्वात् । उक्तञ्च भोजराजेन, श्रव्य तत् काव्यमाहुर्यन्नेच्यते नाभिधीयते । आवयोरेव सुखद भवेत्तदपि षड्विधम् ॥ इति । इत्थ सा प्रमिदा एषा उक्तरूपा द्वयी द्विविधा गतिः काव्यभेदप्रवर्त्तक पन्था उदाहृता प्राचीनैरिति शेष ॥ ३९ ॥

एव काव्यभेद निरूप्य तस्य रीतिर्निरूपयति अस्तीति । अनेक विविध गिरा वाचा मार्ग रचनापद्धति. रीति' इति यावत् अस्ति । तथाच, गौडी वैदर्भी पाञ्चाली इति वामन । अतिरिक्ता लाटीति दर्पणकार । वैदर्भी चाथ पाञ्चाली गौडी चावन्तिका तथा । लाटीया मागधी चेति पोढा रीतिर्निगद्यत इति भोजराजादय । स च परस्पर सूक्ष्मभेद' स्वल्पमात्रभेद अत तन्निरूपणेन ग्रन्थबाहुल्यकरण हयेति भाव । तत्र विवि-धेषु मार्गेषु मध्ये वैदर्भगौडीयौ वर्ण्येते यत. तौ प्रस्फुटम् अन्तर यतो तादृशौ एकस्य सुकुमारत्वेन अपरस्य उत्कटत्वेन अत्यन्त-वैसादृश्यात् इति भाव ॥ ४० ॥

के ते भैदर्भीगौडौ इत्याह श्लेष इति । श्लेषादय दश

इति वैदर्भमार्गस्य प्राणा दशगुणाः स्मृताः ।
एषां विपर्य्ययः प्रायो दृश्यते गौड़वर्त्मनि ॥४२॥
श्लिष्टमस्पृष्टशैथिल्यमल्पप्राणाक्षरोत्तरम् ।
शिथिलं मालतीमाला लोलालिकलिला यथा ॥४३॥

गुणाः शब्दार्थोत्कर्षविधायिनो धर्मविशेषाः वदर्भमार्गस्य वैदर्भीयरीत्याः प्राणाः जीवनानि एतेन श्लेषादिमत्पदरचनावत्त्वं वैदर्भीत्वमित्युक्तम् । स्मृताः पण्डितैः इति शेषः । दर्पणकारादयस्तु आत्मनः शौर्य्यादय इव रसस्य काव्यात्मभूतस्य धर्मा माधुर्य्यौज.प्रसादादय एव गुणा इत्याहुः । गौडीवर्त्मनि तु गौड़ीयरीत्यान्तु एषां श्लेषादीनां प्रायः बाहुल्येन विपर्य्यय वैपरीत्य दृश्यते विपर्य्ययश्च क्वचित् सर्वथा, क्वचित् केनचित् अंशेनेति बोध्यम् । उक्तञ्च, असमस्तैकसमस्ता युक्ता दशभिर्गुणैश्च वैदर्भी । वर्गद्वितीयबहुला स्वल्पप्राणाक्षरा च सुविधेया इति बहुतरसमासयुक्ता सुमहाप्राणाक्षरा च गौडीया । रीतिरनुप्रासमहिमपरतन्त्रा स्तोभवाक्या च इति ॥ ४१ ॥ ४२ ॥

इदानीं श्लेषादीनां लक्षणानि निरूपयति श्लिष्टमित्यादि । अल्प. प्राणः सारः उच्चारणप्रयासः येषां तानि अक्षराणि उत्तराणि प्रधानानि प्रचुराणि यस्मिन् तादृशम् अल्पप्राणाक्षराश्च ङ्ञस्खसरा वर्गीया विषमवर्णा यरलवाश्चेति । शिथिलम् अपिरत्नाध्याहार्य्य अतीव्रमपोत्यर्थ. अस्पृष्टं शैथिल्य येन तत् विन्यासवशात् शिथिलत्वेन अलक्ष्यमाणं वाक्य श्लिष्ट श्लेषगुणयुक्तमित्यर्थः । तथाच, तादृशाक्षरघटितरचना श्लेष इति फलितम् । दृष्टान्तमाह मालतीति यथा लोले. चपले: अलिभि.

अनुप्रासधिया गौड़ैस्तदिष्टं बन्धगौरवात् ।
वैदर्भैर्मालतीदाम लक्षितं भ्रमरैरिति ॥ ४४ ॥

भ्रमरै कलिना व्याप्ता मालती माला । एतच्च मकारादिभि अल्पप्राणाक्षरैर्घटितम् अनुप्रासवशात् गाढमिव प्रतिभासते इत्यत्र श्लेषाख्यगुणो बोद्धव्य । केचित्तु यत्किञ्चनवर्णघटताना पदाना बह्वनां विन्यासमात्रिण्ना एकपदवत् अवभासनं श्लेष इति वदन्ति उदाहरन्ति च यथा । उन्मज्जत् जलकुञ्जरेन्द्र-रभसास्फालानुबन्धोद्धत सर्वा पर्वतकन्दरोदरभुव' कुर्वन् प्रतिध्वानिनी. । उच्चैरुच्चरति ध्वनि' श्रुतिपथोन्माथी यथाय तथा प्राय. प्रेङ्खदसङ्ख्यशङ्खधवला वेलेयमुद्गच्छति इति । वस्तु-तस्तु अल्पप्राणेषु वर्णेषु विन्यासोऽप्यन्तरान्तरा । महाप्राणस्य च श्लेषो यथाय भ्रमरध्वनि: । इति क्रमदीश्वरोक्तमेव ममी-चीनम् अनुप्रासस्य लक्षणघटकत्वे तद्घटितमाधुर्य्यादौ अति-व्याप्तेरिति ज्ञेयम् ॥ ४३ ॥

गोडै: गौडदेशनिवासिभि: कविभि: अनुप्रासधिया अनु-प्रासो वर्णावृत्तिरूप: शब्दालङ्कार: तस्य धिया बोधेन तथा बन्धगौरवात् रचनाया गाढत्वात् तत् मालतीमालेत्यादि । श्लेषोदाहरणम् इष्टम् अभिलषित ते तादृशीमेव रचनां प्रायश इच्छन्तीति भाव' । वैदर्भै विदर्भदेशीयै: कविभि: भ्रमरै' अत्र इवशब्दोऽध्याहार्य्य: मालतीदामेति वाक्य मालतीमाले-त्यनभिधाय इति भाव: । लक्षितम् आक्रान्त श्लेषघटितत्वेन अङ्गीकृतमिति यावत् तेषा कुत्रचित् अनुप्रासासङ्गावेऽपि श्लेषत्वकीर्त्तनादिति भाव. । अयञ्च श्लेष. शब्दमात्रगुण. । अर्थगुणस्तु दर्पणकारादिभि. उक्तस्तत्र तत्र द्रष्टव्य: ॥ ४४ ॥

प्रसादवत् प्रसिद्ध्यर्थमिन्दोरिन्दीवरद्युति।
लक्ष्म लक्ष्मीं तनोतीति प्रतीतिसुभगं वचः ॥४५॥
व्युत्पन्नमिति गौड़ीयैर्नातिरूढ़मपीष्यते।
यथानत्यर्जुनाज्जन्म सदृच्चाङ्को बलच्छगुः ॥ ४६ ॥

प्रसादं निरूपयति प्रसादवदिति। प्रसिद्ध अर्थः प्रतिपाद्यवस्तु यस्य तत् उभयार्थकशब्दानाम् अप्रसिद्धार्थे प्रयोगो निहतार्थतारूपदोषः तद्रहितमित्यर्थः. प्रतीत्याम् अर्थपरिज्ञाने सुभगं सरल झटित्यर्थबोधक वचः वचन प्रसादवत् प्रसादगुणयुक्तं तथाच निर्दोषत्वे सति परिस्फुटार्थवत्त्वं प्रसाद इति भावः तत्र उदाहरणम् इन्दोरिति। इन्दीवर नीलोत्पलं तद्वत् द्युतिर्यस्य तादृशं श्यामवर्ण लक्ष्म कलङ्कः इन्दोः चन्द्रस्य लक्ष्मीं श्रिय तनोति विस्तारयति। अत्र इन्दादिशब्दाः प्रसिद्धचन्द्रादार्थेषु प्रयुक्ता झटित्यर्थबोधकाश्चेति ज्ञेयम् ॥ ४५ ॥

गौडीयानां मतं दर्शयति व्युत्पन्नमिति। गौडीयैः तद्देशवासिभिः पण्डितैः न अतिरूढमपि अनतिप्रसिद्धमपि निहतार्थत्वदोषाकलितमपीत्यर्थः व्युत्पन्न व्युत्पत्तियुक्त योगार्थघटितमित्यर्थः वाक्यं प्रसादवदिति शेषः इष्यते बन्धगाढतावशात् वैचित्र्याधायत्वादिति भाव। उदाहरति यथेति अनत्यर्जुनाज्जन्मसदृच्चाङ्क अनत्यर्जुन नातिधवलं यत् अजन्म उत्पल तस्य सदृक् सदृशः अङ्कः कलङ्क यस्य तथोक्तः बलच्छगुः धवलः गौः किरणो यस्य सः चन्द्र इति अत्र अर्जुनशब्दः कार्त्तवीर्यार्जुनपाण्डवयोः प्रसिद्धः श्वेतवर्णे अप्रसिद्ध इति निहतार्थत्वदोषदुष्टः अजन्मशब्दश्च अप्रसिद्धः सदृक्षशब्दश्च उपमागर्भबहु-

समं बन्धेष्वविषमं ते मृदुस्फुटमध्यमाः ।
बन्धामृदुस्फुटोन्मिश्रवर्णविन्यासयोनयः ॥ ४७ ॥

ब्रीड्गिणेवार्थबोधनात् अधिक' प्रयुक्त इति अधिकपदतादोषदुष्ट एव तथा वलत्तशब्दोऽपि अप्रयुक्ततादोषकलितः । श्रुतिकटू च सट्टत्तवलत्तशब्दौ । इत्थञ्च बहुदोषमपि काव्यं विन्यासस्य गाढत्वात् गौडा. काव्यत्वेनाद्रियन्ते । अयञ्च प्रसादाख्यगुण पर्यगत एव शब्दगस्तु ओजोमिश्रितशैथिल्यात्मा इति दर्पणकार. । उदाहृतञ्च तेनैव यथा यो यः शस्त्र बिभर्त्ति स्वभुजगुरुमदात् पाण्डवीनां चमूनाम् । यो य' पाञ्चालगोत्रे शिशुरधिकवया गर्भशय्या गतो वा । यो य तत्कर्मसाक्षी चरति मयि रणे यश्च यश्च प्रतीपः क्रोधान्धस्तस्य तस्य स्वयमिह जगतामन्तकस्यान्तकोऽहमिति ॥ ४६ ॥

ममतां निरूपयति ममेति । बन्धेषु रचनासु अविषमम् अविलक्षणम् उपक्रमोपसंहारयो' सदृशमित्यर्थः सम समताख्यगुणयुक्त तथाच उपक्रमेषु यादृशी रचना, उपसंहारेषु तादृश्येव एव गुण' समता इत्यर्थः, ते बन्धा' त्रिविधा' मृदु कोमल, स्फुट तीव्र, मध्यम' उभयात्मक इति । बन्धाना मृदुत्वादेर्हेतुमाह, मृदिति । मृदुवर्णाना ह्रस्वस्वरादीना स्फुटाना दीर्घस्वरादीना तथा उन्मिश्राणाम् उभयात्मकानां वर्णानां विन्यास योनि कारण येषां तादृशाः । अयञ्च गुण' शब्दगत एव अर्थगुणस्तु समताप्रक्रान्तप्रकृतिप्रत्ययाद्यविपर्यासेन अर्थस्य अविसवादिता स च प्रक्रमभङ्गदोषाभाव एव दर्पणकारेणोक्त यथा उदेति सविता ताम्रस्ताम्र एवास्तमेति चेत्यादि ॥ ४७ ॥

कोकिलालापवाचालो मामेति मलयानिलः ।
उच्छलच्छीकराच्छाच्छनिर्झराम्भःकणोचितः ॥४८॥
चन्दनप्रणयोद्गन्धिर्मन्दो मलयमारुतः ।
स्पर्द्धते रुद्धमद्यैर्यो वररामासुखानिलैः ॥ ४९ ॥
इत्यनालोच्य वैषम्यमर्थालङ्कारडम्बरौ ।

उक्तायाः समतायाः त्रैविध्यं दर्शयति कोकिलेत्यादि। कोकिलानाम् आलापेन वाचालः मुखरः मलयानिलः माम् एति पीडयितुं सुखयितुं वा इति शेषः । अत्र मृदुनोपक्रान्तस्य तेनैव समापनमिति मृदुबन्धगा समता । उच्छलन्तः उद्गच्छन्तः शीकरा जलकणा यस्य तादृशम् अच्छाच्छम् अतिस्वच्छं यत् निर्झराम्भः तस्य कणैः विन्दुभिः उचितः अभिषिक्तः सुशीतल इति यावत् मलयानिलः मामेति। अत्र स्फुटबन्धेन उपक्रान्तस्य सन्दर्भस्य तेनैव उपसंहार इति स्फुटबन्धगता समता। चन्दनेन प्रणयः संसर्गः चन्दनप्रणयः तेन उद्गन्धिः उद्गतगन्धः मन्दः मृदुलः तथा रुद्धं निराकृतं मम धैर्यं येन तथाभूतः मम धैर्यं नाशयन्नित्यर्थः वररामाणाम् उत्तमाङ्गनानां सुखानिलैः सुखनिःसृतसुगन्धिमारुतैः स्पर्द्धते सादृश्यं लभते इति यावत् सौगन्ध्यसाम्यादिति भावः। अत्र उपक्रमोपसंहारयोर्भिन्नबन्धवशात् मध्यमबन्धगता समता ॥ ४८ ॥ ४९ ॥

उक्तायां समतायां गौड़ीयानामनादरं दर्शयति इतीति। इति उक्तप्रकारं वैषम्यं बन्धगतं मार्दवादिकम् अनालोच्य अविचार्य्य अर्थानां काव्यार्थानाम् अलङ्काराणाम् अनुप्रासोपमादीनाञ्च डम्बरौ आडम्बरौ उत्कर्षौ इत्यर्थः अपेक्षमाणा अनुसरन्तीत्यर्थः पौरस्त्याः पूर्वदेशीयाः गौडीया इत्यर्थः काव्यानां

अपेक्षमाणा वक्रधे पौरस्त्या काव्यपद्धतिः ॥ ५० ॥
मधुरं रसवद्वाचि वस्तुन्यपि रसस्थितिः ।
येन माद्यन्ति धीमन्तो मधुनेव मधुव्रताः ॥ ५१ ॥

पद्धतिं वक्रधे । ते हि अर्थानुसारेण अलङ्कारानुसारेण च कदाचित् बन्धस्य मार्दवं कदाचित् वैकट्यं क्वचिद्वा मिश्रीभावमाश्रियन्ते न तु गुणपक्षपातेन पूर्वोक्तरूपां समताम् । अयं भावः । यत्रार्थस्य मृदुत्वं तत्र मृदुलो बन्धः यत्र तु अर्थस्य वैकट्यं तत्र विकटो बन्धः यत्र च अर्थस्य मिश्रीभावः तत्र मध्यमो बन्धः. न तु येनारम्भस्तेनैव समापनमिति । युक्तश्चैतत् तथाहि. मातङ्गा किंशुकालिंते किंमफलैराडम्बरैर्जम्बुका मातङ्गा मल्लिका मठं व्रजत किं शून्याऽयं शूरा न के । कोपाटोपमरुद्घट्टोत्कटगटाकोटेरिभारेः शनैः भिन्धानानि हृङ्कृतैः स्फुरति यत् तद्गर्जितं गर्जितम् ॥ इत्यत्रोत्तरार्धे क्षुभितमिश्रवर्णनरूपार्थस्य वैकट्यात् उपक्रान्तमृदुबन्धत्यागो गुण एवेति अनुसन्धेयम् ॥ ५० ॥

माधुर्यं निरूपयति मधुरमिति । रसवत् रसा शृङ्गारादय तद्गुणयोगात् भावतदाभासा अपि रसशब्दवाच्या ते विद्यन्ते यत्रेति तत् वाक्यं मधुरं माधुर्यगुणयुक्तम् । तर्हि रसवत्त्व माधुर्यमित्यर्थत एव आयात पर गुणानां साक्षात् परम्परया वा रसोपकारकत्व सर्वैरेव कविभि अङ्गीकृतमित्याशयेनाह वाचीति । वाचि तादृशगुणयुक्तवाक्ये वस्तुन्यपि प्रतिपाद्यभूते अर्थेऽपि रसस्थिति शृङ्गाराद्यवस्थानम् । येन रसेन

यया कयाचित् श्रुत्या यत् समानमनुभूयते।
तद्रूपाहि पदासत्तिः सानुप्रासा रसावहा ॥ ५० ॥
एष राजा यदा लक्ष्मीं प्राप्तवान् ब्राह्मणप्रियः।

तादृग्यकाव्यार्थानुशीलनजन्मा भावविशेष एव रस। माधुर्य्यादि-गुणास्तु तद्व्यञ्जकवर्णादिमत्त्वेन विन्यासमहिम्ना च तत्तोषका एवेति विभावनीयम्। केचित्तु पृथक्पदत्व साधुर्य्य शब्दगुण एव उक्तिवैचित्र्यमात्रन्तु अर्थगुण इति वदन्ति उदाहरन्ति च क्रमेण रथा ह्यासान् मुञ्चति भूतले विलुठति त्वन्मार्गमालोकते इत्यादि। भानु सप्तयुक्ततुरङ्ग एव रात्रिन्दिव गन्धवह प्रयाति इत्यादि वस्तुतस्तु उभयमेव एकरूप न तु कश्चित् प्रभेदो लक्ष्यते उदाहरणयोरिति चिन्तनीयम् ॥ ५१ ॥

श्रुत्यनुप्रासवर्णसहते. रसव्यञ्जकतां दर्शयति ययेति। यया कयाचित् कण्ठतालवादिरूपया इत्यर्थ. श्रुत्या श्रवणसाधनीभूतेन उच्चारणेन यत् समानम् अनुभूयते तद्रूपा तादृशानुभवविषयिणी सानुप्रासा रसव्यञ्जकप्रकृष्टविन्यासवती पदासत्तिः पदानाम् आसत्तिः अव्यवधानेन अवस्थितिः रसम् आवहतीति रसवहा स्थिरव्यवधारणार्थः निश्चितमेव रसपोषिकेत्यर्थ.। एतेन कण्ठतालवादिस्थानैक्येन व्यञ्जनवर्णानां सादृश्यं श्रुत्यनुप्रास इत्यर्थात् आयातम्। उक्तञ्च दर्पणकारेण यथा, उच्चार्य्यत्वात् यदैकत्र स्थाने तालुरदादिके। सादृश्यं व्यञ्जनस्यैष श्रुत्यनुप्रास उच्यते ॥ इति यस्य च अलङ्कारप्रकरणीयत्वेऽपि इह गुण-प्रसङ्गात् लक्षणमुक्तं वक्ष्यते च काश्चिन्मार्गविभागार्थयुक्ता. प्राग-व्यलङ्क्रिया इति ॥ ५२ ॥

उदाहरण दर्शयति एष इति। ब्राह्मणा. प्रिया यस्य

ततः प्रभृति धर्मस्य लोकेऽस्मिन्नुत्सवोऽभवत् ॥५३॥
इतीदं नाद्दतं गौड़ैरनुप्रासस्तु तत्प्रियः ।
अनुप्रासादपि प्रायो वैदर्भैरिदमिष्यते ॥ ५४ ॥
वर्णावृत्तिरनुप्रासः पादेषु च पदेषु च ।

अथवा ब्राह्मणाना प्रिय एष राजा यदा लक्ष्मीं राजश्रियं प्राप्तवान् तत प्रभृति लोके जगति धर्मस्य उत्सव. अभवत् । अमो धर्मेण प्रजा पालयामास इत्यर्थ । इह षकारवकारयो एकस्मात् मूर्ध्न जकारयकारयोस्तालुत दकारलकारयोश्च दन्तादुच्चरितत्वेन साद्दश्यमित्यत. श्रुत्यनुप्रासात् माधुर्य्यगुण-पुष्टो राजविषयकरतिभाव इति विभावनीयम् ॥ ५३ ॥

अत्र वैदर्भीगौडयोर्मतभेद दर्शयन्नाह इतीति । इतिपद पूर्वोक्तद्योतकम् इति पूर्वोक्तमिद पद्य गौडे गौडवासिभि· कविभि न आद्दत माधुर्य्यगुणवत्तया न स्वीकृत विभिन्नवर्णा-नामेकस्यानोच्चरितत्वेऽपि समानुगुण्यस्याननुभवादिति भाव । अनुप्रासस्तु वक्ष्यमाणवर्णावृत्तिरूप तत्प्रिय: तेषां गौडानां प्रिय समानुकूल्यतया आद्दत· । वैदर्भैस्तु अनुप्रासात् पूर्वोक्तात् श्रुत्यनुप्रासादपि प्राय बाहुल्येन इदम् एष राजेत्यादि पद्यम् इष्यते आद्रियते इत्यत्र वैदर्भाणां श्रुत्यनुप्रास वर्णावृत्तिरूपानु-प्रासयोरुभयोरेव प्रियता गौडानान्तु केवल वर्णावृत्तिरूपे इति अनयोर्मतभेद इति दिक् ॥ ५४ ॥

अनुप्रासमाह, वर्णावृत्तिरिति । वर्णानां व्यञ्जनानाम् आवृत्ति पुनरुच्चारणम् अनुप्रास. । उक्तञ्च प्रकाशकारेण वर्ण-साम्यमनुप्राम इति । वर्णानामिति एकशेषद्वन्द्ववशात् वर्णस्य वर्ण्योरपीति बोध्यम् । स च द्विविध. पादेषु पदेषु च पादा:

पूर्वानुभवसंस्कारबोधिनी यद्यदूरता ॥ ५५ ॥
वन्द्रे शरन्निशोत्तंसे कुन्दस्तवकसन्निभे।
इन्द्रनीलनिभं लक्ष्म सन्दधात्यलिनः प्रियम् ॥५६॥

द्यचतुर्थभागगा तेषु पदेषु तत्तत्पादस्यानुपूर्तिङन्तेषु च पाद-
त पदगत इत्यर्थः। पादेषु चेति बहुवचनेन सर्वपादेषु अनु-
ासस्थितिविशेषेण स्नोरन्ति सूचितम्। आहत्तिश्च स्वर-
ण्यस्यापि वैचित्र्यमावहति। तथाचोक्तं दर्पणकारैः, अनु-
ास शब्दसाम्य वैषम्येऽपि स्वरस्य यत् इति। आहत्तिश्च
व्यवहिता सुखा, व्यवधानेऽपि पूर्वसंस्कारस्थित्यवधिकेत्याह
र्वेति। पूर्वमुच्चरितस्य वर्णस्य य अनुभव आवणज्ञान तज्ज-
नित संस्कार भावनाविशेष, तस्य बोधिनी पालनी अदूरता
द्वितीयादिवर्णस्य सान्निध्य यदि वर्त्तते इति शेष तदैवानुप्रास
त्यन्वय। अय भाव संस्कारस्य प्रथमक्षणे उत्पत्ति, द्वितीय-
णे स्थिति, तृतीयक्षणे निहत्ति इति नियमेन अव्यवधानेन
केनचिद्व्यवधानेन वा सादृश्यप्रतीतिजननात् वैचित्र्यजनक-
ादृश्यवर्णाहत्तिरनुप्रास इति निष्कर्ष। अयञ्च द्विविधः
केकानुप्रास इत्यनुप्रासश्च तदुक्तं दर्पणकारैः, छेको व्यञ्जन-
स्य सकृत्साम्यमनेकधा। अनेकस्यैकधा साम्यमनकधाप्य-
नेका। एकस्य सकृदप्येष इत्यनुप्रास उच्यते। इति। अपरञ्च
एकोक्तेऽपि यथा, शब्दार्थयो पौनरुक्त्य भेदे तात्पर्यमात्रत।
टानुप्रास इत्युक्त इति। उदाहृतञ्च तेनैव यथा, क्षेरराजीव-
नि ' नयने किं निमीलिते। पश्य निर्जितकन्दर्प कन्दर्प-
गं प्रियम्। इति ॥ ५५ ॥

उदाहरति चन्द्रे इति। शरन्निशायाः शारदीयरात्र्या

चारु चान्द्रमसं भीरु ! बिम्बं पश्यैतदम्बरे ।
मन्मनो मन्मथाक्रान्तं निर्दयं हन्तुमुद्यतम् ॥५७॥

उन्मेषे शिरोभागरूपे कुन्दस्तबकसन्निभे माध्यकुसुमगुच्छ-मट्टगे चन्द्रे उन्मीलनिभ श्यामलम् इत्यर्थ लक्ष्म कलङ्क मलिन भसरस्य शिग शोभा मन्दधाति धारयति। अत्र चमसरिनीयतालोनेषु चादेषु चकार ककार वकार नकार-लकाराणा वर्णाना पुनरावृत्तिवशात् साम्यप्रतीतिरिति वृत्त्यनु प्रास । चतुर्थे च टकार धकार तकार नकाराणा दन्तरूपैक-स्थानोच्चारणात् श्रुतानुप्रास इति अनेन च अलङ्कारद्वयेन व्यक्तिर्मा धुर्य शृङ्गारस्य पद्यनिष्ठ परिपुष्णाति। अत रूप-कागमाभ्यामनुप्राणिता निदर्शनानाम अलङ्कृति सुधीभिर्वि-भावनीया ॥ ५६ ॥

स्वरवैषम्येण अनुप्रासो दर्शित इदानी तत्साट्टश्येन दर्श-यति चार्विति। हे भीरु ! भयशीले ! अम्बरे आकाशे एतत् परिदृश्यमानम इत्यर्थ चारु मनोज्ञ मन्मथाक्रान्त कामार्त्त मन्मन मम मानस निर्दय यथा तथा हन्तुमुद्यत चान्द्रमस बिम्ब चन्द्रमण्डल पश्येत्यन्वय । मानिनीं कामिनीं प्रति कस्य-चित् नायकस्य उक्तिरियम्। इह प्रथमे पादे चकाररेफा-र्यो स्वरसंहतयो साट्टश्यात् वृत्त्यनुप्रास । द्वितीयतृतीय-योश्च यथाक्रम मकारयोर्मन्मसन्मयोश्च साम्यात् छेकानुप्रासो-ऽपि। तथा चतुर्थे टकारयोस्तकारयोश्च स्वरवैषम्येण साट्टश्यात् अन्त्यविधो वृत्त्यनुप्रासस्य। साधुर्य्यगुणोऽप्यत्र शब्दार्थोभय-निष्ठत्वेन चमत्कारजननात् विप्रलम्भाख्य शृङ्गार परिपुष्णाति ॥ ५७ ॥

इत्यनुप्रासमिच्छन्ति नातिदूरान्तरश्रुतिम्।
न तु रामासुखाम्भोजसदृशश्चन्द्रमा इति ॥ ५८ ॥
स्मरः खरः खलः कान्तः कायः कोपश्च नः क्षयः।
च्युतोमानोऽधिकोरागोमोहोजातोऽसवोगताः॥५९॥

अदूरनैवानुप्रासस्य प्रयोजकमित्याह इतीति। अतिदूरं मन्दधिकम् अन्तर व्यवधान यस्या' सा अतिदूरान्तरा न अतिदूरान्तरा नातिदूरान्तरा, तादृशी श्रुति श्रवण यस्य तादृशम् इति पूर्वोक्तप्रकारम् अनुप्रासम् इच्छन्ति अत्र इति शेष रामासुखाम्भोजसदृश चन्द्रमा इति एवविध तृतीयचतुर्थयो पादयो माकारयो साम्येऽपि अतिदूरान्तरश्रुतिम् अनुप्रासमिति शेष न तु इच्छन्तीति च शेष ॥ ५८ ॥

अनुप्रासस्य रसावहत्वकीर्त्तनात् यत्र वाच्यस्य सदोषत्वेन रसस्य अपरिपुष्टता तत्र न माधुर्य्यसद्भाव इत्याह स्मर इति। स्मर काम खर अतितीक्ष्ण, कान्त प्रिय, खल' निष्ठुर, न अस्माक काय शरीर कोपश्च कान्त प्रतीति शेष क्षय क्षीण नष्टश्च, मान' गौरव च्युत विनष्ट, राग' कान्तप्राप्त्यभिलाष अधिक, मोह मूर्च्छा जात क्षणे क्षणे इति शेष, असव प्राण गता, प्रायेणेति शेष। इदं नायक निराकृतवत्या' गलितमानाया कस्याश्चित् कान्त्या' पश्चात्तापवचनम्। अत्र प्रथमे पादे रकारयो खकारयोश्च द्वितीये ककारस्य साम्यात् इत्यनुप्रासस्य तथा उत्तरार्द्धे तकारादिदन्त्यवर्णाना साम्यात् छेकानुप्रासस्य दोषाकुलतया तादृशविप्रलम्भशृङ्गारस्य न अतिपरिपोषकता इति बोध्यम्॥ ५९।

इत्यादि बन्धपारुष्यं शैथिल्यञ्च नियच्छति ।
यतो नैवमनुप्रास दाक्षिणात्याः प्रयुञ्जते ॥ ६० ॥
आवृत्तिं वर्णमङ्गातगोचरां यमकं विदुः ।
तत्तु नैकान्तमधुरमतः पश्चात् विधास्यते ॥ ६१ ॥

पूर्वोक्ते पद्ये दोषमाह इत्यादीति । इत्यादि एवमादिक मानुप्राममपि पद्य बन्धपारुष्य बन्धे रचनाया पारुष्य दृढत्व शैथिल्य पतत्प्रकर्षतादिकञ्च नियच्छति ज्ञापयति । अत पूर्वार्द्धे गतिभगमत्तया पारुष्यम् । तदुक्तम्, अनुस्वारविसर्गौ तु पारुष्याय निरन्तरौ इति । पूर्वार्द्धे यादृशी तीव्ररचना उत्तरार्द्धे तथा नेति पतत्प्रकर्षता । अत कारणात् एव मदोषमित्यर्थ अनुप्राम दाक्षिणात्या पण्डिता न प्रयुञ्जते न व्यवहरन्ति माधुर्यस्य अभङ्गावादिति भाव । यत्र तु पारुष्यादिके रसानुकूलतया माधुर्यमस्ति तत्र पारुष्यादिक न दोष प्रत्युत गुण एव । तथाचोक्त, यत्रारि क्रोधमयुक्ते तथा वाच्ये समुद्यते । रौद्रादौ च रसेऽत्यन्त दृढत्व गुणो भवेत् इति ॥ ६० ॥

ननु अनुप्रामवत् यमकमपि काव्यमत्र न निरूप्यत इत्याह आवृत्तिमिति । वर्णसङ्घात वर्ण समूह एव गोचर विषयो यस्या तथोक्ताम् आवृत्ति पुनरुच्चारण यमक विदु जानन्ति कवय इति शेष । तदुक्त दर्पणकारेण यथा, सत्यर्थे पृथगर्थाया स्वरव्यञ्जनसहते । क्रमेण तेनैवावृत्तिर्यमक विनिगद्यते ॥ इति । तत् तु यमक पद्य न एकान्तमधुर न अतिशयेन माधुर्यवत् तथाहि तथाविधे वाक्ये प्रथमम् अर्थानुसन्धानव्यग्रतया रसप्रतीतिर्व्यवहितत्वात् इति अनुप्रासे तु अर्थानुसन्धानव्यग्रताया अभावात् रसप्रतीते अव्यवहितत्वमिति

कामं सर्वोऽप्यलङ्कारो रसमर्थं निषिञ्चति।
तथाप्यग्राम्यतैवैनं भारं वहति भूयसा ॥ ६२ ॥
कन्ये! कामयमानं मां न त्वं कामयसे कथम्।
इति ग्राम्योऽयमर्थात्मा वैरस्याय प्रकल्पते ॥६३॥

सानुप्रासे वाक्ये माधुर्य्यमस्तीति च भाव। एकान्तेति पदेन यमकेऽपि रसावह माधुर्य्यमस्त्येव परम् अनुप्रासवत् सम्यक् न इति वक्तव्यम् अन्यथा अस्य अनलङ्कारत्वापत्तिरापद्येत शब्दार्थशोभाजननेन काव्यात्मभूतरसोपकारित्वस्य एव अलङ्कारत्वात् इति ध्येयम्। अतः पश्चात् अलङ्कारप्रस्तावे इत्यर्थः. विधास्यते वक्ष्यते यमकमिति शेषः. ॥ ६१ ॥

शब्दगतं माधुर्य्यं दर्शितमिदानीम् अर्थगं माधुर्य्यं दर्शयन्नाह काममिति। सर्वोऽपि शब्दगतः अर्थगतः. उभयगतश्च अलङ्कारः अनुप्रासोपमा पुनरुक्तवत् आभासादि अर्थं वाच्यलक्ष्यव्यङ्ग्यरूपे प्रतिपाद्ये काम यथेष्ट यथा तथा रस निषिञ्चति पुष्णाति उद्बोधयतीत्यर्थः तथापि अग्राम्यता ग्राम्यः इतरजनव्यवहृतः शब्दोऽर्थश्च स न भवतीति अग्राम्यः तस्य भाव भूयसा बाहुल्येन एनं भारं रसनिषेकरूपं वहति तथाच अग्राम्यतापरिहृतानाम् एव अलङ्काराणा रसपोषकत्वं सालङ्कारस्य रसव्यञ्जकस्य एव अर्थस्य माधुर्य्यञ्चेति प्रतिपादितम्। भूयसा इति ग्रहणात् इतरजनकथनेषु ग्राम्यता न दोषः. प्रत्युत गुण एव तदुक्तं गुण इत्यनुवृत्तौ ग्राम्यत्वमधमोक्तिषु इति ॥ ६२ ॥

आमं कन्दर्पचाण्डालो मयि वामाक्षि ! निर्दयः ।
त्वयि निर्मत्सरो दिष्ट्यैत्यग्राम्योऽर्थो रसावहः ॥६४॥

नायिकामम्बोधने तु प्रिये सुन्दरि इत्यादि प्रयोग एव साधु, तस्मादत्र पर्यस्य ग्राम्यता एव न तु कन्याशब्दस्य विदग्धानामपि भरिगमस्तत्प्रयोगदर्शनात् यथा कन्येव कलधौतकोमलरुचि कीर्तिस्तु नात परेत्यादि। प्राचीनैस्तु ग्राम्यजनभावव्याहतानां कन्यादिशब्दानामेव ग्राम्यत्वमुक्तम्। इत्यय ग्राम्य पर्यस्य आत्मा प्रतिपाद्यवस्तु वैरस्याय रसोद्बोधव्याघाताय प्रकल्पते प्रभवति। अय भाव कामो नाम कामिना सुरतेच्छारूप कामिनोऽकुचकलशवत् गूढमतिचमत्करोति, अगूढस्तु लज्जाजनकत्वेन वैरस्यमावहतीति न अत्र माधुर्यसद्भाव इति। अत्र च नायककामरूपकारणे सत्यपि नायिकाकामरूपस्य कार्यस्याभावात् विशेषोक्तिरलङ्कार। तदुक्त दर्पणकारेण, सति हेतौ फलाभावो विशेषोक्तिस्तथा द्विधा इति ॥ ६३ ॥

अग्राम्यता, दर्शयति काममिति। हे वामाक्षि। वामे सुन्दरे कुटिले वा अक्षिणी यस्या' तत्सम्बुद्धौ। कन्दर्पचाण्डाल' मयि निर्दय', दिष्ट्या भाग्येन त्वयि निर्मत्सर इति अग्राम्य' अर्थ. विदग्धजनवाक्यार्थ' रसम् आवहति पुष्णातीति रसावह'। अय भाव वामाक्षीति सम्बोधनपद नायिकाया' सौन्दर्यं नायकस्य च ता प्रति चाटूक्ति व्यञ्जयति, कन्दर्पो मयि निर्दय त्वयि तु निर्मत्सर इत्यनेन अह त्वा कामये त्वन्तु मा न कामयसे इति पूर्वोक्तपद्यार्थ एव भङ्ग्या सूचित इति अग्राम्यता मच्छटयच्छटयङ्गमतया रस व्यञ्जयन्ती माधुर्यगुणम् आवहति इति ॥ ६४ ॥

शब्देऽपि ग्राम्यतास्त्येव सा नभ्येतरकीर्त्तनात् ।
यथा यकारादिपदं रत्युत्पत्तिनिरूपणे ॥ ६५ ॥
पदसन्धानहत्त्या वा वाक्यार्थत्वेन वा पुनः ।
दुष्प्रतीतिकरं ग्राम्य यथा या भवतः प्रिया ॥६६॥

ग्राम्यताया शब्दगतत्वमपि दर्शयति शब्देऽपीति । शब्देऽपि ग्राम्यता अस्ति एव. सा नभ्य साधु तदितरम् अनभ्य ग्रामीणहालिकादिप्रयोज्य वचन तस्य कीर्त्तनात् विदग्धजनैः इति शेषः कथनात् भवतीति शेष । यथा रत्युत्पत्तिनिरूपणे यकारादिपद यकार आदिर्यस्य तत् पद यभ मैथुने इत्यस्मात् निष्पन्न पद यम्यनादिकमित्यर्थ । तादृशपदप्रयोक्तु ग्राम्यतया उपहसनीयत्व श्रोतुश्च लज्जितत्वमेव जायते नुतरा रसास्वादस्य तिरोहितत्वात् न अत्र माधुर्य्यगुणप्रसर इति भाव ॥ ६५ ॥

अश्लीलताया ग्राम्यतायामन्तर्भावमाह पदेति । पदाना सन्धान सम्बन्धो यस्मिन् तत् पदसन्धान वाक्यमङ्गार्तति पाठे स एवार्थः । तद्दृत्या तद्गतत्वेन वा अथवा वाक्यार्थत्वेन तदर्थगतत्वेन वा इत्यर्थः । दुर्दुष्टा प्रतीतिः दुष्प्रतीति तत्करं लज्जा जुगुप्साऽमङ्गलादिव्यञ्जकम् अश्लीलत्वमित्यर्थ अपि ग्राम्य ग्राम्यतायामन्तर्भूत तदपि माधुर्य्यव्याघातकमिति भाव यथा या भवत. प्रियेति अत्र या भवत इत्यत्र यामः मैथुने इत्यस्मात् घञि निष्पन्न स विद्यते अस्येति यामवान् तस्येति प्रतीतौ व्रीडाव्यञ्जकत्वात् वाक्यमिदमश्लीलत्वदोषदूषितम् अतोऽत्र न माधुर्य्यसङ्गतिरिति भाव ॥ ६६ ॥

खरं प्रहृत्य विश्रान्तः पुरुषो वीर्य्यवानिति ।
एवमादि न शंसन्ति मार्गयोरुभयोरपि ॥ ६७ ॥
भगिनी भगवत्यादि सर्वत्रैवानुमन्यते ।
विभक्तामिति माधुर्य्यमुच्यते सुकुमारता ॥ ६८ ॥

वाक्यगतामश्लीलतामुक्त्वा तदर्थगतां निर्दिशति खरमिति । कश्चित् वीर्यवान् पराक्रमशाली 'पुरुषः खरम् अतितीक्ष्णं यथा तथा प्रहृत्य गत्वेति शेषः विश्रान्त इति प्रकरणसङ्गतोऽर्थः, परं वीर्यवान् शुक्रञ्च कश्चित् पुरुष खर गाढ यथा तथा प्रहृत्य मेथुन कृत्वा विश्रान्त इत्यपि असभ्यार्थो वक्त्रादिशब्दव्यङ्ग्येन प्रतीयते । न च अत्र वाक्यगतमश्लीलत्वमिति मत्वा शब्दपरिवृत्तिसहत्वासहत्वाभ्यां तद्व्यवस्थापनात् तथाहि यत्र शब्दपरिवृत्तावपि तदर्थप्रतीतिस्तत्र न शब्दगतत्व यत्र तु तथात्वे न तदर्थसम्भवस्तत्रैव शब्दगतनियम, अत्र तु खरमित्यादिवाक्यस्थपदानाम् एकार्थमात्रप्रतिपादकाना प्रकरणबलात् प्रथमेऽर्थे प्रतीतेऽपि वक्त्रादिवैशिष्ट्यात् अपरोऽपि अर्थो व्यञ्जनया वृत्त्या प्रतीयते । तथाचोक्त दर्पणकारेण यथा, अनेकार्थस्य शब्दस्य प्रयोगावैर्नियन्त्रिते । एकत्रार्थेऽन्यधीहेतुर्व्यञ्जना साभिधाश्रया ॥ इति । न च अत्र वीर्य्यपद विभिन्नयोर्बलशुक्रयोर्वाचकमिति वाच्य बलस्य शुक्रजत्वेन एकमात्रपदार्थत्वात् इति । एवमादि दोषदूषित काव्यम् उभयोरपि गौडवैदर्भयोर्मार्गयो न शंसन्ति न आद्रियन्ते विद्वास इति शेष ॥ ६७ ॥

ग्राम्यताया प्रतिप्रसवमाह भगिनीति । भगिनी भगवती आदिपदग्राह्य योनिलिङ्गादिकञ्च सर्वत्र काव्येषु व्यवहारेषु च

अनिष्ठुराक्षरप्रायं सुकुमारमिहेष्यते ।
बन्धशैथिल्यदोषस्तु दर्शितः सर्वकोमले ॥ ६८ ॥

अनुमन्यते अदुष्टतया लोकैः अङ्गीक्रियते तत्तच्छब्दप्रयोगे दोषानुसन्धानविरहेण साधारणानां वैरस्यानुदयात् इति भाव । उक्तञ्च, सवीतस्य हि लोकेऽस्मिन्न दोषान्वेषणं क्षमम् । शिवलिङ्गस्य संस्थाने कस्यासभ्यत्वभावनम् ॥ इति । सवीतं हि अदुष्टतया सर्वजनव्यवहृतम् । अन्यच्च, ग्राम्य घृणावदश्लीलामङ्गलार्थं यदीरितम् । तत् संवीतेषु गुप्तेषु लक्षितेषु न दुष्यति ॥ इति । गुप्तेषु असभ्यार्थेषु असिद्धेषु अपि भावेन तदर्थबोधकेषु यथा. करिहस्तेन सम्बाधे प्रविश्यान्तर्विलोडिते । उपसर्पन् ध्वजः पुसः साधनान्तर्विराजते ॥ इत्यत्र सम्बाधपदेन सङ्कटार्थप्रसिद्धेनापि भावेन अप्रसिद्धस्य स्त्रीलिङ्गस्य बोधनम् । लक्षितेषु लक्षणया असभ्यार्थप्रतिपादकेषु यथा जन्मभूमिपदेन कुत्रचित् भावेन योनिर्बोधनम् । इति उक्तप्रकारेण माधुर्य्यं विभक्तं विभज्य दर्शितम् अधुना सुकुमारता उच्यते ॥ ६८ ॥

अनिष्ठुराणि अपरुषाणि अक्षराणि प्रायो बाहुल्येन यत्र तादृशं पद्य सुकुमार सौकुमार्य्यगुणयुक्तमित्यर्थः प्राय पदेन अन्तरान्तरा परुषाक्षराण्यपि निवेशनीयानीति सूचितम् । तुशब्दोऽत्र हेत्वाचकः । यतः सर्वकोमले केवलसुकुमाराक्षरप्रयोगे बन्धस्य रचनायाः शैथिल्यदोषः श्लथत्वरूपदोष अगाढता इति यावत् दर्शितः पूर्वोक्ते मयैव मालतीमाललोलालि कलिता इत्य. इति शेषः । तथाच कोमलाक्षराणां बन्धनां मध्ये परुषाक्षरविन्यासेन बन्धस्य गाढ़तया यत् सहृदयहृद्यत्वं तदेव सौकुमार्य्यपदवाच्य माणिक्यखचितमुक्तादामवत् इति सुधीभिर्विभाव्यम् ॥ ६८ ॥

मण्डलीकृत्य बर्हाणि कण्ठैर्मधुरगीतिभिः ।
कलापिनः प्रनृत्यन्ति काले जीमूतमालिनि ॥७०॥
इत्यनर्जित एवार्थो नालङ्कारोऽपि तादृशः ।
सुकुमारतयैवेदमलङ्कारोहति मतां मनः ॥ ७१ ॥

अस्य उदाहरणमाह मण्डलीति । कलापिन मयूरा जीमूतमालिनि काले वर्षासु बर्हाणि पुच्छानि मण्डलीकृत्य निर्माय मधुरगीतिभि मधुरगीतिमदृशस्वनै इत्यर्थ कण्ठै उपलक्षिता सन्त विशेषणे तृतीया। प्रनृत्यन्ति। अत्र मकारककारादीना कोमलाक्षराणा मध्ये डकार रकारादि युक्ताक्षराणा परुषाणा निवेशात् रचनेय सौकुमार्यमाश्रयति। अत्र च कलापिषु नर्तकव्यवहारसमारोपात् समासोक्तिरलङ्कार । तदुक्त दर्पणकारेण, समासोक्ति समैर्यत्र कार्यलिङ्गविशेषण । व्यवहारसमारोप प्रस्तुतेऽन्यस्य वस्तुन ॥ इति ॥७०॥

उक्तस्यसौकुमार्यस्य गुणत्वमनङ्गीकुर्वतो नव्यान् प्रत्याह इत्यनेति । इति उक्तविध अर्थ मण्डलीकृत्येति पद्यप्रतिपाद्य इत्यर्थ न ऊर्जित न तेजस्वल एव न अतिमनोरम इत्यर्थ, अलङ्कार्य समासोक्तिरूप तादृग वैचित्र्यजनक न, तथापि एतत पद्य सुकुमारतया तादृगसौकुमार्यगुणयुक्ताक्षरविन्यासेन मनो सामाजिकाना न तु साधारणानामिति ध्वनि' मन: आरोहति आश्रयति मोहयतीति यावत्। अयं भाव' अर्थालङ्कारो हि अन्यविधौ पदार्थौ गुणस्तु न तथा, यत' अर्थस्य अलङ्कारस्य च बोधनात् पूर्वमेव गुणकृतवैशिष्ट्यं प्रतीयते गुणस्य विन्यासविशेषरूपत्वात्। उक्तञ्च, तया कवितया किं वा तया वनितया तया। पदविन्यासमात्रेण यया न क्रियते

दीप्तमित्यपरैर्भूम्ना क्लेशोद्यमपि वध्यते।
न्यक्षेण क्षयितः पक्षः क्षत्रियाणां क्षणादिति ॥७२॥
अर्थव्यक्तिरनेयत्वमर्थस्य हरिणोदृता।

मन. ॥ इति। असति गुणवैचित्र्ये अर्थालङ्कारो न शोभते अतएवोक्तं भोजराजेन. अलङ्कृतमपि श्रव्यं न काव्यं गुणवर्जितम्। अन्यच्च. यदि भवति वचश्चारु गुणेभ्यो वपुरिव यौवनवन्ध्यमङ्गनायाः। अपि जनदयितानि दुर्भगत्वं नियतमलङ्करणानि मन्वयन्ते इति ॥ ७१ ॥

रसविशेषे सौकुमार्यमनङ्गीकुर्वता मतं दर्शयति दीप्तमिति। अपरैः गौडीयकविभि वीरादिषु रसेषु दीप्तिरौज्ज्वल्यं तयुक्तं तद्व्यञ्जकमित्यर्थं दीप्त समुत्तेजनमिति यावत् पद क्लेशेन कष्टेन उद्यम् उच्चार्यमपि भूम्ना बाहुल्येन वध्यते विरच्यते। गौडीया हि वीररसादिध्वनौ परुषाक्षरविन्यासेन तद्व्यञ्जनस्य हृद्यतया सौकुमार्यं न अङ्गीकुर्वते इति भाव। यथा न्यक्षेण नेत्रहीनेन अन्धेनेत्यर्थ. धृतराष्ट्रेण क्षणात् अल्पेनैव कालेन क्षत्रियाणां पक्ष समूह. समग्रक्षत्रियकुलमित्यर्थ क्षयितः नाशित. कुरुक्षेत्रयुद्धे इति शेषः। अत्र वीररसवर्णनायां तादृशश्रुतिकटुपरुषवर्णप्रयोग एव चमत्कारमातनोतीत्येवंविधे प्रयोगे सौकुमार्यत्यागो गुण एवेति ध्येयम्। वैदर्भास्तु ईदृशेऽपि प्रयोगे सौकुमार्यमाद्रियन्ते यथा क्षतमनुमत दृष्टं वा यैरिद गुरुपातक मनुजपशुभिः निर्मर्यादै. भवद्भिरुदायुधैः। नरकरिपुणा सार्द्धं तेषां समौमकिरीटिनामयमहमसृङ्मासैः करोमि दिशां वलिमिति। अत्र रौद्रेऽपि रसे न अतिपरुषाक्षराणि विन्यस्तानि ॥ ७२ ॥

भूः खुरच्छुन्नागाग्रलोहितादुदधेरिति ॥ ७३ ॥
महीं महावराहेण लोहितादुद्धृतोदधेः ।
इतीयत्येव निर्दिष्टे नेयत्वमुरगासृजः ॥ ७४ ॥
नेदृशं वक्त्र मन्यन्ते मार्गयोरुभयोरपि ।

अर्थव्यक्ति नाम गुणं मोदाहरणमाह अर्थव्यक्तिरिति । अर्थस्य अनेकलम् अध्याहाराद्यिकष्टकल्पनामन्तरेण प्रयुक्तपदेभ्य एवोपस्थितिरित्यर्थः अर्थव्यक्तिः । उक्तञ्च क्रमदीश्वरेण, यावदाद्याभिधान यत्तदर्थव्यक्तिलक्षणम् इति । इयञ्च शब्दमात्रगा अर्थगायास्तु स्वभावोक्त्यलङ्कारेण परिगृहीतत्वात् न पृथगुक्तिः । तदुक्तं दर्पणकारेण, अर्थव्यक्तिः स्वभावोक्त्यलङ्कारेण तथा पुनः इति । अपरे तु पदाना झटित्यर्थबोधकत्वं शाब्दीमर्थव्यक्तिमाहुः । यदुक्तम्, अर्थव्यक्ति. पदाना हि झटित्यर्थसमर्पणम् इति । यथा हरिणा वराहरूपिणा विष्णुना खुरैः स्वीयैः इति भाव छुन्नानां नागानां पन्नगानां रसातलवासिनाम् अग्रभिः शोणितैः लोहितात् रक्तात् उदधेः समुद्रात् भू पृथ्वी उद्धृता ऊर्ध्वं नीता । अत्र यावन्त एव शब्दास्तावतामेव अर्थाः विना कष्टकल्पना प्रतीयन्ते इति ॥ ७३ ॥

अनेयत्वमर्थव्यक्तिमुक्त्वा तद्विपरीत नेयत्व दर्शयति महीति । महावराहेण उरगासृजः पन्नगशोणितात् हेतोः लोहितात् उदधेः महीं उद्धृता, इतीयति एवंप्रकारे निर्दिष्टे प्रयुक्ते सति नेयत्व भवति । तथाहि उरगासृज इत्युक्ते कथमिति हेतोः आकाङ्क्षणीयत्वात् खुरच्छुन्नेत्यशस्य अध्याहार कर्त्तव्यः अन्यथा अर्थस्य स्फुटता न स्यात् इति भावः ॥ ७४ ॥

अत्र उभयोरपि मार्गयोः वैमत्यं दर्शयति नेति । उभयो-

न हि प्रतीतिः सुभगा शब्दन्यायविलङ्घिनी ॥७५॥
उत्कर्षवान् गुणः कश्चित् यस्मिन्नुक्ते प्रतीयते ।
तदुदाराह्वयं तेन सनाथा काव्यपद्धतिः ॥ ७६ ॥
अर्थिनां कृपणा दृष्टिस्त्वन्मुखे पतिता सकृत् ।
तदवस्था पुनर्देव ! नान्यस्य सुखमीक्षते ॥ ७७ ॥

रपि वैदर्भीगौड्योः मार्गयोः रीतिविशेषयोः कवय इति शेषः ईदृशं पूर्वोक्तरूप नैयत्ययुक्त वाक्य न बहु मन्यन्ते न आद्रियन्ते। हि यतः शब्दन्याय शब्दबोधनियमः तस्य विलङ्घिनी व्यतिक्रमसाधनी प्रतीतिः अध्याहारादिकष्टकल्पनेन ज्ञानमित्यर्थः न सुभगा न साध्वीत्यर्थः ॥ ७५ ॥

औदार्य्यं गुण निरूपयति उत्कर्षेति। यस्मिन् वाक्ये उक्ते कथिते सति कश्चित् उत्कर्षवान् वर्णनीयस्य विषयस्य उत्कर्षप्रतिपादको लोकोत्तरचमत्कारकः गुणः धर्मविशेष प्रतीयते बुध्यते तत् उदाराह्वयम्। औदार्य्यगुणयुक्त तेन उदारत्वगुणेन काव्यपद्धति गौडवैदर्भीया काव्यरीति सनाथा पूर्णा उत्कर्षवतीति भावः। ईदृश्च अर्थगतम्। शब्दगतन्तु विकटत्वलक्षण विकटत्वञ्च पदानां नृत्यत्प्रायत्वं यथा स्वचरणविनिविष्टै नूपुरैः नर्त्तकीना झणिति रणितमासीत् तत्र चित्रं कलञ्च इति विश्वनाथः ॥ ७६ ॥

उदारत्वस्य उदाहरण दर्शयति अर्थिनामिति। हे देव ! अर्थिना कृपणा दीना दृष्टिः त्वन्मुखे असकृत् वारवारं पतिता पुनः किन्तु तदवस्था दीनेत्यर्थः अन्यस्य सुख न ईक्षते। एतेन राज्ञ एतादृशी प्रभूतदानशक्तिर्यत् दात्रन्तरोपसर्पणमर्थिनां

इति त्यागस्य वाक्येऽस्मिन्नुत्कर्षः साधु लक्ष्यते ।
अनेनैव पथान्यत्र समानन्यायमूह्यताम् ॥ ७८ ॥
आर्ष्यैर्विशेषणैर्युक्तमुदारं कैश्चिदिष्यते ।
यथा लीलाम्बुजक्रीड़ासरोहेमाङ्गदादयः ॥ ७९ ॥

नास्तीति सूचित महृदयानाम् अतिशयेन चमत्कारीति हृदय-मिति ॥ ७७ ॥

इति उक्तरूपे त्यागस्य दानस्य अस्मिन् वाक्ये उत्कर्षः राजकीयदानस्य इति शेषः साधु सम्यक् लक्ष्यते प्रतीयते । साधु इत्यत्र खल्विति पाठे खलु निश्चितमित्यर्थः । अन्यत्रापि गद्ये पद्ये वर्णनेषु एव यथा लीला समान महृद न्याय नियमः यत्र तत् यथा तथा ऊह्यताम् विभाव्यताम् एताम् एव रीतिमव-लम्ब्य पद्य विरच्यताम्इत्यर्थः ॥ ७८ ॥

मतभेद दर्शयति आर्ष्यैरिति । आर्ष्यं विशेषस्य उत्कर्षा-धायकत्वेन सामाजिकमनोरमै विशेषणै बहुवचनात् एकस्य द्वयो वा विशेषणयो सद्भावे न अय गुण इति सूचितम्। युक्त समन्वित वाक्यम् उदारम् औदार्यगुणयुक्त कैश्चित् कविभिरिष्यते स्वमते तु अपुष्टार्थतादोषपरिहारेण परिकरालङ्कारस्य कीर्त्तनेन च अस्य ग्रहणात् न पृथगुक्तिरिति भाव । यथा लीलाम्बुज-क्रीडासरो हेमाङ्गदादय । लीलाम्बुज इत्यत्र लीलेति विशेष-णेन तदुपयोगिनो वर्णाकारसौरभ्यातिशयस्य, क्रीडासर इति कथिते तत्र क्रीडार्थकजलकमलकैरवादिजनितशोभादिकस्य तथा हेमाङ्गदेत्युक्ते अङ्गदस्य हेमनिर्मितत्वेन सुदृश्यत्वादिकस्य प्रतीति सहृदयमनोहारिणीति विभावनीया ॥ ७९ ॥

ओजः समासभूयस्त्वमेतद् गद्यस्य जीवितम् ।
पद्येऽप्यदाक्षिणात्यानामिदमेकं परायणम् ॥ ८० ॥
तत् गुरूणां लघूनाञ्च बाहुल्यात्स्वल्पतासिश्रणैः ।
उच्चावचप्रकारं तत् दृश्यमाख्यायिकादिषु ॥८१॥

ओजोगुणं निरूपयति ओज इति । समास. इयोर्बहूना वा पदानाम् एकीकरणं तस्य भूयस्त्वं बाहुल्यं दीर्घता इत्यर्थः बहुषु पदेषु समास इति यावत् ओजः एतत् गद्यस्य पूर्वोक्तस्य प्रबन्धविशेषस्य जीवितं प्राणभूतम् । इदञ्च उभयोरपि मार्गयो सामान्यम् । अदाक्षिणात्यानां दाक्षिणात्यव्यतिरिक्तानां गौडानाम् इत्यर्थः पद्येऽपि इदम् एकम् अद्वितीयं परायणं परमा गतिः तेषां बन्धगाढताप्रियत्वादिति भावः । इदञ्च शब्दगतं समासस्य शब्दसावगतत्वात् । केचित्तु ओजः प्रौढिः सा च पञ्चविधा यथा पदार्थे वाक्यरचनं वाक्यार्थे च पदाभिधा । प्रौढिर्व्यासससमासौ च साभिप्रायत्वमस्य चेति । तत्र पदार्थे वाक्यरचनं यथा चन्द्र इत्येकस्मिन् पदार्थे वक्तव्ये अत्रेनयन समुत्थ ज्योतिरिति वाक्यरचनम् । वाक्यार्थे पदाभिधा यथा निदाघशीतलहिमकालोष्णशरीरा सुकुमारी वरयोषितिति वाक्यार्थे वक्तव्ये वरवर्णिनीति पदाभिधानम् । एवमेकस्य वाक्यार्थस्य किञ्चिद्विशेषाभिधित्सया बहुवाक्यैरभिधान व्यास बहुवाक्यप्रतिपाद्यस्य एकवाक्येन प्रतिपादन समास. एतत् चतुर्विधं प्रौढिरूपमोजः शब्दगुण. साभिप्रायत्वं अर्थगुण इत्याहुः ॥ ८० ॥

तत् समानभूयस्त्वरूपम् ओज गुरूणां सन्नाक्षराणां लघूनां अल्पाक्षराणाञ्च बाहुल्येन क्वचित् अल्पत्वेन

अस्तमस्तकपर्य्यस्तसमस्तार्कांशुसंस्तरा ।
पीनस्तनस्थितातास्रकम्रवस्त्रेव वारुणी ॥ ८२ ॥
इति पद्येऽपि पौरस्त्या वध्नन्त्योजस्विनीर्गिरः ।
अन्ये त्वनाकुलं हृद्यमिच्छन्त्योजो गिरां यथा ॥८३॥

क्वचित् मिश्रणेन च क्वचित् उच्चावचप्रकारं बहुविध तत् आख्यायिकादिषु गद्यग्रन्थेषु दृश्य लक्षणीयम्। गौडीयानान्तु पद्यग्रन्थेऽपि सूर्य्यगतकादौ समासबाहुल्य पूर्वमुक्तमवधेयम् इति ॥ ८१ ॥

गौडाभिमतं पद्येऽपि समासभूयस्त्वप्रकार दर्शयति अस्तमिति। अस्तमस्तके अस्ताचलशृङ्गे पर्य्यस्ता: पतिता: समस्ता ये अर्कांशव: सूर्य्यकिरणा: तै सस्तर: आच्छादन यस्या तादृशी वारुणी वरुणाधिष्ठिता दिगिति शेष. पीनस्तने स्थितम् आतास्रम् ईषत् लोहित सायकालीनसौरकिरणस्य तथात्वात् इति भाव कम्र कमनीय वस्त्रं यस्या तथाभूता कामिनीव राजते इति शेष:। अत्र द्वयो' अप्यर्थयो: समासबाहुल्यम् ॥ ८२ ॥

पौरस्त्या गौडवासिन' इति पूर्वोक्तप्रकारै पद्येऽपि ओजस्विनी समासबहुला गिर. बध्नन्ति। अन्ये तु पण्डिता: गिरा वाचाम् अनाकुलम् अत्र .भावनिर्देश, अनाकुलत्वमित्यर्थ: दीर्घसमासादीना झटिति प्रतीतेरन्तरायत्वात् तद्राहित्यरूपमिति यावत् हृद्य मद्धृदयमनोहारि च ओज इच्छन्ति तथा च समासस्य दीर्घत्वम् अल्पत्वम् अभावो वा तु श्रोतृणा बुद्धेरनाकुलत्वसम्पादनेन तन्मनोहारित्वम् ओज.पदार्थ इति निष्कर्ष ॥ ८३ ॥

पयोधरतटोत्सङ्गलग्नसन्ध्यातपांशुका ।
कस्य कामातुरं चेतो वारुणी न करिष्यति ॥८४॥
कान्तं सर्वजगत्कान्तं लौकिकार्थानतिक्रमात् ।
तच्च वार्त्ताभिधानेषु वर्णनास्वपि दृश्यते ॥ ८५ ॥

अत्र उदाहरति यथेति । पयोधरो मेघ एव स्तन: स एव तट: प्रदेश: तस्य उत्सङ्गे लग्नं सन्ध्यातप: सायंकालीनसौर-किरण एव अंशुकं यस्या: तादृशी वारुणी कस्य चेत: कामातुरं न करिष्यति इत्यन्वय: । अत्र पूर्वार्द्धे समासबाहुल्यमपि पूर्व-वत् न श्रोत्रदुष्टिमाकलयति परं श्रोत्रमनोहरत्वेन चमत्का-रातिशयमुग्धां करोतीति विभावनीयम् ॥ ८४ ॥

कान्तिगुणं निरूपयति कान्तमिति । लौकिकस्य लोक-सिद्धस्य अर्थस्य अनतिक्रमात् अत्यागात् तन्मात्रस्यैव वर्णनात् इत्यर्थ: सर्वजगतां कान्तं साधारणमनोरममित्यर्थ: यद्यं कान्तं कान्तिगुणविशिष्टं तथाच सहृदयमनोरञ्जकलोकमिद्दवस्तु-वर्णनमेव कान्तिगुण इति । उक्तञ्च क्रमदीश्वरेण यथा, वर्ण-नात्युक्तिशून्या या सा कान्तिरभिधीयते इति । इयमर्थगा विना अर्थानुसन्धानमस्या: प्रतीतिविरहात् । तच्च कान्तिमत् वाक्यं वार्त्ता अनामयप्रियालाप: अनामयप्रियालापो वर्त्तिर्वार्त्ता च कथ्यते इति वचनात् तस्या अभिधानेषु कथनेषु तथा वर्ण-नासु वस्तुस्वरूपमात्रनिरूपणेषु दृश्यते अनामयप्रियालापेषु वर्णनासु च यथावत् सत्यनिरूपणस्यैव औचित्यात् अयथावर्णने लौकिकव्यवहारविसंवाद: स्यादिति भाव । केचित्तु वार्त्ताभि-धानेषु इतिहासवर्णनेषु, इतिहासानां यथावद्वर्णस्य एव औ-चित्यात् अयथावर्णने असत्यताप्रतिभासनेन विनेयानां प्रहत्य-

गृहाणि नाम तान्येव तपोराशिर्भवादृशः ।
सम्भावयति यान्येव पावनैः पादरांशुभिः ॥८६॥
अनयोरनवद्याङ्गि ! स्तनयोर्जृम्भमाणयोः ।
अवकाशो न पर्य्याप्तस्तव बाहुलतान्तरे ॥ ८७ ॥
इति सम्भाव्यमेवैतत् विशेषाख्यानसंस्कृतम् ।
कान्त भवति सर्वस्य लोकयात्रानुवर्त्तिनः ॥ ८८ ॥

सम्भवात् प्रशस्यस्य रामादिवत् प्रवर्त्तितव्य न रावणादिवत् इत्यपदेशपर्य्यवसायित्वानुपपत्तेरित्याह ॥ ८५ ॥

वार्त्ताभिधाने कान्तिं दर्शयति गृहाणीति । तानि एव गृहाणि गृहपदवाच्यानि प्रशंसनीयानि गृहाणि इत्यर्थः, तपोराशिः भवादृशः पावनैः पादपांशुभिः चरणरजोभिः यानि सम्भावयति सम्बोधयति । अत्र गृहपदेन लक्षणया प्रशस्तगृह महात्माजनपदसम्पर्कण च स्थानस्य प्राशस्त्यञ्च लोकसिद्धमेव प्रतीयत इति अवधेयम् ॥ ८६ ॥

वर्णनाया कान्तिं दर्शयति अनयोरिति । हे अनवद्याङ्गि सुन्दरि । जृम्भमाणयो वर्द्धमानयोः अनयोः स्तनयो तव बाहुलतान्तरे वक्षसि अवकाशः स्थानं न पर्य्याप्तं न प्रभूतं स्तनयोरतिपीनोन्नततया वक्षसश्च क्षुद्रतया यथेष्टस्थानालाभात् इति भावः । अत्र स्तनयोरतिपीनत्ववर्णनं लोकसिद्धमिति विभावनीयम् ॥ ८७ ॥

उक्तयोः पद्ययोः कान्तिं सङ्घटयति इतीति । इति पूर्वोक्त-श्लोकद्वयप्रतिपाद्यं वस्तु सम्भाव्यमेव भवितुमर्हति एव न तु प्राढोक्त्या कल्पनीयम् । एतच्च विशेषाख्यानेन विशेषस्य

लोकातीत इवात्यर्थमध्यारोप्य विवक्षितः ।
योऽर्थस्तेनातितुष्यन्ति विदग्धा नेतरे जनाः ॥८९॥
देवधिष्ण्यमिवाराध्यमद्यप्रभृति नो गृहम् ।
युष्मत्पादरजःपातधौतनिःशेषकिल्बिषम् ॥ ९० ॥

उत्कर्षस्य आख्यानेन कथनेन संस्कृत शोभितं सत् लोकयात्रानुवर्त्तिन लौकिकाचारपरायणस्य सर्वस्य जनस्य कान्त मनोरम भवति । कान्तत्वमेव गुणपदार्थं न तु लोकसिद्धवस्तुवर्णनमात्र कान्ति तयाले सूर्योऽस्त याति गौ शेते इत्यादेरपि कान्तिमत्त्वात् काव्यत्वापत्ति' गुणालङ्कारादिमत्त्वस्यैव काव्यत्वादिति सुधीभिर्विभाव्यम् ॥ ८८ ॥

निरुक्तकान्तौ गौडाना वैमत्यमाह लोकेति । इवशब्दोऽत्र अप्ययंक । अत्यर्थम् अतिशयेन लोकातीतः अलौकिकः अपि योऽत्यर्थ. अध्यारोप्य कल्पयित्वा विवक्षितः वक्तुमिच्छया प्रयुक्त इत्यर्थ. तेन विदग्धा. सहृदयाभिमानिन इति मौल्लटनोक्ति । गौडीया इत्यर्थ अतितुष्यन्ति तेषा प्रौढोक्तिप्रियत्वात् इति भाव' । इतरे जना' वैदर्भीया' कवय' न तेषा यथावद्वर्णनप्रियत्वादिति भाव' । सुतरामुक्तलक्षणा कान्तिर्गौडे न अङ्गीक्रियते इति फलितार्थः ॥ ८९ ॥

वार्त्तायां निरुक्तकान्तेर्वैपरीत्यं वर्णयति । देवेति अद्यप्रभृति नोऽस्माक गृह युष्माक पादरज.पातेन चरणरेणुपातेन धौतं नि शेष समस्त किल्बिष पातक यस्य तथाभूत सत् देवधिष्ण्यं देवतास्थानमिव आराध्यं सेवनीयं भविष्यति इति शेषः । अत्र महात्मनां चरणरज.स्पर्शे गृहस्य पावनत्वं लोक-

अल्पं निर्मितमाकाशमनालोच्यैव वेधसा ।
इदमेवंविधं भावि भवत्याः स्तनजृम्भणम् ॥ ९१ ॥
इदमत्युक्तिरित्युक्तमेतत् गौड़ोपलालितम् ।
प्रस्थानं प्राक् प्रणीतन्तु सारमन्यस्य वर्त्मनः ॥९२॥
अन्यधर्मस्ततोऽन्यत्र लोकसीमानुरोधिना ।
सम्यगाधीयते यत्र स समाधिः स्मृतो यथा ॥९३॥

मिदमपि देवतावामस्येव आराध्यकीर्त्तनमारोपितमिति कान्ति. [गर्भयोऽवगन्तव्य ॥ ९० ॥

वर्णनायां निरुक्तकान्तेर्वैपरीत्यं वर्णयति अल्पमिति। भवत्या स्तनयोर्जृम्भण वृद्धि एवंविधं व्यापकमित्यर्थः भावि भविष्यति इदम् अनालोच्यैव अविचार्यैव वेधसा विधात्रा आकाशम् अल्प निर्मितम्। अत्र विधातुरनालोचनपूर्विका आकाशनिर्मितिरतिशयोक्तिर्विजृम्भितैव न तु लोकप्रसिद्धेति विभाव्यम् ॥ ९१ ॥

इदम् ईदृग् काव्यम् अत्युक्तिः इति उक्तं कथितं कविभिः इति शेषः। उक्तञ्च भोजराजेन यथा, लौकिकार्थमतिक्रम्य प्रस्थान यत्र वर्ण्यते। तदत्युक्तिरिति प्रोक्त गौडानां मनसो मुदे॥ इति। एतत् पदः गौडैः कविभिः उपलालित हृद्यतया गृहीतम्। प्राक् पूर्वं कथितं प्रस्थानं लोकसिद्धवस्तुवर्णनरूपं प्रकृष्टं स्थान स्थितिर्मर्य्यादा इति यावत् अन्यस्य वर्त्मनः वैदर्भीयस्य मार्गस्य सार मनोहरम्। अयमेव गौडवैदर्भयोर्भेद इति भावः ॥ ९२ ॥

समाधि सोदाहरण निरूपयति अन्यधर्म इत्यादि। लोक-

कुमुदानि निमीलन्ति कमलान्युन्मिषन्ति च ।
इति नेवक्रियाभ्यासाल्लब्धा तदाचिनी श्रुति: ॥९४॥

सीमानुरोधिना लोकस्थितिमनुवर्त्तमानेन जनेन अन्यस्य अपरस्य अप्रकृतस्य यो धर्म. गुणक्रियादि. ततः तस्मात् अन्यत्र तद्भिन्ने प्रकृते इत्यर्थं यत्रेति अव्यय यत् इत्यर्थः सम्यक् आधीयते आरोप्यते स समाधि सम्यगाधानरूपत्वात् तदाख्यो गुण इत्यन्वय . तथाच प्रकृते वस्तुनि अप्रकृतस्य धर्मारोपो लोकसिद्ध सहृदयचमत्कारको गुण समाधिरिति फलितार्थ । धर्म इत्यनेन धर्मिण: समारोपे न अय गुणस्तवातिशयोक्तिरलङ्कार एवेति सूच्यते ॥ ९३ ॥

यथा कुमुदानि उत्फुल्लानि निमीलन्ति कमलानि उन्मिषन्ति विकाशन्ते च प्रभातवर्णनमिदं दिवाकुमुदनिमीलनस्य कमलोन्मेषस्य च कविसमयप्रसिद्धत्वात् । अत्र निमीलनोन्मेषौ अप्रकृतस्य नेतस्य धर्मौ कुमुदकमलयो: सङ्कोचविकाशताद्यात्मना आरोपितौ सादृश्यातिशयमहिम्ना लोकसिद्धौ च । एतदेव स्वयं निर्दिशति इतीति । इति उक्ताभ्यां नेवक्रियाभ्यां निमीलनोन्मेषाभ्यां सह अध्यासात् अभिन्नत्वे इति शेष: सङ्कोचविकाशाभ्यां तदाचिनी तयो. निमीलनोन्मेषयो' वाचिनी प्रतिपादिका श्रुति. निमीलन्तीत्यादि तत्तत्क्रियावाचक: शब्द इत्यर्थः लब्धा प्राप्ता । अयञ्च अर्थगत एव प्रकृतेऽर्थे अप्रकृतस्यार्थस्यैव आरोपादिति । अन्ये तु समाधिरयं दृष्टिसंभवोऽर्थगुण एव स च द्विविध: अयोनिरन्यच्छायायोनिश्च । तत्र अयोनिरयं कविप्रसिद्धिमन्तरेणापि स्वकीयोत्कर्षाधायी यथोत्फुल्लत्पङ्कजकुवलयप्रस्पर्धिनाक्षिणी । अन्यच्छाय-

निष्ठूतोद्गीर्णवान्तादिगौणवृत्ति व्यपाश्रयम्।
अतिसुन्दरमन्यत्र ग्राम्यकक्षां विगाहते ॥ ९५ ॥

केन सह नारङ्गकस्य श्रीपर्व्यभाव केनापि न प्रदर्शित'। केवल स्वबुद्ध्या उद्भावित। अन्यच्छायायोनि. कविसमय-प्रसिद्धोऽपि किञ्चित् वैचित्र्यभावेन रचित'। यथा निजनयन-प्रतिबिम्बैरम्बुनि बहुश' प्रतारिता कापि। नीलोत्पलेऽपि निमृगति करमर्पयितु कुसुमलावो इति अत्र नयननीलोत्-पलयो साम्य कविप्रसिद्धमपि किञ्चिद्वैचित्र्येण विरचितम् इत्याहु। अन्यैस्तु गुणगुणोऽपि समाधिरुक्त' स च आरोहाव-रोहक्रमरूप एव आरोहस्तु अनुप्रासादिना वाचामुत्कर्ष:, अव-रोहस्तदभावादपकर्ष तयो' क्रम वैरस्यानावहो विन्यास: यथा नच्चद्भुजभ्रमितचण्डगदाभिघातसचूर्णितोरुयुगलस्य सुयो-धनस्य। स्यानावनद्धघनशोणितशोणपाणिरुत्तसयिष्यति कचा-स्तव देवि। भीम. ॥ इत्यत्र पादत्रये बन्धस्य गाढता, चतुर्थ पादे तु अपकर्ष. सोऽपि तीव्रप्रयत्नोच्चार्यतया न वैरस्यमावह-तीति समाहितम् ॥ ९४ ॥

समाधि गौणलक्षणाक्रान्त दर्शयति निष्ठूतेति। निष्ठूतम् उद्गीर्णं वान्तम् इत्यादिपद गौणी या वृत्तिर्लक्षणा गुणयोगात् इति भाव', तैव व्यपाश्रय: विशिष्ट: आश्रयो यस्य तत् मुख्यार्थ-मवृणेऽर्थे प्रयुक्तमित्यर्थ' अतिसुन्दरम् अतिमनोरम तदेव समाधिस्थानमिति भाव'। अन्यत्र तदभावे गौणवृत्त्याश्रया-भावे इत्यर्थ ग्राम्यकक्षा ग्राम्यतादोषकालुष्य विगाहते लभते, तथाच मुख्यार्थे प्रयुक्त निष्ठूतादिपद ग्राम्यमेव लाक्षणिकेऽर्थे तु तादात्म्यारोपात् गुणवदिति फलितार्थ ॥ ९५ ॥

पद्मान्यर्कांशुनिष्ठूताः पीत्वा पावकविप्रुषः ।
भूयो वसन्तीव गुणैरुद्गीर्णारुणरेणुभिः ॥ ९६ ॥
इति हृद्यमहृद्यन्तु निष्ठीवति वधूरिति ।
युगपन्नैकधर्माणामध्यासश्च स्मृतो यथा ॥ ९७ ॥
गुरुगर्भभरक्लान्ताः स्तनन्त्यो मेघपङ्क्तयः ।

उदाहरणमुदाहरति पद्मानीति । पद्मानि अर्कांशुनिष्ठूता सूर्यमयूखनिक्षिप्ता पावकविप्रुषः अग्निस्फुलिङ्गान् पीत्वा उद्गीर्णा अरुणा रेणव. परागाः यैः तादृशैः मुखैः विशेषणे तृतीया । भूय पुन पुन वसन्तीव । सायंकालीनपवनाभङ्गेन स्खलत्परागाणां पद्मानां वर्णनमिदम् । अत्र निष्ठूतोद्गीर्णशब्दौ दैहिककफादिनिक्षेपे शक्तौ अपि सामान्यनिक्षेपरूपेऽर्थे लाक्षणिकौ सन्तौ सहृदयहृदयङ्गमतां प्राप्ताविति समाधिरव्याहत.। वसन्ति इवेत्युत्प्रेक्षायामपि न ग्राम्यता प्रत्युत समाधिगुणयोगात् गुण एवेति पूर्वोक्तगौणवृत्तिपदस्य उत्प्रेक्षोपलक्षकत्वमवगन्तव्यम् ॥ ९६ ॥

इति पूर्वोक्तं निष्ठूतादिपदं हृद्य गौणलक्षणयोगेन समाधिमत्त्वादिति भावः । वधू निष्ठीवति कफादिकं त्यजतीति वाच्यन्तु अहृद्यं ग्राम्यतादोषकलुषिततया सहृदयानाम् अप्रियम् । तत्र नैकधर्माणां बहूनाम् अन्यधर्माणां युगपत् समकालमेव न तु कालभेदेन अन्यत्र अध्यास. समारोपश्च स्मृत । तथाच एकस्य अन्यधर्मस्य अन्यस्मिन्, तथा बहूनामपि अन्यधर्माणामन्यत्र समारोप. समाधिरिति फलितार्थ ॥ ९७ ॥

उदाहरणमुदाहरति गुर्विति । गुरवः महत्यः स्थूलकलेवरा

अचलाधित्यकोत्सङ्गमिमाः समधिशेरते ॥ ९८ ॥
उत्सङ्गशयनं सख्याः स्तननं गौरवं क्लमः ।
इतीमे गर्भिणीधर्मा बहवोऽप्यत्र दर्शिताः ॥९९॥

उत्सङ्गं उभयतः समानम्। तथा गर्भस्य अन्तर्वर्त्तिजलपूरस्य चलतः कुक्षिस्थजीवस्य भरेण क्लान्ता सख्यः स्तनन्त्य गर्जतेरत्र चलतः क्लान्तिजनितशब्दविशेषः कुर्वत्य इमा मेघपङ्क्तय अचलस्य पर्वतस्य अधित्यका ऊर्ध्वभूमि, उपत्यकाद्रेरासन्ना भूमिरूर्ध्वमधित्यका इत्यमर । तस्या उत्सङ्ग मध्यभागम् अन्यत्र सख्या क्रोड समधिशेरते। अन्यत्र मेघपङ्क्तिधर्मेषु गर्भिणीधर्माणां बहुना युगपदध्यासात् वैचित्र्यातिशयः सङ्कटयसङ्कटयतीति भाव्यम् अलङ्कारस्य समासोक्तिरिति॥९८॥

उक्तश्लोके गर्भिणीधर्मं दर्शयति उत्सङ्गेति। अत्र उक्ते श्लोके सख्या उत्सङ्गशयन स्तनन गौरव क्लम इति उक्तरूपा इमे बहव गर्भिणीधर्मा. दर्शिता: आरोपितत्वेनेति शेषः। यदि च स्तनित गर्जित मेघनिर्घोषे इत्यादयमरोक्त्या स्तननशब्देन मेघगर्जितमेव बुध्यते तथापि शब्दमात्रार्थकस्तनधातुनिष्पन्नत्वेन स्तनन्त्य इति पदस्य गर्भिण्यास्ताट्टशेऽपि शब्दप्रयोगो युज्यते। अन्यच्च मञ्जीरादिषु रणितप्राय पक्षिषु च कूजितप्रभृति स्तनितमणितादि स्मरते मेघादिषु गर्जितप्रमुखमिति वचनान्तरेण स्तनितशब्दस्य सुरतवाचकत्वमपि सिद्ध तस्मात् स्तनधातोः केवल मेघगर्जितमेवार्थो न अपितु सामान्यशब्दमात्रमपि। ननु शब्दमात्रार्थकतायां सिद्धायामपि कथ स्तनन्त्य इति पदेन गर्भिण्या असाधारणशब्दविशेषस्य उपपत्तिरिति चेत्, गर्भिण्या अन्येषाम् असाधारणधर्माणाम्

तदेतत् काव्यनर्वस्वं समाधिर्नाम यो गुणः।
कविसार्थः समग्रोऽपि तमेनमनुगच्छति ॥ १०० ॥
इति मार्गत्रयं भिन्नं तत्स्वरूपनिरूपणात्।
तद्भेदास्तु न शक्यन्ते वक्तुं प्रतिकविस्थिताः ॥१०१॥

अन्तपातात् अस्यापि गर्भिणीधर्मत्वस्य युक्तत्वात् वैचित्र्यजनकत्वेन अतीवहृद्यत्वात् इति विवेचनीयम् ॥ ९९ ॥

उपसंहरति तदिति। तत् तस्मात् उक्तप्रकारेण अतेव वैचित्र्यावहत्वात् समाधिर्नाम यो गुणः एतत् काव्यस्य सर्वस्वधनं सारभूतमित्यर्थः समग्रः अपि सकलः कविमार्गः कविसम्प्रदायः गौडीयः वैदर्भीयो वा इत्यर्थः तं तथाभूतम् एनं समाधिम् अनुगच्छति एतदनुसारेण काव्ये प्रवर्त्तते इत्यर्थः। यदि च एतेषां गुणानां दशानां मध्ये केचित् तत्तद्दोषाभावरूपतया केचिच्च अलङ्कृतिरूपतया नव्यैः अनादृता केवलं त्रय एव गुणाः दर्शिताः यथाः माधुर्यौजःप्रसादाख्यास्त्रयस्ते न पुनर्दश इति तथापि प्राचां मतमनुसृत्य ग्रन्थकृतोक्ता इति अवधेयम् ॥ १०० ॥

इत्थं गौडवैदर्भयोर्भेदं वर्णयित्वा उपसंहरति इतीति। इति उक्तप्रकारेण त्रयो गौडवैदर्भयोः स्वरूपनिरूपणात् लक्षणकीर्त्तनात् मार्गत्रयम् उल्लिखितरीतित्रयं भिन्नं परस्परविलक्षणम्। तद्भेदाः तेभ्यो मार्गेभ्यो भेदाः भिन्नाः इत्यर्थः। ह्रदभिहितो भावो द्रव्यवत् प्रकाशते इति न्यायात्। लाटपाञ्चालादयः प्रतिकवि तत्तद्देशीयकविषु स्थिताः तु किन्तु ते वक्तुं न शक्यन्ते अतिविस्तारादिति भावः। अथवा तद्भेदाः तयोः गौडवैदर्भयोः भेदाः अन्तर्गतविशेषा इत्यर्थः ॥ १०१ ॥

इक्षुक्षीरगुडादीनां माधुर्य्यस्यान्तरं महत् ।
तयापि न तदाख्यातुं सरस्वत्यापि शक्यते ॥१०२॥
नैसर्गिकी च प्रतिभा श्रुतञ्च बहु निर्मलम् ।
अमन्दश्चाभियोगोऽस्या.कारणं काव्यसम्पदः ॥१०३॥

उक्तमर्थं दृष्टान्तेन समर्थयति इक्षुक्षीरेति । इक्षुक्षीरगुडादीनामपि माधुर्य्यस्य अन्तरं भेदः तथा महत् अतिविस्तरमित्यर्थः यथा सरस्वत्यापि किमु वक्तव्यमन्येषामिति भावः वाग्देव्यापि तत् प्राग्भागं कथयितुं न शक्यते । एवं काव्यमार्गाणां मधुरिमाणं आनन्त्यात् अनिर्वचनीयतया भेदद्वयमेव विशिष्य निरूपितमिति तात्पर्य्यार्थः ॥ १०२ ॥

इदानीं काव्यस्वरूपं निरूप्य तत्कारणमाह नैसर्गिकीति । नैसर्गिकी स्वभावसिद्धा प्रतिभा स्फुरन्ती मतिः बहु नानाविधं निर्मलं विशदं श्रुतं शास्त्रज्ञानं लोकाचारादिज्ञानञ्च तथा अमन्दः प्रगाढः अभियोगः अभिनिवेशश्च एतत् त्रयम् अस्याः काव्यसम्पदः काव्यरूपायाः सम्पत्तेः कारणं हेतुः, कारणमिति एकवचननिर्देशेन समस्तस्यैव कारणता न तु प्रत्येकस्य इति सूचितम् । उक्तञ्च प्रकाशकारेण, शक्तिर्निपुणता लोकशास्त्रकाव्याद्यवेक्षणात् । काव्यज्ञशिक्षयाभ्यास इति हेतुस्तदुद्भवे ॥ इति त्रय समुदिता न तु व्यस्ता तस्य काव्यस्य उद्भवे निर्माणे समुल्लासे च हेतुः नं तु हेतव इति । कश्चित् तु प्रतिभा एव काव्यकरणे व्युत्पत्तिम् तस्य चारुत्वे हेतुः, अभ्यासो दृढिहेतुश्च प्रतिभा च क्वचित् स्वत प्रसरति क्वचित् वा देवानुग्रहात् भाविकवीनां बालानां सत्यामपि प्रतिभाया काव्यानुदयात् कालस्य तत्सहकारित्वमङ्गीकार्य्यमित्याहुः । उक्तञ्च, कवित्व

न विद्यते यद्यपि पूर्ववासना
गुणानुबन्धि प्रतिभानमद्भुतम्।
श्रुतेन यत्नेन च वागुपासिता
ध्रुवं करोत्येव कमप्यनुग्रहम्॥ १०४॥
तदस्ततन्द्रैरनिशं सरस्वती
श्रमादुपास्या खलु कीर्त्तिमीप्सुभिः।
कृशे कवित्वेऽपि जनाः कृतश्रमा
विदग्धगोष्ठीषु विहर्त्तुमीशते॥ १०५॥

इति आचार्य्यदण्डिनः कृतौ काव्यादर्शे मार्ग-
विभागो नाम प्रथमः परिच्छेदः।

जायते शक्तिर्व्युत्पत्तेरभ्यासयोगतः। तस्य चारुत्वनिष्पत्तौ व्युत्पत्तिस्तु गरीयसी॥ इति सर्वमनवद्यम्॥ १०३॥

उक्तकारणानां सर्वेषामभावेऽपि यत्नवतां शास्त्रानुशीलनपराणां कथञ्चित् फलसिद्धिरित्याशयेनाह नेति। यद्यपि पूर्ववासना प्राक्तनसंस्कारः स्वाभाविकी शक्तिरित्यर्थः. तथा अद्भुतम् अलौकिकं गुणानुबन्धि वैचित्र्यावह प्रतिभान सू चेक्षणा बुद्धि न विद्यते, तथापि श्रुतेन शास्त्रानुशीलनेन काव्यक्षोपदेशेन वा यत्नेन अभिनिवेशेन उपासिता सेविता वाक् ध्रुवं निश्चित कमपि अनुग्रहं करोति एव अवश्यमेव काव्यनिर्माणे किञ्चित् सामर्थ्यमातनोति इत्यर्थः। सम्यक् सामर्थ्ये तु उक्तत्रितयमेव हेतुरिति न परस्पर विरोध इति॥ १०४॥

उपसंहरति तदिति। तत् तस्मात् अस्ततन्द्रैः अस्ता तन्द्रा

द्वितीयः परिच्छेदः ।

काव्यशोभाकरान् धर्मानलङ्कारान् प्रचक्षते ।
ते चाद्यापि विकल्पान्ते कस्तान् कार्त्स्न्येन वक्ष्यति ?

येषां ते प्राक्तनग्रन्थरहिते इत्यर्थे कीर्त्तिं कवित्वजनितयशः ईप्सुभि जने इति शेषः श्रमात् परिश्रमेण अनिशं सरस्वती खलु निश्चयेन उपास्या सेव्या, अवश्यमेव शास्त्रं परिशीलितव्यमिति भावः कथमित्याह क्षणं इति । कवित्वे काव्यकरणसामर्थ्ये क्षणं अल्पेऽपि क्षतश्रमा क्षतशास्त्रपरिशीलनप्रयासा जना विदग्धगोष्ठीषु कविसमाजेषु विक्षत्तुम् ईशते प्रभवन्ति । अल्पस्यापि अस्य ज्ञाने करणे च ऐहिकामुष्मिकफलसिद्धिर्भवति, एकः शब्दः सुप्रयुक्तः सम्यक् ज्ञातः स्वर्गे लोके च कामधुग् भवतीति श्रुतेः ॥ १०५ ॥

इति श्रीजीवानन्दविद्यासागरभट्टाचार्य्यविरचितायां
काव्यादर्शटीकायां प्रथमः परिच्छेदः ।

परिच्छेदेऽस्मिन् अलङ्कारान् निरूपयिष्यन् प्रथमं तेषां सामान्यलक्षणं निरूपयति काव्यशोभाकरानिति । काव्यस्य पूर्वोक्तलक्षणस्य शोभा सौन्दर्य्यं तत्तद्विशेषोक्तचमत्कारजनकवैचित्र्यमित्यर्थः तत्करान् तत्साधनानि धर्मान् गुणविशेषान् अलङ्कारान् प्रचक्षते वदन्ति कवय इति शेषः । यथा हारकुण्डलादयः शरीरं शोभयन्ति तथा अनुप्रासोपमादयः काव्यशरीरभूतौ शब्दार्थौ शोभयन्तीति भावः । पूर्वोक्तगुणास्तु काव्यस्यान्तः शोभाधायकाः अलङ्कारास्तु बाह्यशोभाकरा इति

किन्तु वीजं विकल्पानां पूर्वाचार्यैः प्रदर्शितम्।
तदेव परिसंस्कर्त्तुमयमस्माकमुद्यमः ॥ २ ॥
काश्चिन्मार्गविभागार्थमुक्ताः प्रागप्यलङ्क्रिया।
साधारणमलङ्कारजातमन्यत् प्रदर्श्यते ॥ ३ ॥
स्वभावाख्यानमुपमा रूपकं दीपकाऽऽवृती।
आक्षेपोऽर्थान्तरन्यासो व्यतिरेको विभावना ॥ ४ ॥

गुणालङ्कारपदार्थयोर्भेद इति ध्येयम्। ते च अलङ्कारा अद्यापि विकल्प्यन्ते विविधरूपेण उद्भाव्यन्ते कविभिरिति शेषः, अत एव पण्डितैः तान् कात्स्न्येन साकल्येन वक्ष्यति निरूपयिष्यति न कोऽपि निरूपयितुं शक्ष्यतीत्यर्थः. उक्तिवैचित्र्यस्यैवालङ्कारत्वात् तस्य च कल्पनैकमूलत्वात् कल्पनायाश्च कदाप्यविरामात् इति भावः ॥ १॥

किन्तु विकल्पानां विविधकल्पनानां वीजं मूलं सादृश्यम् उपमेत्यादिसामान्यलक्षणं पूर्वाचार्यैः प्रदर्शितं निरूपितं यत् उपजीव्य नव्यानां वैचित्र्यभेदेन नाना कल्पना इति भावः। तदेव पूर्वाचार्यप्रदर्शितवीजीभूतम् अलङ्कारलक्षणम् इत्यर्थः परिसंस्कर्त्तुं सम्यक् स्फुटीकर्त्तुम् अयम् अस्माकं परिश्रमः प्रयासः। २ ॥

काश्चित् अलङ्क्रियाः अलङ्काराः युक्त्यनुप्राणादयः मार्ग-विभागार्थं रीतिविभेददर्शनार्थं प्रागपि पूर्वमेव उक्ताः, इदानीम-न्यत् साधारणं सामान्यं सर्वसम्मतमित्यर्थः अलङ्कारजातं प्रदर्श्यते निरूप्यते। ३ ॥

अलङ्कारान् निर्दिशति स्वभावेत्यादि। स्वभावाख्यान

समासातिशयोक्ती चा हेतुः सूक्ष्मो लवः क्रमः ।
प्रेयो रसवदूर्जस्वि पर्य्यायोक्तं समाहितम् ॥ ५ ॥
उदात्तापह्नुतिश्लेषविशेषास्तुल्ययोगिता ।
विरोधापस्तुतस्तोत्ते व्याजस्तुतिनिदर्शने ॥ ६ ॥
सहोक्ति. परिवृत्त्याशीः सङ्कीर्णमथ भाविकम् ।
इति वाचामलङ्कारा दर्शिताः पूर्वसूरिभिः ॥ ७ ॥
नानावस्थं पदार्थानां रूपं साक्षात् विवृण्वती ।
स्वभावोक्तिश्च जातिश्चेत्याद्या सालङ्कृतिर्यथा ॥८॥

स्वभावोक्ति, दीपकञ्च आवृत्तिरावृत्तिश्च ते दीपकावृत्ती, समासः समासोक्ति, अतिशय अतिशयोक्ति, समाहित समाधि', अप्रस्तुतस्तोत्रम् अप्रस्तुतप्रशंसा, इति उक्तप्रकारेण नामतो निर्दिष्टा स्वभावोक्त्यादिभाविकपर्य्यन्ताः पञ्चत्रिंशत्सख्यकाः वाचा वाक्यानाम् अलङ्काराः पूर्वसूरिभिः प्राचीनकविभिः दर्शिताः, वाचाम् इत्यनेन वाक्यगता एवैते अलङ्कारा इति सूचितम् ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥

स्वभावोक्ति निरूपयति नानेति। स्वभावोक्तिश्च जातिश्च इति नामद्वयवती आद्या प्रथमा सर्वाग्रा वा यथार्थनिरूपणमारत्वादिति भाव। पदार्थानां जातिगुणक्रियाद्रव्याणां नाना अवस्था दशा यस्य तादृग रूपं प्रकार साक्षात् प्रत्यक्षमिव विवृण्वती प्रदर्शयन्ती सा प्रसिद्धा अलङ्कृतिः अलङ्कारः, तथाच पदार्थाना नानावस्थस्वरूपस्य वैचित्र्येण वर्णनं स्वभावोक्तिरिति निष्कर्षः। एकरूपाया अवस्थायाः कीर्त्तने न अयमलङ्कारः वैचित्र्याभावात् वैचित्र्यस्य एव अलङ्कारत्वात्

तुण्डैरातास्रकुटिलैः पक्वैर्हरितकोमलैः।
त्रिवर्णराजिभिः कण्ठैरेते मञ्जुगिरः शुकाः ॥ ९ ॥
कलक्वणितगर्भेण कण्ठेनाघूर्णितेक्षणः।
पारावतः परिष्वज्य रिरंसुश्चुम्बति प्रियाम् ॥ १० ॥
वध्नन्नङ्गेषु रोमाञ्चं कुर्वन् मनसि निर्वृतिम्।
नेत्रे चामीलयन्नेष प्रियास्पर्शः प्रवर्त्तते ॥ ११ ॥

इति सूचते। यथा अम्भोदमुदित दृष्ट्वा मुदा नृत्यन्ति बर्हिण इत्यत्र वस्तुस्वरूपनिरूपणेऽपि वैचित्र्याभावात् न अलङ्कारता। उक्तञ्च प्रकाशकारेण यथा, स्वभावोक्तिस्तु डिम्भादे स्वक्रियारूपवर्णनम् इति। यथेति परोक्तस्य उदाहरणस्य सूचकम् ॥८॥

प्रथम जातौ उदाहरति तुण्डैरिति। एते मञ्जुगिरः मधुरप्रलापिनः शुका आतास्राणि आलोहितानि कुटिलानि च तैः तुण्डैः मुखैः. हरिता पालाशवर्णाः कोमलाश्च तैः पक्वैः तथा त्रयाणां वर्णानां हरितरक्तधूमराणा राजयः रेखा. येषु तादृशैः कण्ठैः सर्वत्र विशेषणे तृतीया। उपलक्षिता इत्यर्थः। अत्र शुकजातेः तादृशतुण्डत्वादिकम् असाधारणधर्म वर्णनावैचित्र्येण साक्षादिव प्रतीयते इति जातिगता स्वभावोक्तिः ॥९॥

क्रियायामुदाहरति कलेति। कलं मधुर क्वणित गर्भे यस्य तादृशेन कण्ठेन विशेषणे तृतीया पारावतः घूर्णिते ईक्षणे नेत्रे यस्य तथाभूतः रिरंसुः रन्तुमिच्छुः सन् परिष्वज्य प्रियां चुम्बति। पारावतानामुक्तविधचुम्बन स्वाभाविकमिति क्रियागता स्वभावोक्तिरिति अवगन्तव्यम् ॥ १० ॥

गुणोदाहरणं दर्शयति वध्नन्निति। एष प्रियायाः स्पर्शः

कण्ठे कालः करस्थेन कपालेनेन्दुशेखरः ।
जटाभिः स्निग्धताम्राभिराविरासीत् वृषध्वजः ॥१२
जातिक्रियागुणद्रव्यस्वभावाख्यानमीदृशम् ।
शास्त्रेष्वस्यैव सामाज्यं काव्येष्वप्येतदीप्सितम् ॥१३
यया कथञ्चित् माहात्म्यं यत्नोद्भूतं प्रतीयते ।

अङ्गेषु रोमाञ्चं जनयन् मनसि निर्वृतिं मातिशयानन्दं कुर्वन् तथा नेत्रे निमीलयन् मुद्रयंश्च प्रवर्त्तते प्रसरति। अत्र स्पर्शो गुणः ॥ ११ ॥

द्रव्योदाहरणं दर्शयति कण्ठे इति। कण्ठे कण्ठदेशे काल नील कण्ठे कालशब्दः अलुक्तत्पुरुषनिष्पन्नः। करस्थेन कपालेन स्निग्धताम्राभि जटाभिरिति च विशेषणे तृतीया। इन्दुशेखर चन्द्रचूड वृषध्वज आविरासीदित्यन्वयः। अत्र वृषध्वजशब्दो द्रव्यवाचकः मन्नाशब्दस्य द्रव्यवाचकत्वात् इति वृषध्वजगतामाधारणधर्मस्य कीर्त्तनात् द्रव्यगता स्वभावोक्तिरिति ॥ १२ ॥

स्वभावोक्तिमुपसंहरन्नाह जातीति। अत्र द्रव्यपदेन सत्ताद्रव्यवाचकत्वमेवादीनां ग्रहणं न तु चित्यादेः तस्य जातिपदेन एव संग्रहादानात्। जातिक्रियागुणद्रव्याणां स्वभावाख्यानं स्वभावोक्तिः ईदृशम् एवम्प्रकारम् अनयैव रीत्या स्वभावो वर्णनीय इति भावः। अस्यैव अलङ्कारस्य शास्त्रेषु काव्यतन्त्रेषु साम्राज्यम् आधिपत्यं काव्यशास्त्रेषु अस्यैव बहुलप्रचार इत्यर्थः एतत् [illegible] ईप्सितं प्रियं कवीनामिति शेषः, कवय स्वभावोक्तिं [illegible] आद्रियन्ते इति भावः ॥ १३ ॥

[illegible] इति। अत्र काव्यादर्शे यथाकथञ्चित्

उपमा नाम सा, तस्याः प्रपञ्चोऽयं निदर्श्यते ॥१४॥
अम्भोरुहमिवाताम्रं सुग्धे ! करतलं तव ।
इति धर्मोपमा साक्षात् तुल्यधर्मप्रदर्शनात् ॥१५॥
राजीवमिव ते वक्त्रं नेत्रे नीलोत्पले इव ।
इयं प्रतीयमानैकधर्मा वस्तूपमैव सा ॥ १६ ॥

येन केनापि प्रकारेण उद्भूतं सादृश्यं प्रतीयते सा उपमा नाम, तथाच काव्यनिविष्टमलौकिकचमत्कारजनकं सादृश्यमुपमेति तात्पर्य्यं चमत्कारित्वासद्भावे नायमलङ्कारः यथा गौरिव गवय इत्यादि। उक्तञ्च रसगङ्गाधरे, सादृश्यं सुन्दरं वाक्यार्थोपस्कारकम् उपमालङ्कृतिरिति। व्याख्यातञ्च तत्रैव सुन्दरमिति सादृश्यविशेषणं सौन्दर्य्यचमत्कृत्याधायकत्वं चमत्कृतिश्च आनन्दविशेष इति। तस्याः प्रपञ्चः विस्तरः विविधभेदः अयं वक्ष्यमाणरूपः निदर्श्यते प्रदर्श्यते ॥ १४ ॥

धर्मोपमाख्यभेदमुदाहरति अम्भोरुहमिति। हे सुग्धे ! तव करतलम् अम्भोरुहमिव कोकनदमिव आताम्रम् आलोहितम्। इति उक्तवाक्ये साक्षात् आताम्रमिति पदोपात्तस्य तुल्यधर्मस्य साधारणधर्मस्य आताम्रत्वस्य प्रदर्शनात् कीर्त्तनात् धर्मोपमा ॥ १५ ॥

वस्तूपमां लक्षयति राजीवमिति। ते तव वक्त्रं मुखं राजीवं पद्ममिव तथा नेत्रे नीलोत्पले इव। प्रतीयमानः गम्यमानः न तु अभिधीयमानः एकः सामान्यः धर्मः यस्याः सा तथाविधा इयम् अलङ्कृतिः वस्तूपमा एव वस्तुनोरुपमानोपमेययोः एवोपादानात्। एवञ्च सामान्यधर्माप्रयोगेऽपि स्फुट-

तवाननमिवोन्निद्रमरविन्दमिदं पुनः ।
सा प्रसिद्धिर्विपर्य्यासात् विपर्य्यासोपमेष्यते ॥१७॥
तवाननमिवाम्भोजमम्भोजमिव ते मुखम् ।
इत्यन्योन्योपमा सेयमन्योन्योत्कर्षगामिनी ॥१८॥

सोपस्कारप्रतीतौ एव इयमलङ्कृतिः न तु स्फुटप्रतीतौ इति तात्पर्यम् ॥ १८ ॥

विपर्य्यासोपमां लक्षयति तवेति। उन्निद्रम् अरविन्दं तवाननमिव उन्निद्र विकसितसदृशम्। इत्यत्र प्रसिद्धे विपर्य्यासात् वैपरीत्यात् सा प्रसिद्धा विपर्य्यासोपमा इष्यते कविभिरिति शेषः। तथाच प्रस्तुतानां मुखादीनाम् उपमेयत्वम् अप्रस्तुतानां चन्द्रादीनाम् उपमानत्वमेव प्रसिद्धि। तां विहाय प्रस्तुतानां मुखादीनाम् अत्युत्कर्षप्रतिपादनाय उपमानत्वस्य चन्द्रादीनाञ्च उपमेयत्वस्य च करणेन विपर्य्यासोपमा इति द्वितीयम्। दण्डिकारस्तु इयं प्रतीपालङ्कार इत्याह। यथा, प्रसिद्धस्योपमानस्योपमेयत्वप्रकल्पनम्। निष्फलत्वाभिधानं वा प्रतीपमिति कथ्यते ॥ इति। उदाहृतञ्च तेनैव, यत्त्वेतन्मुखमानकान्तिमलिने मग्नं तदिन्दीवरं मेघैरन्तरितं प्रिये। तव मुखच्छायानुकारी शशी। येऽपि त्वन्मनानुकारिगतयस्ते राजहंसा गतास्त्वत्साहृश्यविनोदमात्रमपि मे दैवेन न क्षम्यते ॥ १७ ॥

अन्योन्योपमां निरूपयति तवेति। अम्भोजं तव आननमिव, ते मुखम् अम्भोजमिव। इत्यत्र अन्योन्यस्य परस्परस्य अम्भोजोपमानत्वेन मुखस्य मुखोपमानत्वेन अम्भोजस्य इत्यर्थः य उत्कर्ष वैचित्र्य तस्य गामिनी सूचयित्री सा प्रसिद्धा इयम्

तन्मुखं कमलेनैव तुल्यं नान्येन केनचित् ।
इत्यन्यसाम्यव्यावृत्तेरियं सा नियमोपमा ॥ १९ ॥
पद्मं तावत् तवान्वेति सुखमन्यच्च तादृशम् ।
अस्ति चेदस्तु तत्कारीत्यसावनियमोपमा ॥ २० ॥
समुच्चयोपमाप्यस्ति न कान्त्यैव सुखं तव ।
चन्द्रादनाद्येन चान्वेति कर्मणेन्दुसितद्युतीं ॥२१॥

अन्योन्योपमा. एतेन पर्य्यायेण उपमानोपमेयभावस्य एव एतत् अलङ्कारविषयत्वमवधेयं तस्यैव वैचित्र्यजनकत्वात् मुखमम्भोजञ्च तुल्यमित्यादौ तथाप्रतीतौ अपि वैचित्र्याभावात् न अयमलङ्कार । दर्पणकारस्तु एतामेव उपमेयोपमामाह । यथा. पर्य्यायेण द्वयोरेतत् उपमेयोपमा मता इति । १८ ।

नियमोपमां लक्षयति तदिति । तन्मुख कमलेन एव तुल्यम् अन्येन केनापि नेति अत्र अन्यस्य साम्य सादृश्य तस्य व्यावृत्ति निरास तस्या हेतो इय सा प्रसिद्धा नियमोपमा. उपमानवाहुल्यम् उपमेयस्यापकर्षं गमयति. तद्व्यावृत्त्या एतेन प्रकृतमेन सादृश्यकल्पनात् उत्कर्षातिशय समधिकवैचित्र्यम् आवहतीति ध्येयम् । १९ ।

अनियमोपमां निरूपयति पद्ममिति । पद्म तावत् तव मुखम् अन्वेति अनुकरोति. अन्यच्च तादृशं पद्मवत् सुन्दर वस्तु चन्द्रादि तत्कारि तव मुखानुकारि अस्ति चेत् वस्तु । इत्यत्र असौ अनियमोपमा पद्मस्य तदन्यस्य च यस्य कस्यचित् अपि उपमेयत्वकल्पनात् कल्पनायाच्च नियमाभावात् इति । २० ॥

समुच्चयोपमामाह, समुच्चय इति । तव मुखं कान्त्यैव

त्वय्येव त्वन्मुखं दृष्टं दृश्यते दिवि चन्द्रमाः ।
इयत्येव भिदा नान्येत्यमावतिशयोपमा ॥ २२ ॥
मय्येवास्या मुखश्रीरित्यलमिन्दोर्विकत्थनैः ।
पद्मेऽपि सा यदस्त्येवेत्यसावुत्प्रेक्षितोपमा ॥ २३ ॥

केवलगा वाच्या न, श्लाघनाख्येन प्रश्लाघनजनकेन कर्मणा च चकार समुच्चयद्योतकः, इन्दुं चन्द्रम् अन्वेति अनुगच्छति अनुकरोतीत्यर्थः । इति ईदृशी एवमकारा समुच्चयोपमा अपि अस्ति, ईदृशीत्यनेन केवलगुणकेवलक्रियासमुच्चये वा साधारणसमुच्चयेऽपि वा अयमलङ्कारो बोद्धव्यः ॥ २१ ॥

अतिशयोपमां निरूपयति त्वयीति । तव मुखं त्वयि एव दृष्टं, चन्द्रमाः दिवि आकाशे दृश्यते, इयती आश्रयनिबन्धना एव भिदा प्रभेदः मुखचन्द्रमसोरिति शेषः, न अन्या न गुणक्रियादिकृता इति भावः, असौ अतिशयोपमा, भिन्नाश्रयत्वेन औपम्यस्य सातिशयचमत्कारित्वात् । अत्र साम्यमिव आदिशब्दाप्रयोगात् व्यङ्ग्यं न च अत्र रूपकध्वनिः आश्रयभेदेन अभेदप्रतीतेरभावादिति ध्येयम् ॥ २२ ॥

उत्प्रेक्षितोपमां लक्षयति मयीति । अस्या मुखश्रीः मुखकान्तिः मुखसदृशकान्तिरित्यर्थः मयि एव न अन्यत्र, इन्दोः चन्द्रस्य इति एवं विकत्थनैः आत्मश्लाघनैः अलं, यत् यस्मात् सा कान्तिः पद्मेऽपि अस्ति पद्ममपि तत्सदृशकान्तीत्यर्थः. असौ उत्प्रेक्षितोपमा, इन्दौ आत्मश्लाघाया अतात्त्विकत्वेन नायकस्य चाटूक्त्या तथा सम्भावितत्वात् सम्भावनायाम उत्प्रेक्षात्वात् इति । साम्यञ्च अत्र व्यङ्ग्यम् ॥ २३ ॥

यदि किञ्चित् भवेत् पद्मं सुभ्रु ! विस्रान्तलोचनम् ।
तत् ते मुखश्रियं धत्तामित्यसावद्भुतोपमा ॥ २४ ॥
शशीत्युत्प्रेक्ष्य तन्वङ्गि ! त्वन्मुखं त्वन्मुखाशया ।
इन्दुमप्यनुधावामीत्येषा मोहोपमा स्मृता ॥२५॥
किं पद्ममन्तर्भ्रान्तालि किं ते लोलेक्षणं मुखम् ?

अद्भुतोपमामाह यदीति । हे सुभ्रु ! यदि पद्म विस्रान्तलोचन विघूर्णितनयन भवेत्, तत् तदा ते तव मुखश्रिट वदनकान्ति धत्ता धारयतु । इत्यत्र अङ्गी अद्भुतोपमा, यद्यर्थबलेन सादृश्यस्य समधिकचमत्कारद्योतनात् । उक्तञ्च, यत्रोपमेयधर्मा स्युरुपमानेऽधिरोपिता । चमत्कारविधानार्थं तामाहुरद्भुतोपमाम् ॥ इति । प्रकाशकारस्तु एनामतिशयोक्तिमाह । यथा. निगीर्याध्यवसानन्तु प्रकृतस्य परेण यत् । प्रस्तुतस्य यदन्यत्व यद्यर्थोक्तौ च लक्षणम् ॥ इति । उदाहृतञ्च विश्वनाथेन यथा, यदि स्यान्मण्डले सक्तमिन्दोरिन्दीवरद्वयम् । तदोपमीयते तस्या वदन चारुलोचनम् ॥ २४ ॥

मोहोपमा निरूपयति शशीति । हे तन्वङ्गि कृशाङ्गि ! तव मुख शशीति उत्प्रेक्ष्य सम्भाव्य भ्रान्त्या अभिन्न बुद्ध्वा इत्यर्थ. तव मुखाशया वदनस्पृहया इन्दुमपि अनुधावामि । इत्यत्र मोहोपमा स्मृता कविभिरिति शेष, मोहेन इन्दोर्मुखत्वेन ज्ञानात् । तथाचोक्त, प्रतियोगिनमारोप्य तदभेदेन कीर्त्तनम् । उपमेयस्य यन्मोहोपमासौ भ्रान्तिमद्वच ॥ इति । दर्पणकारस्तु एना भ्रान्तिमदलङ्कारमाह यथा. साम्यादतस्मिंस्तद्बुद्धिर्भ्रान्तिमान् प्रतिभोत्थितः इति । साम्यञ्चात्र व्यङ्ग्यम् ॥ २५ ॥

मम दोलायते चित्तमितीयं संशयोपमा ॥ २६ ॥
न पद्मस्येन्दुनिग्राह्यस्येन्दुलज्जाकरी द्युतिः ।
यतस्त्वन्मुखमेवेदमित्यसौ निर्णयोपमा ॥ २७ ॥
शिशिरांशुप्रतिस्पर्द्धि श्रीमत् सुरभिगन्धि च ।
पद्मोजमिव ते वक्त्रमिति श्लेषोपमा स्मृता ॥२८॥

संशयोपमां निरूपयति किमिति। अन्तर्भ्रान्ते अलौ यस्य तत् पद्म किम् ? ते तव लोले चञ्चले ईक्षणे नेत्रे यस्मिन् तत् मुख किम् ? मम चित्तम् इति इत्थं दोलायते सशेते। इयं संशयोपमा संशयस्य श्रौपम्यपर्य्यवसायित्वात्। दर्पणकारस्तु एतां सन्देहालङ्कारमाह यत्र, सन्देह प्रकृतेऽन्यस्य संशय प्रतिभोत्थित इति। अत्रापि साम्य व्यञ्जनया गम्यते ॥ २६ ॥

निर्णयोपमां निरूपयति नेति। इन्दुना निग्राह्यस्य निगृह्णीतस्य तिरस्कृतस्य इत्यर्थ पद्मस्य द्युति इन्दुलज्जाकरी न पराजितस्य पराजेतृलज्जाजनकत्वादिति भावः। अत इद तव मुखमेव न पद्म तव मुखस्यैव इन्दुपराजेतृत्वात् इति भाव.। अयं निर्णयोपमा निर्णयेन उपमानोपमेययोः सादृश्यावगमात्। मुख वा पद्म वा इत्यादिसंशयात् पर निश्चयज्ञान एवायमलङ्कारो बोद्धव्य'। उक्तञ्च, उपमेयस्य संशय्य निश्चयान्निश्चयोपमा इति ॥ २७ ॥

श्लेषोपमां निरूपयति शिशिरेति। ते वक्त्रं वदनम् पद्मोजमिव शिशिरांशुप्रतिस्पर्द्धि शिशिरांशु चन्द्रः प्रतिस्पर्द्धी विरोधी यस्य तत् श्रीमत् सुश्रीक तथा सुरभिगन्धि च विशेषणत्रयम् उभयत्र समानम्। अथवा वक्त्रपक्षे शिशिरांशुप्रति-

सरूपशब्दवाच्यत्वात् सा समानोपमा यथा।
वालेवोद्यानमालेयं सालकाननशोभिनी ॥ २८ ॥
पद्मं बहुरजश्चन्द्रः क्षयी ताभ्यां तवाननम्।
समानमपि सोत्सेकमिति निन्दोपमा स्मृता ॥३०॥

सर्हिनी या स्त्री. शोभा तद्वत्। इत्यत्र श्लेषोपमा स्मृता कविभिरिति शेषः। श्लेषेण उपमानोपमेयगतततत्तत्साधर्म्यस्य द्योतनात् श्लेषश्च अत्र अर्थश्लेष एव समानोपमाया. शब्दश्लेषविषयत्वादिति ॥ २८ ॥

समानोपमा लक्षयति सरूपेति। सरूपशब्दै समानरूपै. श्लेषात् भिन्नैरपि अभिन्नवत् प्रतीयमानैः शब्दैः वाच्यत्वात् साधर्म्यस्य प्रतिपाद्यत्वात् सा प्रसिद्धा समानोपमा, यथाशब्द उदाहरणप्रदर्शनार्थ.। इयम् उद्यानमाला उपवनराजि वाला कामिनीव सालकाननशोभिनी सालानां वृक्षभेदानां काननेन वनेन सन्नूहेन इत्यर्थ शोभते इति तयोक्ता, अन्यत्र सालकम् अलकालङ्कृतं यत् आननं तेन शोभते इति अत्र साधारणधर्मस्य सालकाननशोभित्वस्य शब्दश्लेषेण द्योतनात् शब्दश्लेषमूलैवेय दोषगुणालङ्काराणां शब्दार्थगतत्वव्यवस्थिते. शब्दपरिवृत्तिसहत्वासहत्वमेव मूलम् अत्र सालकाननेत्यत्र सर्जकाननेति परिवृत्तौ न श्लेष., पूर्वत्र शिशिरांशु इत्यत्र शीतगु इति परिवृत्तौ अपि न क्षतिरिति सुधीभिर्भाव्यम् ॥ २८ ॥

निन्दोपमां लक्षयति पद्ममिति। पद्मं बहुरज. परागपूर्ण रजोगुणबहुलञ्च. चन्द्रश्च क्षयी क्षयरोगी, पक्षान्तरे क्षयशीलश्च. अत. आननं समानमपि साधर्म्यान्तरेण तुल्यमपि ताभ्यामिति शेषः सोत्सेकं समधिकोत्कर्षशालि। इत्यत्र निन्दो-

ब्रह्मणोऽप्युद्भवः पद्मश्चन्द्रः शम्भुशिरोधृतः ।
तौ तुल्यौ त्वन्मुखेनेति सा प्रशंसोपमोच्यते ॥३१॥
चन्द्रेण त्वन्मुखं तुल्यमित्याचिख्यासु मे मनः ।
म गुणो वास्तु दोषो वेत्याचिख्यासोपमां विदुः ३२

पमा मता. उपमाननिन्दया साम्यस्य कीर्त्तनात्। साम्यमानपर्यवसायित्वादस्या व्यतिरेकात् भेद व्यतिरेके तु भेद एव पर्यवसानमिति बोद्धव्यम् ॥ ३० ॥

प्रशंसोपमा निरूपयति ब्राह्मण इति। पद्म ब्रह्मणोऽपि उद्भव उत्पत्तिस्थान नारायणस्य नाभिकमलजातत्वात्, तथा चन्द्र शम्भुशिरोधृत तौ पद्मचन्द्रौ त्वन्मुखेन तुल्यौ इति पद्मचन्द्रयो प्रशंसितयोरपि त्वन्मुखमाहात्म्येन प्रशंसातिशयात् मुखस्य च समधिकोत्कर्षव्यञ्जनात् प्रशंसोपमा उच्यते। अत्र साम्यस्य उपमेयत्वप्रसिद्धावपि, उपमानत्वकल्पनात् प्रतीपालङ्कारोऽपि। यदुक्त, प्रसिद्ध्योपमानस्योपमेयत्वप्रकल्पनम्। निष्फलत्वाभिधान वा प्रतीपमिति कथ्यते ॥ इत्यनयोः सङ्करः। अथवा विपर्य्यासोपमा च मुखस्योपमानतया प्रसिद्धोपमेयखण्डनादिति तयो सङ्कर इति, पद्म इति पुस्त्वनिर्देशेन अप्रयुक्तताद्योतनेति बोध्यम ॥ ३१ ॥

आचिख्यासोपमा लक्षयति चन्द्रेणेति। त्वन्मुख चन्द्रेण तुल्यम् इति आचिख्यासु आख्यातुमिच्छु मे मनः। म आख्यानाभिलाष गुणो वा दोषो वा अस्तु इत्यत्र आचिख्यासोपमा विदुः। आख्यानकामनाविषयत्वेन मुखस्य चन्द्रेण उपमितत्वेऽपि गुणो वा दोषो वा इति कथनम् अधिकचमत्कारित्व द्योतयतीति बोध्यम् ॥ ३२ ॥

शतपत्रं शरच्चन्द्रस्त्वदाननमिति त्वयम् ।
परस्परविरोधीति सा विरोधोपमा मता ॥ ३३ ॥
न जातु शक्तिरिन्दोस्ते मुखेन प्रतिगर्जितम् ।
कलङ्किनो जड़स्येति प्रतिषेधोपमैव सा ॥ ३४ ॥
मृगीक्षणाङ्कं ते वक्त्रं मृगेणैवाङ्कितः शशी ।
तथापि मम एवासौ नोत्कर्षीति चटूपमा ॥ ३५ ॥

विरोधोपमां निरूपयति शतपत्रमिति । शतपत्र पद्म शरच्चन्द्रः शारदीयचन्द्र तव आननञ्च एतत् त्वयं परस्पर-विरोधि अन्योन्यस्पर्द्धि शतपत्रे शोभिते चन्द्रस्य मालिन्यं चन्द्रे च शोभिते शतपत्रस्य मालिन्यं प्रसिद्धं तवानने शोभिते च द्वयोरेव मालिन्यं स्यादिति वाग्वैचित्र्यशालिनी । सा प्रसिद्धा विरोधोपमा ॥ ३३ ॥

प्रतिषेधोपमामाह नेति । इन्दो· चन्द्रस्य ते तव मुखेन जातु कदाचित् प्रतिगर्जितुं प्रतिस्पर्द्धितु मदृशीभवितुम् इत्यर्थ शक्तिः सामर्थ्यं नास्ति, यतः कलङ्कित· तथा जडस्य, इत्यत्र प्रतिषेधोपमा सादृश्यप्रतिषेधेन अधिकवैचित्र्यप्रकटनात् निन्दोपमायां निन्दया, इह तु प्रतिषेधेन इत्यनयोर्भेदः ॥ ३४ ॥

चटूपमां निरूपयति मृगीक्षणेति । ते वक्त्रं मृगस्य ईक्षणाभ्याम् अवयवविशेषाभ्याम् अङ्कं चिह्नितं, शशी तु मृगेण सर्वावयवसम्पन्नेनेति भावः अङ्कित । तथापि अधिकसामग्री-सत्त्वेऽपि असौ सम एव तव मुखेनेति शेष न उत्कर्षो नाधिक-वैचित्र्यजनकः । इत्यत्र चटुः प्रियोक्तिः तद्घटितत्वात् चटूपमा अत्र सत्यपि उत्कर्षकारणे न उत्कर्ष इति प्रतिपादनात् विशे-

न पद्म मुखमेवेदं न भृङ्गौ चक्षुषी इमे ।
इति विस्पष्टमाहृद्यात् तत्त्वाख्यानोपमैव सा ॥३६
चन्द्रारविन्दयोः कान्तिमतिक्रम्य मुखं तव ।
आत्मनेवाभवत्तुल्यमित्यसाधारणोपमा ॥ ३७ ॥
सर्वपद्मप्रभासारः समाहृत इव क्वचित् ।

योक्ति । तदुक्त दर्पणकारेण, मति हेतौ फलाभावो विशेषोक्तिस्तथा द्विधा इति तन्मूला च इयं समधिकवैचित्र्यमोतयति नान्यथा, सर्वत्रैवोपमाभेदेषु चाटूक्तिसङ्गावादिति ध्येयम् ॥ ३५ ॥

तत्त्वाख्यानोपमां लक्षयति नेति । इदं पद्मं न मुखमेव भृङ्गौ भ्रमरौ न इमे चक्षुषी नेत्रे, इति इत्थं विशेषेण माहृद्यस्य स्पष्टत्वात् सुव्यक्तत्वात् सा प्रसिद्धा तत्त्वाख्यानोपमा इयमिति शेषः भ्रमनिरासेन तत्त्वस्य आख्यानात् निर्णयोपमाया तत्त्वाख्यानस्य संशयपूर्वकत्वम् इह तु भ्रान्तिपूर्वकत्वम् इत्यनयोर्भेदः ॥ ३६ ॥

असाधारणोपमां लक्षयति चन्द्रेति । तव मुख चन्द्रारविन्दयोः कान्तिं शोभाम् अतिक्रम्य आत्मनैव तुल्यम् अभवत् इति असाधारणोपमा, चन्द्रपद्मयोः कान्त्यतिक्रमेण प्रकृतस्य मुखस्य आत्मनैव साम्यकीर्त्तनेन च औपम्यस्य असाधारणत्वात् । दर्पणकारस्तु एनामन्वयाख्यमलङ्कारमाह । यथा, उपमानोपमेयत्वमेकस्यैव त्वनन्वय इति । एवञ्च द्वयोः साम्यमुपमा न तु एकस्य इति बोद्धव्यम् ॥ ३७ ॥

असंभवोपमा निरूपयति सर्वेति । त्वदाननं क्वचित् सर्वेषां पद्मानां प्रभासारं कान्तिपुञ्जं समाहृत इव विभाति, इत्यत्र

त्वदाननं विभातीति तामभूतोपमां विदुः ॥ ३८ ॥
चन्द्रबिम्बादिव विषं चन्दनादिव पावकः।
परुषा वागिती वक्त्रादित्यसम्भावितोपमा ॥ ३९ ॥
चन्दनोदकचन्द्रांशुचन्द्रकान्तादिशीतलः।
स्पर्शस्तवेत्यतिशयं बोधयन्ती वक्त्रुपमा ॥ ४० ॥

तामभूतोपमां विदुः. प्रभासारसमाहरणस्य तत्त्वतः अभूतत्वात् सम्भावनया औपम्यस्य कीर्त्तनाच्च। दर्पणकारस्तु इमामुत्प्रेक्षालङ्कारमाह। यथा भवेत् सम्भावनोत्प्रेक्षा प्रकृतस्य परात्मना इति। प्राञ्चस्तु प्रकृते अप्रकृतस्य धर्मिणः सम्भावनमुत्प्रेक्षा. इह तु धर्मस्य सम्भावनया इयो साम्यमित्यनयो भेदः ॥ ३८ ॥

असम्भावितोपमां निरूपयति चन्द्रेति। इतः अस्मात् वक्त्रात् परुषा वाक् चन्द्रबिम्बात् विषमिव. चन्दनात् पावक इव. इति अत्र उपमाभ्यां विषपावकनि सरणमिव वदनात् परुषवाङ्नि सरणस्य असम्भावित्वात् असम्भावितोपमा ॥३९॥

वक्त्रुपमां लक्षयति चन्दनेति। तव स्पर्शः चन्दनवत् उदकवत् चन्द्रांशुवत् चन्द्रकान्तवत् आदिपदेन एवंविधपदार्थवत् शीतल इति अतिशयम् अधिकशैत्यम् अधिकवैचित्र्यं वा बोधयन्ती द्योतयन्ती वक्त्रुपमा। एकस्य उपमानबाहुल्यकीर्त्तनात् बहुपदेन इयोरप्युपमानयोः सङ्गावे न इयमुपमा वैचित्र्याणाम् अबाहुल्यात् इति बोध्यम्। दर्पणकारस्तु इमां मालोपमामाह। यथा. मालोपमा यदेकस्योपमान बहु दृश्यते इति ॥ ४० ॥

चन्द्रबिम्बादिवोत्कीर्णं पद्मगर्भादिवोद्धृतम् ।
तव तन्वङ्गि ! वदनमित्यसौ विक्रियोपमा ॥४१॥
पुष्णातप इवाङ्गेव पूषा व्योम्नीव वासरः ।
विक्रमस्त्वय्यधाल्लक्ष्मीमिति मालोपमा मता ॥४२॥
वाक्यार्थेनैव वाक्यार्थः कोऽपि यद्युपमीयते ।
एकानेकोपशब्दत्वात् सा वाक्यार्थोपमा द्विधा ॥४३॥

विक्रियोपमां लक्षयति चन्द्रेति । हे तन्वङ्गि ! तव वदनं चन्द्रबिम्बात् उत्कीर्णमिव, अथवा पद्मगर्भात् उद्धृतमिव इति अत्र चन्द्रबिम्बपद्मगर्भौ प्रकृतीभूतौ वदनस्य प्रस्तुतस्य ताभ्याम् उत्कीर्णत्वात् उद्धृतत्वात् वा विकृतिभावप्रतिपादनात् विक्रियोपमा । उक्तञ्च, उपमेयस्य यत्र स्यादुपमानविकारता । प्रकृतेर्विकृतेः साम्यात् तामाहुर्विक्रियोपमाम् ॥ इति । अत्र च उत्कीर्णत्वोद्धृतत्वयोः धर्मयोः उत्प्रेक्षणात् धर्मिणोश्च साम्यप्रतीतेरुपमैव न तु उत्प्रेक्षा तस्या धर्मिगतत्वेन कीर्त्तनात् इति बोध्यम् ॥ ४१ ॥

मालोपमां निरूपयति पुष्णातीति । पुष्णि सूर्ये आतप इव, अङ्गि दिवसे पूषा सूर्य इव, व्योम्नि आकाशे वासरः दिवसः इव विक्रमः त्वयि लक्ष्मीं अधात् । इत्यत्र मालायां यथा एकेन पुष्पेण अपरस्य पुष्पस्य योगः, तथा उपमानानां परस्परसम्बन्धात् मालोपमा, एवविधवैचित्र्य एव अस्याः सत्त्वात्, बह्वपमायाश्च केवलमुपमानबाहुल्यात् अनयोर्भेदः ॥ ४२ ॥

वाक्यार्थोपमां लक्षयति वाक्यार्थेनेति । वाक्यं पदसमुदायः तस्यार्थः वाक्यार्थः तेन कोऽपि अपरो वाक्यार्थः यदि अनु-

त्वदाननमधीराक्षमाविर्दशनदीधिति ।
भ्रमद्भृङ्गमिवालक्ष्यकेसरं भाति पङ्कजम् ॥ ४४ ॥
नलिन्या इव तन्वङ्ग्यास्तस्याः पद्ममिवाननम् ।
मया मधुव्रतेनेव पायं पायमरम्यत ॥ ४५ ॥
वस्तु किञ्चिदुपन्यस्य न्यसनात् तत्सधर्मणः ।
साम्यप्रतीतिरुक्तीति प्रतिवस्तूपमा यथा ॥ ४६ ॥

मीयते सा वाक्यार्थोपमा. वाक्यार्थयोरुपमानोपमेयत्वकीर्त्तनात्. सा द्विधा एकानेकवशब्दत्वात् क्वचिदेकवशब्दघटिता, क्वचिच्च अनेकवशब्दघटिता इति ॥ ४३ ॥

एकवशब्दां वाक्यार्थोपमाम् उदाहरति त्वदिति । अधीरे चञ्चले अक्षिणी यत्र तत्. आविर्भवन्त्य. दशनानां दीधितयो यत्र तादृश तव आनन भ्रमन्तौ भृङ्गौ यत्र तत् तथा अलक्ष्या ईषल्लक्ष्या केसरा. किञ्जल्का: यस्य तादृश पङ्कजमिव भाति । अत्र पूर्वार्द्धवाक्य परार्द्धेन एकवशब्दघटितेन वाक्येन उपमीयते ॥ ४४ ॥

अनेकवशब्दम् उदाहरति नलिन्या इति । नलिन्या इव तस्याः तन्वङ्ग्या पद्ममिव आननं मधुव्रतेनेव मया पाय पायं पुनः पुनः पीत्वा अरम्यत । अत्र नलिन्या पद्ममिव इति वाक्येन तन्वङ्ग्या आननमिवेति वाक्यार्थस्य उपमितत्वात् अनेकवशब्दघटितत्वाच्च अनेकवशब्दा वाक्यार्थोपमा इति बोध्यम् ॥ ४५ ॥

प्रतिवस्तूपमा निरूपयति वस्त्विति । किञ्चित् वस्तु किमपि प्रकृतम् उपन्यस्य तस्य सधर्मणः समानधर्मस्य कस्यचित्

नेकोऽपि त्वादृगोऽद्यापि जायमानेषु राजसु ।
ननु द्वितीयो नास्त्येव पारिजातस्य पादपः ॥४७॥
अधिकेन समीकृत्य हीनमेकक्रियाविधौ ।
यत् ब्रुवन्ति स्मृता सेयं तुल्ययोगोपमा यथा ॥४८॥

[illegible] साधनात् प्रकृतस्य समर्थनाय उपादानात् साम्य-
[illegible] साम्यात्तयो[illegible] भवति इति इत्थं या साम्यप्रतीतिः
[illegible] सा प्रतिवस्तूपमा इत्यलंकार । दर्पणकारस्तु इमाम् अलङ्कारान्तर-
[illegible] यथा, प्रतिवस्तूपमा सा स्यात् वाक्ययोर्गम्यसाम्ययोः ।
[illegible] धर्मः सामान्यो यत्र निर्दिश्यते पृथक् ॥ इति । यथेति
[illegible] दाहरणप्रदर्शनार्थम् ॥ ४६ ॥

उदाहरणं दर्शयति नेति । जायमानेषु राजसु मध्ये
[illegible] त्वादृग् तव सदृश एकोऽपि नास्ति, ननु भो
[illegible] पारिजातस्य पादप इत्र द्वितीयो नास्त्येव । अत्र सदृशो
[illegible] द्वितीयो नास्तीति साधारणधर्म एव पुनरुक्तिभिया
[illegible] दान्तरेण उपन्यस्तः, साम्यवाच्च गम्यमिति दर्पणकारेण
[illegible] या वैधर्म्येणापि उदाहरणं दर्शितम् । यथा, चकोर्य्य एव
[illegible] शार्वरिकापानकर्मणि । विनावन्तो न निपुणाः सदृशो
[illegible] नर्मणि ॥ अत्र चातुर्य्यनैपुण्याभ्यामपि वाक्यद्वयस्य साम्य-
प्रतीतिरस्तीति बोध्यम् ॥ ४७ ॥

तुल्ययोगोपमा लक्षयति अधिकेनेति । एकक्रियाविधौ एकजातीयक्रियाविधाने हीन न्यून वस्तु अधिकेन अधिक-गुणेन समीकृत्य सदृशीकृत्य यत् ब्रुवन्ति सा इयं तुल्ययोगो-पमा क्रियायामधिकहीनगुणयोः समीकरणादित्यर्थः । तथाच

दिवो जागर्त्ति रक्षायै पुलोमारिर्भवान् भुवः ।
असुरास्तेन हन्यन्ते सावलेपास्त्वया नृपाः ॥ ४९ ॥
कान्त्या चन्द्रमसं धात्रा सूर्य्यं धैर्य्येण चार्णवम् ।
राजन्ननुकरोषीति सैषा हेतूपमा मता ॥ ५० ॥
न लिङ्गवचने भिन्ने न हीनाधिकतापि वा ।
उपमादूषणायालं यत्रोद्वेगो न धीमताम् ॥ ५१ ॥

एकजातीयक्रियया प्रस्तुताप्रस्तुतयोः साम्यकीर्त्तनं तुल्ययोगोपमा इति लक्षणम् । यथेति उदाहरणप्रदर्शनार्थम् ॥ ४८ ॥

तुल्ययोगोपमामाह दिव इति । पुलोमारिः इन्द्र दिव स्वर्गस्य रक्षायै, भवान् भुव. पृथिव्याः रक्षायै जागर्त्ति, तेन इन्द्रेण असुरा हन्यन्ते. त्वया सावलेपाः गर्विताः नृपा. हन्यन्ते । अत्र हीनस्य प्रस्तुतस्य राज्ञः गुणाधिकेन इन्द्रेण एकजातीयक्रियाकरणेन समीकरणात् तुल्ययोगोपमा इति ॥ ४९ ॥

हेतूपमाम् उदाहरति कान्त्येति । सुगमम् । अत्र राज्ञः चन्द्रादिभिः सादृश्यस्य कान्त्यादिहेतुकत्वात् एषा हेतूपमा इति ॥ ५० ॥

इत्युपमां तद्भेदांश्च निरूप्य प्रसङ्गतस्तद्गतान् दोषान् विवक्षुः तेषाञ्च कदाचित् अदूषकत्वमाह नेति । यत्र धीमतां सामाजिकानाम् उद्वेगः प्रतीतिविघातः न भवति तादृशे भिन्ने पृथग्भूते लिङ्गवचने तथा हीनाधिकता हीनपदत्वम् अधिकपदत्वं वा उपमादोषाय न अलं न प्रभवन्तीत्यर्थः । दोषाश्च प्राचीनैरुक्ताः । यथा हीनाधिकत्वं वचनलिङ्गभेदो

स्त्रीव गच्छति षण्डोऽयं वक्त्येषा स्त्री पुमानिव ।
प्राणा इव प्रियोऽयं मे विद्या धनमिवार्जिता॥५२॥

विपर्ययः । समाहृत्यामभवौ च दोषाः समोपमा गता इति । हीनाधिकता च उपमानस्य उपमेयापेक्षया इति बोध्यम् । लिङ्गवचनव्यत्यासे साधर्म्यस्य उभयान्वयाभावेन साम्यस्य सम्यगप्रतीतिः, हीनतायाम् उपमानस्य अपकृष्टत्वावगमात् प्रस्तुतस्य उपमेयस्य अनुत्कर्षः, अधिकपदत्वे च उपमानस्य निकृष्टत्वप्रतीतिरितदेव दोषकारणम्, यत्र तु एतानि कारणानि न सन्ति तत्र एतेषां न दोषावहत्वमिति भावः । कश्चित् तु कालपुरुषविभ्यादिभेदानपि उपमादोषानाहुः तदाकरिलि च क्रमेण । यथा, काव्यभिख्या तयोरासीत् प्रतीतौ गतयेगयोः । हिमनिर्मुक्तयोर्योगे चित्राचन्द्रमसोरिव ॥ अत्र चित्राचन्द्रमसोरभिख्याया न अतीतत्वम् अपितु सार्वकालिकत्वम् । लतेव राजसे तन्वि । अत्र लतापदे राजते इति योज्यम् । चिरं जीवतु ते सूनुर्मार्कण्डेयमुनिर्यथा इति । अत्र मार्कण्डेयमुनिर्यथा जीवतीति प्रयोज्यम् । एते दोषाश्च प्रायश कविभिरगणिता इति बोध्यम् ॥ ५१ ॥

लिङ्गवचनभेदस्य अदूषकत्वं दर्शयति स्त्रीति । अयं षण्ढः स्त्रीव गच्छति, एषा स्त्री पुमानिव वक्ति । अत्र क्रियाद्वयस्य साधारणधर्मस्य उभयत्रान्वयात् लिङ्गभेदेऽपि न दोषः । अयं जन मे प्राणा इव प्रियः, तथा विद्या धनमिव अर्जिता । इत्येतयोरुपमानयोः वचनभेदेऽपि साधारणधर्मद्वयस्य वचनविपरिणामेन अन्वये धीमता न प्रतीतिव्याघात इति न दोषावहः । एवमुभयत्र अन्वययोग्यक्रियया वचनभेदेऽपि न

भवानिव महीपाल! देवराजो विराजते।
अलमंशुमतः कक्षामारोढुं तेजसा नृपः॥ ५३॥
इत्येवमादौ सौभाग्यं न जहात्येव जातुचित्।
अस्त्येव क्वचिदुद्वेगः प्रयोगे वाग्विदां यथा॥५४॥

दोषः। यथा, तद्देगोऽमद्गोऽन्यासि स्त्रीभिर्मधुरतामृत। दधते स्म परा शोभा तदीया विरहमा इव। अत्र दधते इति क्रियापद धारयतेर्वेकृवचनान्तस्य तथा दधधातोरेकवचनान्तस्येति उभयवान्वये न कश्चिद् बाध। एवमन्यान्यपि महाकविप्रयुक्तानि सन्तीति अवधेयम्।' ५२॥

हीनतायामधिकतायाञ्च दोषाभाव दर्शयति भवानिति। हे महीपाल! देवराज भवानिव विराजते। अत्र उपमानस्य राज्ञ मनुष्यत्वात् उपमेयदेवराजापेक्षया न्यूनत्व स्वत सिद्धमपि राज्ञ लोकपालाशसम्भृतया न अत्यन्त वैरस्यम् आवहतीति न दोष. राज्ञश्च लोकपालाशसम्भृतत्वे प्रमाण यथा अष्टाना लोकपालाना वपुर्धारयते नृप इति। इयन्तु विपर्य्यासोपमालङ्कृति अन्यत्र प्रायश एव दोष सञ्चरतीति बोध्यम्। अपिच. उल्लङ्घितकुरङ्गोऽयमृक्षसरङ्गमध्यग। विधुव्याघ्र इवाभाति हन्तु विरहदुर्बलान्।' इति। अत्र श्लिष्टविशेषणेन निकृष्टस्यापि व्याघ्रस्य उपमानत्व न दोषादेति। नृप. तेजसा अशुमत सूर्य्यस्य कक्षा मार्गमिति यावत् आरोढुम् अल समर्थ। अत्र नृपस्य उपमानम् अशुमान् देवत्वादधिक इति। एवमन्यत्रापि द्रष्टव्यम्।' ५३॥

इत्येवमादौ उत्कर्षे एवमादिप्रयोगे जातुचित् कदाचित् सौभाग्यम् न जहाति त्यजति एव, क्वचित् प्रयोगे तु वाग्-

हंसीव धवलश्चन्द्रः सरांसीवामलं नभः ।
भर्तृभक्तो भटः स्वेव खद्योतो भाति भानुवत् ॥५५
ईदृशं वर्ज्यते सद्भिः कारणं तत्र चिन्त्यताम् ।
गुणदोषविचाराय स्वयमेव मनीषिभिः ॥ ५६ ॥
इववत् वा यथाशब्दाः समाननिभसन्निभाः ।
तुल्यसङ्काशनीकाशप्रकाशप्रतिरूपकाः ॥ ५७ ॥
प्रतिपक्षप्रतिद्वन्द्विप्रत्यनीकविरोधिनः ।
सदृक्षसदृशसवादिसजातीयानुवादिनः ॥ ५८ ॥

[illegible] उद्वेग प्रतीतिव्याघात अस्ति । यथेति उदा [illegible] ॥ ५४ ॥

उदाहरति हंसीवेति । चन्द्र हंसीव धवल, नभ सरांसीव अमल, भट मेनिज स्वा इव भर्तृभक्त, स्वाम्यनुरक्त स्वया खद्योत भानुवत् भाति । अत्र यथाक्रमम् उपमानाना लिङ्गभेद वचनभेद न्यूनत्वम् अधिकत्वच्च सामाजिकाना [illegible] मापद्यतीति तेषां दूषकत्व नैयायिकमिति भाव ॥५५॥

उपमाकरति इदृशमिति । सद्भि सुधीभि ईदृश काव्य वर्ज्यते त्यज्यते न प्रयुज्यते नादियते च इति भाव । मनीषिभि सहृदये स्वयमेव तत्र वर्जने गुणदोषविचाराय चिन्त्य ताम् । ५६ ॥

उपमाप्रतीतिरभिधया लक्षणया व्यञ्जनया च भवतीति तस्या वाचकादीनि निरूपयति इवेत्यादि । इवाद्युपमान्ता शब्दा वाचका, वदिति, कल्पदेश्यदेशीया इति च तद्धित-प्रत्ययाश्च वाचकेषु अन्तर्भवन्ति । वा इत्यस्योपलक्षणत्वात् च-

प्रतिबिम्बप्रतिच्छन्दसरूपसमसम्मिताः ।
सलक्षणसदृक्षाभसपक्षोपमितोपमाः ॥ ५९ ॥
कल्पदेशीयदेश्यादिप्रख्यप्रतिनिधी अपि ।
सवर्णतुलितौ शब्दौ ये चान्यूनार्थवादिनः ॥ ६० ॥
समासश्च बहुव्रीहिः शशाङ्कवदनादिषु ।
स्पर्द्धते जयति द्वेष्टि द्रुह्यति प्रतिगर्जति ॥ ६१ ॥
आक्रोशत्यवजानाति कदर्थयति निन्दति ।
विडम्बयति सम्भवत्ते हसतीर्ष्यत्यसूयति ॥ ६२ ॥
तस्य सुष्णाति सौभाग्यं तस्य कान्तिं विलुम्पति ।
तेन सार्द्धं विगृह्णाति तुलां तेनाधिरोहति ॥६३॥
तत्पदव्यां पद धत्ते तस्य कक्षां विगाहते ।
तमन्वेत्यनुवध्नाति तच्छीलं तन्निषेधति ॥ ६४ ॥
तस्य चानुकरोतीति शब्दाः सादृश्यसूचकाः ।
उपमायामिमे प्रोक्ताः कवीनां बुद्धिसौख्यदाः ॥६५॥

इत्युपमाचक्रम् ।

शब्दोऽपि तस्यापि औपम्यवाचित्वात् । निभादय शब्दा समासान्तर्गता एव निर्दिश्यन्ते । अन्यूनार्थवादिन. अहीनार्थवाचकाः । समासश्च बहुव्रीहि, कर्मधारयश्चेति वक्तव्यम्, यथा, पुरुषव्याघ्र इत्यादि । शशाङ्क इव वदनं यस्या इति बहुव्रीहौ मध्यपदलोप. । स्पर्द्धते इत्याद्यसूयतीत्यन्ता शब्दा लक्षका. तस्या सुष्णातीत्यादिनिषेधतीत्यन्ता. व्यञ्जका. ।

उपमैव तिरोभूतभेदा रूपकमुच्यते ।
यथा बाहुलता पाणिपद्मं चरणपल्लवः ॥ ६६ ॥

तच्छीलमिति. तस्य शील स्वभावमित्यर्थः अनुबध्नाति अनुकरोति इत्यर्थः । तत् तच्छीलमित्यर्थं निषेधति तद्वत् आचरितुं वारयति इत्यर्थः । इमे कवीना बुद्धिमौख्यदा रान सौख्यविधायिन माहृश्यसूचका माहृश्यबोधका शब्दा उपमाया योक्ता निर्दिष्टा औपम्यद्योतनाय प्रयुज्यन्ते इत्यर्थ ॥५७—६५॥

इति उक्तरूपम् उपमायाश्च प्रकरणमित्यर्थ ।

सम्प्रति रूपक निरूप्यते उपमेति । तिरोभूत अन्तर्भूत भेदः प्रकृताप्रकृतयो विशेषज्ञान यत्र तादृशी उपमा एव रूपकम् उच्यते कविभि इति शेष । तथाच उपमानोपमेययो भेदप्रतीतिपर्यन्तमाम्य रूपकमिति लक्षणम् उपमायान्तु भेदप्रतीतिर्नास्तीत्यनयोर्भेद । इह तु अभेदप्रतीति साध्यत्वा, अतिशयोक्तौ च निह्नुतेति अनयोर्भेदश्च बोद्धव्य । यथा. बाहुर्लतेत्यादि बाहुरेव लता बाहुलता, पाणिरेव पद्म पाणिपद्म, चरण एव पल्लव चरणपल्लव । अत्र रूपककर्मधारय आर्ये यथा, बाहुरेव लतेत्यादि । अत्र बाहौ लता त्वारोप बाहुर्लता इवेत्याद्युपमापेक्षया ममधिक वैचित्र्यम् आवहति इति बोध्यम् । मुखचन्द्र पश्यामीत्यादौ मुख चन्द्र इव इत्युपमितसमासस्य तथा मुखमेव चन्द्र इति रूपकसमास स्यापि सम्भवात् उभयो सङ्कर इति । यत्र तु साधर्म्य उपमेये मुख्यतया, उपमाने तु उपचरितत्वेन स्थित तत्र उपमाया प्राधान्य यत्र च उपमाने मुख्यतया, उपमेये च उपचारेण स्थित तत्र रूपकस्य प्राधान्य यथा, मुखचन्द्र चुम्बतीत्यादौ

अङ्गुल्यः पल्लवान्यासन् कुसुमानि नखार्चिषः ।
वाङ्ग लतं वसन्तश्रीस्त्वं नः प्रत्यक्षचारिणी ॥६७॥
इत्येतदसमस्ताख्यं समस्तं पूर्वरूपकम् ।
स्मितं मुखेन्दोर्ज्योत्स्नेति समस्तव्यस्तरूपकम् ॥६८॥
ताम्राङ्गुलिदलश्रेणि नखदीधितिकेसरम् ।

उपमा एव तथा मुखचन्द्र प्रकाशते इत्यादौ रूपकमेव न तु उभयो' सङ्कर इति बोध्यम् ॥ ६६ ॥

व्यस्तरूपकस्य उदाहरणमाह अङ्गुल्य इति। त्व न अस्माक प्रत्यक्षचारिणी परिदृश्यमाना वसन्तश्री'। तथाहि. ते अङ्गुल्य. पल्लवानि नखार्चिषः कुसुमानि, वाङ्ग लतं। अत्र लिङ्गभेदप्रदर्शनेन। रूपके लिङ्गभेदो न दोषोवह इति सूच्यते। कदाचित् वचनभेदोऽपि न दोषाय। यथा. शास्त्राणि चक्षुर्नवमित्यादि। अत्र शास्त्राणि इत्यनेन सर्वशास्त्रज्ञानस्य लाभात् ज्ञानस्य च एकजातीयत्वात् बहुवचनान्तमपि एकवचनान्तवत् भासते। अनीदृशस्थाने तु दोषाय। यथा. मुख पद्मानीत्यादि ॥ ६७ ॥

इतीति। इति पूर्वोक्तमेतत् अङ्गुल्य इत्यादि असमस्ताख्यम् असमस्तरूपकम् इत्यर्थ, तत्पूर्वरूपकन्तु वाङ्ग लतंत्यादि समस्तरूपकम्। स्मित मृदुहास्य मुखेन्दो मुखमेव इन्दु तस्य ज्योत्स्ना इति। समस्तव्यस्तरूपकम् उभयमिश्ररूपकम् इत्यर्थः। तथाच, स्मित ज्योत्स्ना इति व्यस्त मुखेन्दोरिति समस्तम् ॥ ६८ ॥

सकलरूपक निरूपयति ताम्रेति। ताम्राङ्गुलय एव दलश्रेणय: यस्य, तथा नखानां दीधितय किरणा एव केसरा यस्य

ध्रियते मूर्ध्नि भूपालैर्भवच्चरणपङ्कजम् ॥ ६९ ॥
पङ्कजादौ दलादित्व पादे चारोप्य पद्मताम् ।
तद्योग्यस्थानविन्यासादेतत् सकलरूपकम् ॥७०॥
अकस्मादेव ते चण्डि ! स्फुरिताधरपल्लवम् ।
मुख मुक्तारुचो धत्ते घर्माम्भःकणमञ्जरीः ॥ ७१ ॥

तादृग भवच्चरण एव पङ्कजं तत् भूपालैः मूर्ध्नि ध्रियते । अत्र पङ्कजादौ दलादित्व दलश्रेणित्वं तथा पादे चरणे पद्मतां पङ्कजत्वम् आरोप्य तस्य पङ्कजस्य योग्ये स्थाने शिरसि इत्यर्थः विन्यासात् धारणात् एतत् सकलरूपक सम्पूर्णरूपक सर्वावयवस्य रूपणात् । अत्र मूर्ध्नि धारणरूपस्य साधारणधर्मस्य उपमाने पङ्कज एव औचित्यात् रूपकसमासः न तु उपमितसमास उपमेयस्य चरणस्य मूर्ध्नि धारणायोग्यत्वात् इत्युक्तमेव प्राक् । दर्पणकारस्तु इद माङ्गरूपकमाह । यथा, अङ्गिनो यदि माङ्गस्य रूपण माङ्गमेव तत् । यथा, रावणावग्रहक्लान्तमिति वागमृतेन म । अभिहत्य मरुच्छस्य क्षणमेघस्तिरोदधे ॥ इति ॥ ६९ ॥ ७० ॥

अवयवरूपक निरूपयति अकस्मादित्यादि । हे चण्डि । अतिकोपने । चण्डस्त्वत्यन्तकोपन इत्यमर । ते तव मुखम् अकस्मादेव स्फुरित कम्पितः अधर एव पल्लवः यत्र तादृशं सत् मुक्ताना रुच इव रुच कान्तयो यासा तादृशीः घर्माम्भसां कणा एव मञ्जर्य ताः धत्ते धारयति । अत्र घर्माम्भः मञ्जरीकृत्य मञ्जरीत्वेन आरोप्य तथा अधर पल्लवीकृत्य पल्लवत्वेन आरोप्य आस्य मुख न अन्यथाकृत पद्मत्वेन न आरोपितम् । अत अवयवमात्ररूपणात् अवयवरूपकम् । मुखे पद्मत्वारो-

मञ्जरीकृत्य घर्माम्भः पल्लवीकृत्य चाधरम् ।
नान्यथाकृतमवास्यमतोऽवयवरूपकम् ॥७२॥
वलितभ्रु गलद्घर्म जलमालोहितेक्षणम् ।
विद्दणोति मदावस्थामिदं वदनपङ्कजम् ॥ ७३ ॥
अविकृत्य सुखाङ्गानि सुखमेवारविन्दताम् ।
आसीत् गमितमवेदमतोऽवयविरूपकम् ॥ ७४ ॥
मदपाटलगण्डेन रक्तनेत्रोत्पलेन ते ।
मुखेन सुरधः सोऽप्येष जनो रागमयः कृतः ॥७५॥

पस्तु अर्थवशात् उद्भेद । दर्पणकारस्तु इदमेकदेशविवर्त्ति-रूपकमाह । यथा. यत्र कस्यचिदार्थत्वमेकदेशविवर्त्ति तत् इति ॥ ७१ ॥ ७२ ॥

अवयविरूपकं निरूपयति वलितेति । वलिते भ्रुवौ यत्र तत् चलितभ्रूयुगलं गलन्ति घर्मजलानि यस्मात् तादृशं तथा आलोहिते आरक्ते ईक्षणे यस्य तथाभूतम् इद वदनमेव पङ्कज मदावस्थां मद्यपानजनितां दशां विद्दणोति । अत्र मुखानि अविकृत्य पङ्काङ्गत्वेन अनारोप्य मुखमेव अरविन्दतां गमितं पङ्कजत्वेन आरोपितम्, अतः अवयविभावस्य रूपणात् अवयविरूपकमिदम् । अत्र उपमा एव साधीयसी न रूपक साधारणधर्मस्य भ्रूवलनादिकस्य उपमेये वदने एव मुख्यतया वर्त्तनात् पङ्कजे च उपचरितत्वात् अतः वदनमम्बुजम् इति पाठ एव साधीयानिति सुधीभिः विचार्य्यम् । दर्पणकारस्तु इद निरङ्गरूपकमाह ॥ ७३ ॥ ७४ ॥

अवयवरूपकस्य विशेषान् दर्शयति मदेत्यादि । स एष

एकाङ्गरूपकञ्चैतदेवं द्विप्रभृतीन्यपि ।
अङ्गानि रूपयन्त्यत्र योगायोगौ भिदाकरौ ॥ ७६ ॥
स्मितपुष्पोज्ज्वलं लोलनेत्रभृङ्गमिदं मुखम् ।
इति पुष्पद्विरेफाणां सङ्गत्या युक्तरूपकम् ॥ ७७ ॥
इदमार्द्रस्मितज्योत्स्नं स्निग्धनेलोत्पलं मुखम् ।
इति ज्योत्स्नोत्पलायोगादयुक्तं नाम रूपकम् ॥७८॥

जनोऽपि तं तत्र मदेन पाटली गण्डौ यस्य तेन तथा रक्ते नेत्रे एव उत्पले यस्य तादृशेन मुखेन मुग्ध तथा रागमयः अनुरागपूर्ण इत्यर्थ क्षत इत्यन्वय । अत्र रक्तनेत्रोत्पलेनेति एकाङ्गमात्ररूपणात् एकाङ्गरूपकमिदम् । एव यत्र अङ्गद्वयेन रूपण तत्र द्वाङ्गरूपकम । एव त्र्याङ्गरूपकादि । अत्र अवयवरूपके अङ्गानि रूपयन्ति अप्रस्तुतत्वेन आरोपयन्ति न तु अङ्गिनम् इति शेष, अत अङ्गस्य अङ्गयोः अङ्गाना वा योगः अयोगश्च भिदाकरौ भेदकौ ॥ ७५ ॥ ७६ ॥

अथ युक्तरूपक निरूपयति स्मितेति। स्मितमेव पुष्पं स्मितपुष्प तेन उज्ज्वल लोले नेत्रे एव भृङ्गौ यत्र तादृशम् इद मुखमित्यत्र पुष्पद्विरेफाणां सङ्गत्या योगेन स्मिते पुष्पत्वस्य नेत्रे भ्रमरस्य समारोपेणेत्यर्थ. युक्तरूपकमिदम् ॥७७॥

अयुक्तरूपकमाह इदमिति। आर्द्रं स्मितमेव ज्योत्स्ना यत्र तत् तथा स्निग्धे नेत्रे एव उत्पले पद्मे यत्र तादृशं मुखम् इत्यत्र ज्योत्स्नोत्पलायोगात् ज्योत्स्नया उत्पलस्य अयोगात् भिन्नकालीनत्वादुभयोरिति भावः, अयुक्त नाम रूपकम ॥ ७८ ॥

रूपणादङ्गिनोऽङ्गानां रूपणारूपणाश्रयात् ।
रूपकं विषमं नाम ललितं जायते यथा ॥७९॥
मदरक्तकपोलेन मन्मथस्त्वन्मुखेन्दुना ।
नर्त्तितभ्रूलतेनालं मर्दितुं भुवनत्रयम् ॥ ८० ॥
हरिपादः शिरोलग्नजह्नुकन्याजलांशुकः ।
जयत्यसुरनिःशङ्कसुरानन्दोत्सवध्वजः ॥ ८१ ॥
विशेषणसमग्रस्य रूपं केतोर्यदीदृशम् ।
पादे तदर्पणादेतत् सविशेषणरूपकम् ॥ ८२ ॥

विषमरूपकमुदाहरति रूपणादिति। अङ्गिनः रूपणात् तथा अङ्गानां तदवयवानां रूपणारूपणात् कस्यचिदङ्गस्य रूपणात् कस्यचित् वा अरूपणात् ललितं सुन्दरं वैचित्र्यजनकमित्यर्थः विषमं नाम रूपणं जायते, यथा मदेन रक्तौ कपोलौ यस्य तेन तथा नर्त्तिते भ्रुवौ एव लते यत्र तादृशेन त्वन्मुखमेव इन्दुस्तेन मन्मथः भुवनत्रयं मर्दितुं जेतुम् अलं समर्थः। अङ्गिनि मुखे इन्दुत्वारोपः तथा तदङ्गीभूतयोर्भ्रुवोः लतात्वारोपः कपोलयोस्तु नारोप इति वैषम्यम् ॥ ७९ ॥ ८० ॥

सविशेषणरूपकं निर्दिशति हरीति। शिरसि अग्रभागे लग्नं जह्नुकन्यायाः गङ्गायाः जलमेव अंशुकं क्षेतवसनाञ्चलं यस्य सः तथा असुरेभ्यः निःशङ्का ये सुराः देवाः बलिदमनात् इति भावः तेषामानन्दोत्सवस्य ध्वजः हरिपादः वामनचरणः जयति। विशेषणसमग्रस्य सविशेषणस्य केतोर्ध्वजस्य यत् ईदृशम् उक्तरूपं रूपं, पादे चरणे तस्य अर्पणात् आरोपात् सविशेषणरूपकमिदम् ॥ ८१ ॥ ८२ ॥

न मीलयति पद्मानि न नभोऽप्यवगाहते ।
त्वन्मुखेन्दुर्ममासूनां हरणायैव कल्पते ॥८३॥
यत्क्रिया चन्द्रकार्य्यागामन्यकार्य्यस्य च क्रिया ।
यत सन्दर्श्यते यस्माद् विरुद्धं नाम रूपकम् ८
गाम्भीर्य्येण समुद्रोऽसि गौरवेणासि पर्वतः ।
कामदत्वान्न लोकानामसि त्वं कल्पपादप॥८८॥
गाम्भीर्य्यप्रमुखैरत्र हेतुभिः सागरो गिरिश्च नैवे
कल्पद्रुमश्च क्रियते तदिदं हेतुरूपकम् ॥ ८अनु-

काङ्ग-
रूपण
पके
नम्
गश्च
म

विरुद्धरूपकं निरूपयति नेत्यादि। तव मुखमेव इन्दु
न मीलयति न सङ्कोचयति अप्रकाशादिति भाव,
प्रकाशान्न अवगाहते न उत्तिष्ठति अवनतत्वात् इति
भाव। मम अस्मना प्राणाना हरणाय एव कल्पते स
मानिनी प्रत्युक्तिरियम्। अत्र चन्द्रस्य आरोप्यमाणस्य कार्य
पद्मनिमीलनादेर्नामक्रियाऽननुष्ठान प्रत्युत अन्यस्य
कार्य्यस्य प्राणहरणरूपस्य क्रिया यस्मात् सन्दर्श्यते तस्मा
विरुद्ध नाम रूपकम् उपमेयस्य मुखस्य उपमानाभि
उपमानकार्य्यकारित्वस्य ध्वौचित्यात् तदन्यकार्य्यकरण
विरोधाभास इति बोध्यम् ॥ ८३ ॥ ८४ ॥

हेतुरूपक निरूपयति गाम्भीर्य्येणेत्यादि। गाम्भीर्य्येण
दरवगाहायत्वेन समुद्र असि, गौरवेण सारवत्तया पर्वत
असि, तथा लोकाना कामदत्वात् कल्पपादप असि, सर्वत्र
हेतौ तृतीया। अत्र गाम्भीर्य्यप्रमुखै. हेतुभिः उपमेये सागर

राजहंसोपभोगार्हं भ्रमरप्रार्थ्यसौरभम्।
सखि! वक्त्राम्बुजमिदं तवेति श्लिष्टरूपकम् ॥८७॥
इष्टं साधर्म्यवैधर्म्यदर्शनाद् गौणमुख्ययोः।
नो साव्यतिरेकाख्यं रूपकद्वितयं यथा ॥ ८८ ॥
हरि[illegible]लोहितच्छायो मदेन सुखचन्द्रमाः।
जयत्युदयरागस्य चन्द्रस्य प्रतिगर्जति ॥ ८९ ॥
विशेषण
पादे [illegible]ा कल्पद्रुम क्रियते आरोप्यते तत् तस्मात् हेतु-
[illegible]रोपणात् हेतुरूपकमिदम् ॥ ८५ ॥ ८६ ॥

विरूपक निरूपयति राजेति। हे सखि! तव इद वात् त्वन्मुख राजहंस राजश्रेष्ठः हसविशेषश्च तस्य उप-दङ्गस्य सम्भोगयोग्य भ्रमर कामुक षट्पदश्च तस्य प्रार्थ्य चित्रार्थं सौरभ यस्य तादृशं, राजहंसस्तु कादम्बे कलहंसे रक्तौ ल। भ्रमर कामुके भृङ्गे इति च मेदिनी। इत्यत्र श्लिष्ट-त्वेन साधारणधर्मस्य राजहंसोपभोगार्हत्वादिरूपस्य श्लेष-समर्पणात् इति। ८७ ॥

लतोपमारूपक व्यतिरेकरूपकञ्च निरूपयति इष्टमिति। योगात् आरोप्यमाण चन्द्रादिगौण आरोपविषय. मुख-स्य मुख्य तयो साधर्म्यदर्शनात् साधारणधर्मयोगात् उपमा-रूपक वैधर्म्ययोगात् व्यतिरेकरूपकम् इष्टं कविभिः इति शेषः। यथेति उदाहरणार्थम् ॥ ८८ ॥

उपमारूपकमुदाहरति अयमिति। मदेन मद्यपानेन आलोहिता आरक्ता छाया यस्य तादृशः अय सुखमेव चन्द्रमाः सन्नद्धः समुज्ज्वलः उदयरागः उदयकालीनलौहित्यं यस्य तथा-

चन्द्रमाः पीयते देवैर्मया त्वन्मुखचन्द्रमाः ।
असमग्रोऽप्यसौ शश्वदयमापूर्णमण्डलः ॥ ९० ॥
मुखचन्द्रस्य चन्द्रत्वमित्यमन्योपतापिनः ।
न ते सुन्दरि ! संवादीत्येतदाक्षेपरूपकम् ॥९१॥
मुखेन्दुरपि ते चण्डि ! मां निर्दहति निर्दयम् ।

भूतस्य चन्द्रस्य प्रतिगर्जति, चन्द्रस्येति कर्मणि षष्ठी। तथाभूत चन्द्रं स्पर्द्धते न तु अनुकरोतीत्यर्थः। अत्र चन्द्राभिन्नतया आरोपविषयस्य मुखस्य औपम्यसूचकप्रतिगर्जनरूपसाधर्म्यगमनात् उपमारूपकमिदम् ॥ ८९ ॥

व्यतिरेकरूपकमुदाहरति चन्द्रमा इति। देवैः असमग्रोऽपि अमो चन्द्रमा शश्वत् पीयते, मया तु आपूर्णमण्डलः सम्पूर्णप्रकाशः अयं तव मुखमेव चन्द्रमाः पीयते। अत्र मुख्यगौणयोर्मुखचन्द्रयोः सम्पूर्णत्वासम्पूर्णत्वरूपवैधर्म्ययोगात् व्यतिरेकरूपकमिदम्। अयञ्च व्यतिरेकः उपमेयस्य उपमानात् समधिकमुत्कर्षं व्यञ्जयति ॥ ९० ॥

आक्षेपरूपकं निरूपयति मुखेति। हे सुन्दरि ! अन्योपतापिनः कमलसन्तापकस्य अथवा विरहिजनपीडकस्य चन्द्रस्य इति शेषः, चन्द्रत्वं ते तव मुखमेव चन्द्रः तस्य न संवादि नानुकारकं न सदृशमित्यर्थः। चन्द्रः परोपतापकरः त्वन्मुखन्तु सर्वाह्लादकमिति भावः। एतत् आक्षेपो निन्दा, चन्द्रस्य उपमानभूतस्य परपीडकत्वेन निन्दाप्रकटनात् आक्षेपाख्यं रूपकम् ॥ ९१ ॥

समाधानरूपकं निर्दिशति मुखेन्दुरिति। हे चण्डि !

भाग्यदोषात् ममैवेति तत्समाधानरूपकम् ॥८२॥

सुखपङ्कजरङ्गेऽस्मिन् भ्रूलतानर्त्तकी तव।
लीलानृत्यं करोतीति रम्यं रूपकरूपकम् ॥८३॥

नैतत्सुखमिदं पद्मं न नेत्रे भ्रमराविमौ।
एतानि केसराण्येव नैता दन्तार्चिषस्तव ॥८४॥

सुखादित्वं निवर्त्त्यैव पद्मादित्वेन रूपणात्।
उद्भावितगुणोत्कर्षं तत्त्वापह्नवरूपकम् ॥ ८५ ॥

लोचने। ममैव भाग्यदोषात् ते सुखमेव इन्दुरपि मा निर्दय निर्दहति तापयति। इति अत्र समाधानात् भाग्यदोषान्ममेति स्वयं हेतुवादप्रदर्शनात् एतत् समाधानरूपकम् ॥ ८२ ॥

रूपकरूपक लक्षयति सुखेति। अस्मिन् तव मुखमेव पङ्कज तदेव रङ्ग नृत्यशाला तस्मिन् भ्रूरेव लता सा एव नर्त्तकी लीलानृत्य करोति एतत् रम्यम् अतिमनोहर रूपक-रूपक रूपितस्यापि रूपणात्. तथाच प्रथम मुखे पङ्कजत्वा-रोप तदनन्तरञ्च मुखपङ्के रङ्गत्वारोप एव भ्रुवि लतात्वा-रोप तदनन्तर लताया नर्त्तकीत्वारोप इति। इदञ्च समासे एव बोध्यम्. असमासे तु एकस्मिन् बहुनामारोपे हेतुमति हेतुरूपकम् अहेतुके मालारूपकमिति ॥ ८३ ॥

तत्त्वापह्नवरूपक निरूपयति नेत्यादि। एतत् तव मुख न पद्मं, न नेत्रे इमौ भ्रमरौ, एतानि केसराणि किञ्जल्का, एता दन्तार्चिष. न। अत्र सुखादित्व सुखत्वादिक निवर्त्त्य प्रतिषिध्य एव पद्मादित्वेन पद्मत्वादित्वेन रूपणात् मुखादिषु पद्मत्वादिभिरध्यासात् एतत् उद्भावित. व्यञ्जित. गुणस्य उप-

न पर्य्यन्तो विकल्पानां रूपकोपमयोरतः ।
दिङ्मात्रं दर्शितं धीरैरनुक्तमनुमीयताम् ॥ ९६ ॥

रूपकचक्रम् ।

जातिक्रियागुणद्रव्यवाचिनैकत्र वर्त्तिना ।
सर्ववाक्योपचारश्चेत् तमाहुर्दीपकं यथा ॥ ९७ ॥

मेयगतस्य उत्कर्षं वैचित्र्यातिशयः यत्र तत् तत्त्वापह्नवरूपक तत्त्वस्य याथार्थ्यस्य मुखत्वादिकस्य अपह्नवमूलकत्वादित्यर्थः । दर्पणकारस्तु इदमपह्नुतिमेवाह । यथा प्रकृत प्रतिषिध्यान्यस्यापनं स्यादपह्नुतिरिति । रूपकलक्षणञ्च निरपह्नुतिरेवाह । यथा, रूपक रूपितारोपो विषये निरपह्नवे इति ॥ ९४ ॥ ९५ ॥

रूपक मङ्गति नेति । रूपकस्य उपमायाश्च विकल्पाना विशेषाणा पर्य्यन्त शेष न अस्तीति शेष, अतः दिङ्मात्रं प्रदर्शनमात्र दर्शित मया इति शेषः, अनुक्तम् अकथित धीरैः धीमद्भि अनुमीयताम् अनुमानेन ज्ञायताम् ॥ ९६ ॥

रूपकाणा चक्र मङ्गति. इदमिति शेषः ।

अथ दीपकमाह जातीति । एकत्र प्रबन्धस्य यस्मिन् कस्मिंयित् अंगे आदावन्ते मध्ये वा इत्यर्थः । वर्त्तिना स्थितेन जातिवाचकेन क्रियावाचकेन गुणवाचकेन वा द्रव्यवाचकेन एकेन पदेन यदि सर्वस्य वाक्यस्य प्रबन्धघटकस्य उपचार उपकार अन्वयोपपत्तिरित्यर्थः । यदि भवति तं दीपकम् आहुः दीपस्य एकदेशस्थितस्य अपि देशान्तरीयपदार्थप्रकाशनवत् अस्य सर्वोपकारकपदमूलकत्वात् इति भावः । दर्पणकारस्तु अप्रस्तुतप्रस्तुतयोर्दीपकन्तु निगद्यते । अथ कारकमेक स्यादनेकासु क्रियासु चेति लक्षणमाह ॥ ९७ ॥

पवनो दक्षिणः पर्णं जीर्णं हरति वीरुधाम्।
स एवावनताङ्गीनां मानभङ्गाय कल्पते ॥९८॥
चरन्ति चतुरम्भोधिवेलोद्यानेषु दन्तिनः।
चक्रवाकाद्रिकुञ्जेषु कुन्दभासो गुणाश्च ते ॥९९॥
श्यामलाः प्राहृषेण्याभिर्दिशो जीमूतपङ्क्तिभिः।
भुवश्च सुकुमाराभिर्नवशाहलराजिभिः ॥१००॥

तत्र जातिगतदीपकमुदाहरति पवन इति। दक्षिण पवनः वीरुधां लतानां जीर्णं पर्णं पत्रं हरति। स एव पवनः अवनताङ्गीनां मानभङ्गाय कल्पते प्रभवति तस्य अतीवोद्दीपकत्वात् इति भावः। अत्र पूर्वार्द्धवाक्ये पवन इति जातिवाचकं पदम् उत्तरार्द्धवाक्ये च स एवेति तच्छब्दपरामर्शात् पवन एव अवगम्यते अतः एकेन पवनेन पदस्यसर्वपादैरेव समन्वयात् जातिगतं दीपकमिदम्। ९८॥

क्रियादीपकमाह चरन्तीति। दन्तिनः दिग्गजाः, ते तव कुन्दभासः शुभ्राः गुणाश्च चतुरम्भोधिवेलोद्यानेषु तथा चक्रवाकाद्रिकुञ्जेषु चरन्ति, तव यशांसि विश्वव्यापकानीति भावः। अत्र एकेन चरन्तीति क्रियापदेन चकारबलयोगात् उभयान्वयोः वाक्यान्वयोपपत्तेः क्रियादीपकमिदम्। ९९।

गुणदीपकमाह श्यामला इति। दिशः प्राहृषेण्याभिः वार्षिकीभिः जीमूतपङ्क्तिभिः मेघराजिभिः भुवश्च सुकुमाराभिः कोमलाभिः नवशाहलराजिभिः श्यामलाः। अत्र श्यामला इति गुणवाचकेन दिशः इति पदस्य तथा चकारबलयोगात् भुवः इति पदस्य समन्वयात् गुणदीपकमिदम्। १००

विष्णुना विक्रमस्थेन दानवानां विभूतयः ।
क्वापि नीताः कुतोऽप्यानन्नानीता देवतर्द्धयः १०१
इत्यादिदीपकान्युक्तान्येवं मध्यान्तयोरपि ।
वाक्ययोर्दर्शयिष्यामः कानिचित्तानि तद्यथा॥१०२॥
नृत्यन्ति शिखिनोत्मङ्गे गायन्ति च कलापिनः ।
प्रावृषि प्रणयिनीषु दृशो हर्षाश्रुगर्भिणीः ॥१०३॥

इत्यादीपकमपरं विष्णुनेति । विक्रमस्थेन त्रिविक्रमेण विष्णुना दानवानां बलिप्रभृतीनां विभूतय क्वापि नीता, तथा देवानामप्य इन्द्रादीनाम् ऋद्धय कुतोऽपि आनीता प्रापितेति । अत्र विष्णुनेति एकव्यक्तिवाचितया द्रव्येण पूर्ववाक्यं बलिनोऽपि पुनरुक्तवाक्येन अन्वयात् द्रव्यरूपकमिदम् ॥ १०१ ॥

इत्यादिदीपकान्युक्ता मध्यान्तयोरपि दीपकानि वक्तु प्रतिजानीते इतीति । इति उक्तप्रकारेण आदिदीपकानि आदिपदगतानि जात्यादिदीपकानि उक्तानि, एव आदिदीपकवत् मध्यान्तयोरपि वाक्ययो कानिचित् तानि दीपकानि दर्शयिष्याम यथेति वक्ष्यमाणोदाहरणार्थम् ॥ १०२ ॥

जातिगतमध्यदीपकमाह नृत्यन्तीति । कलापिन. मयूरा शिखिनस्य स्वनवेतनस्य उत्सङ्गे अधोभागे नृत्यन्ति, गायन्ति केकारवान् कुर्वन्ति तथा पयोदेषु मेघेषु हर्षाश्रुगर्भिणी. आनन्दवाष्पवाहिनी दृश चक्षूंषि बर्ष्णन्ति । अत्र मध्यवाक्यगतेन कलापिन इति पदेन चकारबलात् वाक्यान्तरान्वयात् कलापिन इत्यस्य जातिवाचकत्वाच्च जातिगतमध्यदीपकमिदम् ॥ १०३ ॥

मन्दो गन्धवहः चारो वह्निरिन्दुश्च जायते।
चर्चाचन्दनपातश्च शस्त्रपातः प्रवासिनाम् ॥१०४॥
जलं जलधरोद्गीर्णं कुलं गृहशिखण्डिनाम्।
चलञ्च तड़ितां दाम बलं कुसुमधन्वनः ॥१०५॥
त्वया नीलोत्पलं कर्णे स्मरेणास्त्रं शरासने।
मयापि मरणे चेतस्त्वयैतत् समं कृतम् ॥१०६॥

क्रियागतमध्यदीपकमाह मन्द इति। मन्दः मृदु गन्धवहः वायुः चारः तीक्ष्णः असह्य इत्यर्थः, इन्दुश्च वह्निः अग्नि चर्चा शैत्यक्रिया, तद्रूपः चन्दनपात चन्दनानुलेपनञ्च शस्त्रपातः जायते. प्रवासिनां विरहिणामिति सर्वत्र योज्यम्। अत्र मध्यवाक्यगतेन जायते इति क्रियापदेन सर्ववाक्यान्वयात् क्रियागतमध्यदीपकमिदम्। गुणद्रव्यगते मध्यदीपके यथायथमूहनीये इति ॥ १०४ ॥

जातिगतमन्तदीपकमाह जलमिति। जलधरोद्गीर्णं जल वृष्टिरित्यर्थ, गृहशिखण्डिनां गृहमयूराणां कुल तथा चलं चञ्चलं तड़ितां दाम एतत् त्रय कुसुमधन्वनः कामस्य बल सैन्यम् उद्दीपकत्वात् एतेषाम् इति भावः। अत्र बलमिति जातिवाचकेन अन्तवाक्यस्थेन पदेन सर्ववाक्यसमन्वयात् जातिगतान्तदीपकमिदम् ॥ १०५ ॥

क्रियागतान्तदीपकमाह त्वयेति। त्वया कर्णे नीलोत्पल स्मरेण कामेन शरासने अस्त्रं, मयापि मरणे चेतः चित्तम् एतत् त्रय समं युगपत् कृतम्। मानिनीं प्रति नायकस्य उक्तिरियम्। अन्तवाक्यस्थेन कृतमिति क्रियापदेन सर्ववाक्यसम-

शुक्ल. श्वेतार्चिषो हृद्यैः पद्मः पद्मशरस्य सः ।
स च रागस्य रागोऽपि यूनां रत्युत्सवश्रियः १०७
इत्यादिदीपकत्वेऽपि पूर्वपूर्वव्यपेक्षिणी ।
वाक्यमाला प्रयुक्तेति तन्मालादीपकं मतम् ॥१०८॥
अवलेपमनङ्गस्य वर्द्धयन्ति बलाहकाः ।
कुर्वन्ति तु घर्मस्य मारुतोद्भूतशीकराः ॥१०९॥

लगात् क्रियागतान्मालादीपकमिदम् । गुणद्रव्यगते अन्तदीपके तु स्वगमूहनीये ॥ १०६ ॥

अथ मालादीपकमाह शुक्ल इत्यादि । शुक्ल पद्मः श्वेतार्चिष श्वेतकिरणस्य चन्द्रस्य हृद्यौ भवति, स. पद्म पद्मशरस्य कामस्य हृद्यैः, स च काम रागस्य अनुरागस्य हृद्यैः रागोऽपि यूना तरुणानां रत्युत्सवे श्रिय हृद्यैः । इति अत्र आदिदीपकत्वेऽपि आदिवाक्यस्थेन शुक्ल पद्म इति जातिगुणवाचकेन सर्ववाक्यान्वयेऽपीत्यर्थं पूर्वपूर्वव्यपेक्षिणी पूर्वपूर्ववाक्यमपेक्षमाणा वाक्यमाला वाक्यसमूह प्रयुक्ता इति वैचित्र्यातिशयात् इति भाव मालादीपक मतम् । तथाच उक्तदीपकस्य पूर्वपूर्वमापेक्षोत्तरोत्तरवाक्यगतत्व मालादीपकमिति तात्पर्य्यम् ॥ १०७ ॥ १०८ ॥

विरुद्धार्थदीपक निरूपयति अवलेपमिति । बलाहका मेघा अनङ्गस्य कामस्य अवलेप वर्द्धयन्ति, घर्मस्य ग्रीष्मस्य तु अवलेप कर्गयन्ति ग्रीष्म क्षयीकुर्वन्तीत्यर्थ । मारुतोद्भूतशीकरा इति बलाहका इति पदस्य विशेषणम् । अत्र अवलेपपदेन बलाहकपदेन च वर्द्धनकर्गनरूपक्रिययोः कर्मभूतेन कर्तृभूतेन

अवलेपपदेनाद्य बलाहकपदेन च।
क्रिये विरुद्धे सयुक्ते तद्विरुद्धार्थदीपकम् ॥११०॥
हरत्याभोगमाशानां गृह्णाति ज्योतिषां गणम्।
आदत्ते चाद्य मे प्राणानसौ जलधरावली ॥१११॥
अनेकशब्दोपादानात् क्रियैकैवात्र दीप्यते।
यतो जलधरावल्या तस्मादेकार्थदीपकम् ॥११२॥
हृद्यगन्धवहा स्तुन्ना स्तनालम्बासलत्विषः।
दिवि भ्रमन्ति जीमूता भुवि चैते मतङ्गजाः ११३

च विरुद्धे वर्धनकर्षणरूपे क्रिये सयुक्ते अन्विते, तत् तस्मात् विरुद्धार्थदीपकमिदम्। एतच्च आदिवाक्येन अवलेपमिति पदेन बलाहका इति पदेन च सर्ववाक्यान्वयात् बलाहकस्य जातिवाचकत्वात् अवलेपस्य च गुणवाचित्वात् आदिगत-जातिदीपकगुणदीपकयो सङ्कर इति ध्येयम् ॥ १०८ ॥ ११० ॥

एकार्थदीपकमुदाहरति हरतीत्यादि। असौ जलधरावली आशानां दिशाम् आभोग विस्तार हरति, ज्योतिषां गणं गृह्णाति. अद्य मे मम प्राणांश्च आदत्ते। अत्र अनेकेषा शब्दानां हरति गृह्णाति आदत्ते इति क्रियावाचकानाम् उपा-दानात् ग्रहणात् अपिच्च ऊहनीय'। यत' जलधरावल्या एका एव क्रिया एकार्थकत्वात् त्रयाणामेव क्रियावाचकपदाना-मिति भाव. दीप्यते, तस्मात् एकार्थदीपकमिदम् ॥१११॥११२॥

श्लिष्टार्थदीपकमुदाहरति हृद्येति। हृद्य शीतलत्वात् मनोरमः गन्धवहो येषु ते. इति जीमूतविशेषणम्। हृद्यं गन्धं मदजनितं वहन्तीति तथोक्ता इति मतङ्गजविशेषणम्।

अत्र धर्मैरभिन्नानामभ्राणां दन्तिनां तथा ।
भ्रमणेनैव सम्बन्ध इति श्लिष्टार्थदीपकम् ॥११४॥
अनेनैव प्रकारेण शेषाणामपि दीपके ।
विकल्पानामवगतिर्विधातव्या विचक्षणैः ॥११५॥

इति दीपकचक्रम् ।

अर्थावृत्तिः पदावृत्तिरुभयावृत्तिरेव च ।
दीपकस्थान एवेष्टमलङ्कारत्रयं यथा ॥११६॥

हृद्यगन्धवहा तमालवत् श्यामला त्विष कान्तय येषां तादृशा जीमूता दिवि आकाशे, एते मतङ्गजाश्च भुवि भ्रमन्ति। अत्र धर्मे साधारणे हृद्यगन्धवहत्वादिभिः अभिन्नानाम् अभ्राणां तथा दन्तिनाम् एकया भ्रमणक्रियया एव वाक्यद्वये सम्बन्ध इति श्लिष्टार्थदीपक हृद्यगन्धवहत्वरूपश्लिष्टार्थस्य प्रकटनात् इति भाव ॥ ११३ ॥ ११४ ॥

दीपक मङ्करति अनेनेति। अनेन एव प्रकारेण वैचित्र्यविशेषवशेन दीपके शेषाणाम् उक्तावशिष्टानां विकल्पानां भेदानाम् अवगति ज्ञान विचक्षणैः सुधीरै विधातव्या ॥११५॥

इति उक्तविध दीपकानां चक्रं समूहः।

अथ आवृत्ति निरूपयति अर्थावृत्तिरिति। दीपकस्थाने दीपकस्य सम्भवे अर्थावृत्ति पदावृत्तिः उभयावृत्तिश्च इदम् अलङ्कारत्रयम् इष्ट कविभिरिति शेष । अर्थस्य एकस्य वाक्यार्थस्य आवृत्ति. वाक्यान्तरे पुनरुपस्थिति, पदावृत्तिः वाक्यान्तरीयपदस्य वाक्यान्तरे पुनरुपस्थिति, उभयावृत्तिः वाक्यार्थस्य पदस्य च वाक्यान्तरे पुनरुपस्थितिः। दीपके तु वाक्या-

विकसन्ति कदम्बानि स्फुटन्ति कुटजद्रुमाः।
उन्मीलन्तिच कन्दल्यो दलन्ति ककुभानिच ११७
उत्कण्ठयति मेघानां माला हन्दं कलापिनाम्।
यूनाश्चोत्कण्ठयत्येष: मानसं मकरध्वजः ॥११८॥
जित्वा विश्वं भवानत्र विहरत्यवरोधनैः।

न्तरे तत्पदस्यानुपादानेऽपि वाक्यान्तरीयपदस्य अनुषङ्गादिना अन्वयनिर्वाह इह तु तदर्थकपदान्तरस्य तत्पदस्यैव वा पुनरुपादानमित्यनयोर्भेद। भोजराजेन तु त्रयाणामावृत्तित्वं दीपकस्यैव भेद इत्युक्तम्। यथा दीपकनिरूपणे. अर्थावृत्ति पदावृत्तिरुभयावृत्तिरावली। मम्मट रसना माला चक्रवालश्च तद्भिदा ॥ इति ॥ ११६ ॥

अर्थावृत्तिमुदाहरति विकसन्तीति। कदम्बानि विकसन्ति कुटजद्रुमा. स्फुटन्ति कन्दल्य उन्मीलन्ति ककुभानि दलन्ति। वर्षावर्णनमिदम्। अत्र विकसन्तीत्यादिपदं भिन्नप्रकृतिकमपि एकार्थत्वेनेति अर्थस्य पुनरावर्त्तनात् अर्थावृत्तिरियम् ॥ ११७ ॥

पदावृत्तिमाह उत्कण्ठयतीति। मेघाना माला कलापिना हन्दम् उत्कण्ठयति, एष मकरध्वजः यूना मानसम् उत्कण्ठयति च मेघानाम् उद्दीपकत्वात् इति भाव.। अत्र प्रथमम् उत्कण्ठयति इति पदस्य आनन्दोदयात् दिदृक्षया उद्बोधकरणरूपोऽर्थः, अपरम् उत्कण्ठयतीति पदस्य औत्सुक्यबोधीकरणरूपोऽर्थः तस्मात् उत्कण्ठयतीति पदमात्रस्य पुनरावृत्तिः न तु अर्थस्येति पदावृत्तिः ॥ ११८ ॥

उभयावृत्तिमाह जित्वेति। अत्र भुवि भवान् विश्वं जित्वा

विहरत्यप्सरोभिस्ते रिपुवर्गो दिवं गतः ॥ ११९

इत्याक्षेपनिदर्शनम् ।

प्रतिषेधोक्तिरप्यस्तकाल्यापेक्षया द्विधा ।
पुनरस्य पुनराक्षेप्यभेदानन्त्यादनन्तता ॥ १२०॥
पुनर्ज. पञ्चभिः पुष्पैर्विश्वं व्यजयते भिः ।
चूतमञ्जर्यशोकस्य नवमल्लिकया सह ॥ १२१॥

यदा यदा अस्त्रं प्रक्षिपति, तेन तेन रिपुवर्ग
गत मन् अप्सरोभिर्विहरति मृतमरणं स्वर्गं भादक्षर प्रा
प्तिं भा । अत्र विहरतीति यदस्य तदर्थं न च उत्तरत्र
पुनरादेः उभयत्रापीति बोध्यम् ॥ ११९ ॥

इति उक्तप्रकारं साधुत्वमनुप्रासस्य गुण प्रभेद इत्यर्थः ।

प्रतिषेध निरूपयति प्रतिषेधेति । प्रतिषेधस्य उक्ति क
र्तृत्वेन प्रतिषेध, तात्त्विकत्वे वैचित्र्याभावात् अलङ्क
रत्वाभावप्रसङ्गात् इति भाव । आक्षेप प्रतिषेधाभास इत्यः
उक्तत्व आग्नेयपुराणे, प्रतिषेध इवेष्टस्य यो विशेषाभिधित्सर
तमाक्षेप वुवन्तीति । स च त्रैकाल्यापेक्षया त्रैकालिकत्व
गतत्वेन त्रिधा वर्त्तमानाक्षेप अतीताक्षेप भविष्यदाक्षेप इ
त्यस्य च त्रिविधस्यापि आक्षेपस्य पुन आक्षेप्यस्य आक्षेपविषय
भेदात् अनन्तता अनन्तप्रभेद इत्यर्थ ॥ १२० ॥

इत्याक्षेप निदर्शयति अनङ्ग इत्यादि । अनङ्ग काम: स
मिषणभूतै पञ्चभि पुष्पै अरविन्दादिभि. । उक्तञ्च, अ
रविन्दमशोकञ्च चूतञ्च नवमल्लिका । नीलोत्पलञ्च पञ्चैते प
ञ्चबाणस्य सायका; ॥ इति । विश्व व्यजयत विजितवान् इति

सुन्दरी स[illegible]

अनङ्गजयायोगदुद्धिर्हेतुबलादिह।
हृतैव यदाज्ञिप्ता हृत्याक्षेपः स ईदृशः ॥ १२२ ॥
कुतः कुवलयं कर्णे करोषि कलभाषिणि!।
अपाङ्गमपर्य्याप्तमस्मिन् कर्मणि मन्यसे ? १२३
किम वर्त्तमानाक्षेपोऽयं कुर्वत्येवासितोत्पलम्।
कर्णे काचित् प्रियेणेवं चाटुकारेण रुध्यते॥१२४॥

* असम्भाव्यम् अविश्वास्यमित्यर्थं तथाच विजेतुस्तावदनङ्गत्व
१ बाणानाञ्च पञ्चसङ्ख्यता तेषाञ्च पुष्पमयत्व न तु दृढत्व जेत-
व्यञ्च प्रकाण्डपदार्थो विश्वमिति विजयोऽश्रद्धेय एवेति भावः।
अथवा वस्तूना पदार्थानां शक्तय विचित्रा अचिन्त्यस्वरूपा,
वस्तुशक्त्या सर्वमेव सम्भाव्यते इति तत्त्वम्। हृत्यत्र हृत्ता जाता
अनङ्गस्य विश्वजयासम्भाव्यत्वबुद्धि. हेतुबलात् वस्तुशक्ते. यत्
आक्षिप्ता प्रतिषिद्धा. अत ईदृश एष इत्यर्थ स. प्रसिद्ध. हृत्या-
क्षेप: हृतस्य अतीतस्य सञ्जातस्य इत्यर्थ: असम्भवद्बुद्धिरूपस्य
आक्षेप इति ॥ १२१ ॥ १२२ ॥

वर्त्तमानाक्षेपमुदाहरति कुत इत्यादि। हे कलभाषिणि! कर्णे कुवलय नीलोत्पल करोषि धारयसि कुत: कस्मात्, अस्मिन् कर्मणि कर्णशोभाकर्मणि अपाङ्गं किम् अपर्य्याप्तम् अक्षम मन्यसे ? अपाङ्गेनैव कर्णशोभासम्पादनात् कुवलय-धारणं व्यर्थमिति भाव:। स. अय वर्त्तमानाक्षेप:, यत: असि-तोत्पल नीलोत्पल कर्णे कुर्वतो एव न तु कृतवतो वा करि-ष्यन्तो काचित् नायिका चाटुकारेण प्रियेण एवं रुध्यते प्रति-षिध्यते। अतोऽत्र वर्त्तमानस्य असितोत्पलधारणस्य आक्षेपात् वर्त्तमानाक्षेप इति भाव: ॥ १२३ ॥ १२४ ॥

सत्यं ब्रवीमि न त्वं मां द्रष्टुं वल्लभ ! लप्स्यसे ।
अन्यचुम्बनसंक्रान्तलाक्षारक्तेन चक्षुषा ॥ १२५ ॥
सोऽयं भविष्यदाक्षेपः प्रागेवातिमनस्विनी ।
कदाचिदपराधोऽस्य भावीत्येवमरुन्ध यत् ॥१२६॥
तव तन्वङ्गि ! मिथ्यैव रूढ़मङ्गेषु मार्दवम् ।
यदि सत्यं मृदून्येव किमकाण्डे रुजन्ति माम्१२७
धर्माक्षेपोऽयमाक्षिप्तमङ्गनागात्रमार्दवम् ।
कामुकेन यदत्रैवं कर्मणा तद्विरोधिना ॥ १२८ ॥

भविष्यदाक्षेपमाह सत्यमित्यादि। हे वल्लभ ! सत्यं ब्रवीमि, त्वं अन्यस्या नायिकाया चुम्बनेन संक्रान्तया लाक्षया रक्तेन चक्षुषा मां द्रष्टुं न लप्स्यसे मदर्शनं न प्राप्स्यसीत्यर्थः। अत्र अतिमनस्विनी अतिमानवती काचित् नायिका कदाचित् अस्य नायकस्य अपराधो भावी भविष्यतीति आशङ्क्य यत् एवं नायकम् अरुन्ध नायिकान्तरप्रसक्तौ निषिद्धवती अतः अयं न प्रसिद्ध भविष्यत नायिकान्तरानुरागस्य आक्षेपात् प्रतिषेधात् भविष्यदाक्षेप इति निष्कर्षः ॥ १२५ ॥ १२६ ॥

आक्षेपस्य भेदानामानन्त्येऽपि कतिचित् भेदान् दर्शयिष्यन् प्रथम धर्माक्षेपमाह तवेत्यादि। हे तन्वङ्गि ! तव अङ्गेषु मार्दवं रूढ़ं स्थितं मिथ्यैव, यदि सत्यं तव अङ्गानि मृदूनि एव, तदा अकाण्डे अकारणं मां किं रुजन्ति तापयन्ति। अत्र कामुकेन एवम् उक्तिनैपुण्येन इत्यर्थः तद्विरोधिना मार्दव-विरोधिना कर्मणा तापनरूपेण अङ्गनाया गात्रस्य मार्दवम्

सुन्दरी सा न वेत्येष विवेकः केन जायते।
प्रभामात्रं हि तरलं दृश्यते न तदाश्रयः॥ १२९॥
धर्म्याक्षेपोऽयमाक्षिप्तो धर्मी धर्मं प्रभात्वयम्।
अनुज्ञायैव यद्रूपमत्याश्चर्यं विवक्षता॥ १३०॥
चक्षुषी तव रक्ते ते स्फुरत्यधरपल्लवः।
भ्रुवौ च भुग्ने न तथाप्युद्दृष्टस्यास्ति ते भयम् १३१
स एव कारणक्षेपः प्रधानं कारणं भियः।
स्वापराधो निर्निमित्तोऽत्र यत् प्रियेण पटीयसा १३२

आक्षिप्त प्रतिषिद्ध इत्यर्थात् अयं धर्मस्य सादेरूपस्य आक्षेपात् धर्म्याक्षेप" १२९ १३०॥

धर्म्याक्षेपमुदाहरति सुन्दरीत्यादि। अत्र सा सुन्दरी नायिका वर्तते इत्येष न वा इत्येष विवेक निश्चयज्ञान केन कस्य जायते न कस्यापीत्यर्थः. हि यतः. तरलं चञ्चलम् इतस्ततः. विद्युत्प्रभासदृशं प्रभामात्रं दृश्यते. तस्य प्रभामात्रस्य आश्रयः. आधारभूता नायिका न। अत्र अत्याश्चर्यं रूपं विवक्षता नायकेन प्रभात्वय प्रभारूपं धर्मम् अनुज्ञाय एव सत्यापैव धर्मी तदाश्रयभूता नायिका आक्षिप्त प्रतिषिद्ध इति अयं धर्म्याक्षेप॥ १२८। १३०॥

कारणाक्षेपमुदाहरति चक्षुषी इत्यादि। तव चक्षुषी रक्ते आरक्ते भवतः, अधर पल्लव इव स्फुरति, भ्रुवौ च भुग्ने वक्रीभूतौ, तथापि भयकारणं सत्यपौत्यर्थ. अदुष्टस्य निरपराधस्य ते भय नास्ति। अत्र पटीयसा सुनिपुणेन प्रियेण भियः प्रधानं कारणं स्वापराधः. निजदुष्टदोषः यत् यस्मात्

दूरे प्रियतमः सोऽयमागतो जलदागमः ।
दृष्टाश्च फुल्ला निचुला न मृता चास्मि किं न्विदम् ॥१३३
कार्य्याक्षेपः स कार्य्यस्य मरणस्य निवर्त्तनात् ।
तत्कारणमुपन्यस्य दारुणं जलदागमम् ॥१३४॥
न चिरं मम तापाय तव यात्रा भविष्यति ।
यदि नाम्भसि यातव्यमलमाशङ्क्यया ते ॥१३५॥

विशिष्ट यत एव स प्रसिद्ध कारणाक्षेपः । अत्र न भयम् भवतीति कार्यनेन भयरूपकार्यस्य प्रतिषेधात् अय कार्य्याक्षेपः सनयो सङ्कर । विभावना च स्फुटतया लक्ष्यते, विभावना विना हि कार्य्योत्पत्तिर्यदुच्यते इति तल्लक्षणात् अतस्त्वयाणा- अय सङ्कर इति ज्ञेयम् ॥ १३१ ॥ १३२ ॥

कार्य्याक्षेप दर्शयति दूरे इत्यादि । प्रियतम दूरे तिष्ठति इति शेष, स अय जलदागम वर्षासमय आगत, यतः फुल्ला निचुला स्थलवेतसा दृष्टाश्च, तथापि न मृता च अस्मि, न वितर्के, किमिदम् अत्यसम्भाव्यमिदम् इति भाव, विरहिण्युक्तिरियम् । अत्र तस्य कारण दारुण जलदागमम् उपन्यस्य कार्य्यस्य मरणस्य निवर्त्तनात् प्रतिषेधात् स विशिष्ट कार्य्याक्षेपोऽयम् । अत्र मति कारणे फलस्य मरणस्य प्रभावकीर्त्तनात् विशेषोक्तिरपि । तदुक्त दण्डिकारेण, मति तौ फलाभावो विशेषोक्तिस्तया द्विधा इति तदनयो. सङ्कर इति बोध्यम् ॥ १३३ ॥ १३४ ॥

अनुज्ञाक्षेपमुदाहरति नेत्यादि । तव यात्रां प्रवासगमनं मम चिर तापाय न भविष्यति, विरहेण मम झटिति प्राणा-

इत्यनुज्ञामुखेनैव कान्तस्याक्षिप्यते गतिः।
मरणं सूचयन्त्येव सोऽनुज्ञाक्षेप उच्यते ॥१३६॥
धनञ्च बहु लभ्यं ते सुखं क्षेमञ्च वर्त्मनि।
न च ते प्राणसन्देहस्तथापि प्रिय! मास्मगाः १३७
इत्याचक्षाणया हेतून् प्रियायातुर्विनः।
प्रभुत्वेनैव तद्भक्त्या प्रभुत्वाक्षेप उच्यते ॥ १३८॥
जीवितार्या बलवती धनाशा दुर्बला मम।
गच्छ वा तिष्ठ वा कान्त! स्वावस्था तु निवेदिता १३९

त्वयस्य अवश्यम्भावादिति भाव। यदि त्वं यास्यसि तदा यातव्यं याहीत्यर्थः. ते तव अत्र सहिषये आग्रहेण अलम्। अत्र विरहवेदनया मरणं सूचयन्त्या कयाचित् अनुज्ञामुखेन विदेशगमनानुमत्या एव कान्तस्य गतिः विदेशगमनम् आक्षिप्यते निषिध्यते. अतः सः अनुज्ञाक्षेप इत्युच्यते ॥ १३५ ॥ १३६ ॥

प्रभुत्वाक्षेपमुदाहरति धनञ्चेत्यादि। हे प्रिय! ते विदेशगमने इति अध्याहार्य्यं बहु धनं सुखञ्च तथा वर्त्मनि पथि क्षेमं कुशलञ्च लभ्यम्. अत्र च ते प्राणसन्देहः न तव शीघ्रप्रत्यागमनस्य बहुधनलाभस्य च सम्भवादिति भावः. तथापि मा स्म गाः मा गच्छ। अत्र प्रियायातुः प्रियस्य विदेशगमनस्य अनुबन्धिन पोषकान् हेतून् आचक्षाणया कीर्त्तयन्त्या कयाचित् स्वाधीनपतिकया इति शेषः प्रभुत्वेन स्वाधीनतया एव पतिः रुद्धः विदेशगमनात् निवर्त्तितः तस्मात् एव प्रभुत्वाक्षेप उच्यते ॥ १३७ ॥ १३८ ॥

अनादराक्षेपमुदाहरति जीवितेत्यादि। हे कान्त! मम

प्रसादनादराक्षेपो यदनादरवद् वचः ।
प्रियप्रयाण कन्यया प्रयुक्तमिह रक्तया ॥ १४० ॥
गच्छ गच्छसि चेत् कान्त ! पन्थानः सन्तु ते शिवाः ।
ममापि जन्म तत्रैव भूयाद् यत्र गतो भवान्॥१४१
इत्याशीर्वचनाक्षेपो यदाशीर्वादवर्त्मना ।
स्वास्थ्यं सूचयन्त्यैव कान्तया यात्रा निषिध्यते ॥१४२॥

जीवितार्या जीवनेच्छा यावती दीर्घकाल जीवितुमिच्छामि इत्यर्थे धनार्या मम दुर्लभा तव विदेशगमने धनलाभो भविष्यति इत्यर्था आकाङ्क्षा मम नास्तीत्यर्थ अत गच्छ वा तिष्ठ, इत्यभिप्राय इत्यर्थ निवेदिता कथिता । इह रक्तया अनुरागिण्या प्रियप्रयाण पत्युर्विदेशगमन कन्यया वाग्यतया कयाचित् यत् यस्मात् अनादरवत् अनाराध्यव्यञ्जक वच. प्रयुक्तम् अत अयं प्रसादनाक्षेप इति ॥ १३९ ॥ १४० ॥

आशीर्वचनाक्षेपमुदाहरति गच्छेत्यादि । हे कान्त ! गच्छसि चेत् गच्छ, ते तव पन्थान शिवा निर्विघ्ना: सन्तु, किन्तु, यत्र भवान् गत तत्रैव ममापि जन्म भूयात्, अयं भाव तव गमने गन्तारमेव मम मरण भविष्यति, मृतायाश्च अवश्य जन्म भवितव्यता, तत् तु तव सन्निधौ भवति चेत् पुनस्त्वदर्शन लप्स्ये इति। अत्र आशीर्वादवर्त्मना आशीर्वचनरीत्या स्वास्थ्या सूचयन्त्या कान्तया यत् यस्मात् कान्तस्य यात्रा विदेशगमन निषिध्यते अत: अयम् आशीर्वचनाक्षेप. ॥ १४१ ॥ १४२ ॥

दे सत्यैव यात्रा ते काप्यन्या सृज्यतां त्वया।
हमद्यैव सृजास्मि रन्ध्रापेक्षेण मृत्युना ॥१४३॥
त्येष परुषाक्षेपः परुषाक्षरपूर्वकम्।
ान्तस्याक्षिप्यते यस्मात् प्रस्थान प्रेमनिघ्नया॥१४४
न्ता चेत् गच्छ तूर्णं ते कर्णौ यान्ति पुरा रवाः
र्त्तवन्धुसुखोद्गीर्णाः प्रयाणपरिपन्थिनः ॥१४५॥
साचिव्याक्षेप एवैष यदत्र प्रतिषिध्यते।
प्रियप्रयाणं साचिव्यं कुर्वत्या वानुरक्तया ॥ १४६ ॥

परुषाक्षेपमुदाहरति यदेत्यादि। यदि ते तव यात्रा विदेशगमन सत्यैव, तदा त्वया अन्या कापि प्रियतमा सृज्यताम् अन्विष्यताम्। अहं रन्ध्रापेक्षेण छिद्रानुसन्धायिना मृत्युना अद्यैव न तु कालान्तरे, दृष्टा आक्रान्ता अस्मि, अद्यैव मम मृत्युर्भविष्यति इति भाव। इत्यत्र प्रेमनिघ्नया अनुरागवश-वर्त्तिन्या कयाचित् परुषाक्षरपूर्वक निह्नुवचनमुक्ता इत्यत्र यस्मात् कान्तस्य प्रस्थान विदेशगमनम् आक्षिप्यते निषिध्यते अतः एष परुषाक्षेप ॥ १४३ ॥ १४४ ॥

साचिव्याक्षेपमुदाहरति गन्तेत्यादि। हे कान्त! गन्ता गामी चेत् गमिष्यसि यदीत्यर्थः. भविष्यदर्थे क्त्वन्। तूर्णं गच्छ आर्त्तानां शोकाकुलानां मन्मरणेनेति भाव, बन्धूना सुखोद्-गीर्णा सुखोच्चरिता. प्रयाणपरिपन्थिन विदेशयात्राप्रतिरोधिन रवाः मन्मृत्युसूचका वर्णाः. ते कर्णौ पुरा यान्ति श्रवणगोचरी-भविष्यन्ति इत्यर्थः। पुरायोगे भविष्यदर्थे लट्। अत्र अनु-रक्तया कयाचित् साचिव्य सहायता तूर्णं गच्छेत्यननेति भाव.

गच्छेति वक्तुमिच्छामि त्वत्प्रियं मत्प्रियेषिणी ।
निर्गच्छति मुखाद्वाणी मागा इति करोमि किम् १४७

यत्नाक्षेपः स, यत्नस्य कृतस्यानिष्टवस्तुनि ।
विपरीतफलोत्पत्तेरानर्थक्योपदर्शनात् ॥१४८॥

क्षणं दर्शनविघ्नाय पक्ष्मस्पन्दाय कुप्यतः ।
प्रेम्णः प्रयाणं त्वं ब्रूहि मया तस्येष्टमिष्यते ॥१४९॥

सोऽयं परवशाक्षेपो यत्प्रेमपरतन्त्रया ।
तया निषिध्यते यात्रत्यन्यार्थस्योपदर्शनात् ॥१५०॥

पूर्वेण यत् यस्मात् प्रियप्रयाणं प्रियस्य विदेशयात्रा प्रतिषिध्यते अतः तत् सान्निध्याक्षेपः ॥ १४५ ॥ १४६ ॥

यत्नाक्षेपं निरूपयति गच्छेत्यादि । त्वत्प्रिय तव अनुकूलं गच्छ इति वचनं वक्तुम् इच्छामि, किन्तु मुखात् मा गा इति मत्प्रियविषिणी वाणी निर्गच्छति किं करोमि तव गृहे अवस्थानस्य मत्प्रियत्वात् इति भावः । अत्र अनिष्टवस्तुनि गच्छेति गमनविधाने कृतस्यापि यत्नस्य विपरीतस्य फलस्य मा गा इति वाणीनिःसरणरूपस्य उत्पत्तेः जातत्वात् आनर्थक्योपदर्शनात् अनर्थसम्भवद्योतनात् विदेशगमनसान्निध्यते इति अयं यत्नाक्षेपः ॥ १४७ ॥ १४८ ॥

परवशाक्षेपमुदाहरति क्षणमित्यादि । हे कान्त ! त्वं क्षणं स्थित्वा दर्शनविघ्नाय दर्शनप्रतिबन्धकाय पक्ष्मस्पन्दाय पक्ष्माणां नेत्रलोम्नां स्पन्दनमपि असहमानात् प्रेम्णः अनुरागात् परवशात् प्रणयात् प्रयाणं यात्रानुमतिं ब्रूहि प्रार्थय, मया तस्य प्रेम्ण एव इष्टम् इष्यते । प्रेमाधीनायाः मम अनुज्ञया

महिष्ये विरहं नाथ! देह्यदृश्याञ्जनं यथा।
यदक्तनेत्रां कन्दर्पः प्रहर्त्तुं मां न पश्यति १५१॥
दुष्करं जीवनोपायमुपन्यस्योपरुध्यते।
पत्युः प्रस्थाननित्याकुरुपायाक्षेपमीदृशम् ॥१५२॥
प्रहर्त्तेव प्रयामीति वाणी वल्लभ! ते मुखात्।
त्वयतापि त्वयेदानीं सन्देशेन कृतासि किम्१५३
रोषाक्षेपोऽयमुद्दिश्य स्नेहनिर्वन्धितात्मना।
संरुध्या प्रियारब्धं प्रयाणं यन्निषिध्यते ॥१५४॥

अत्र प्रेम्णः अभिमतस्येत् तव गमनं तदा गच्छेति भावः। प्रयाणानुमतिं कामयमान पति प्रति कस्याश्चिदुक्तिरियम्। यत्र प्रेमपरतन्त्रया नायिकया अन्यार्थस्य प्रेमानुमतिग्रहण-रूपस्य उपदर्शनात् उपदेशात् यात्रा कान्तस्य विदेशगमन निषिध्यते इति अयं स प्रसिद्ध. परवशाक्षेपः ॥ १४८ ॥ १५० ॥

उपायाक्षेपमाह महिष्ये इत्यादि। हे नाथ! तव विरहं सहिष्ये, मम अदृश्याञ्जनम् अदर्शनजनकं काज्जलविशेषं देहि, किं तत इत्याह यदिति। कन्दर्पः येन काज्जलेन अक्तं लिप्तं नेत्रं यस्या तादृशी मां प्रहर्त्तुं न पश्यति, तव विरहे कन्दर्पो मां व्यथयिष्यति, यदि तस्याञ्जनं न स्यात् तदा तव प्रयाणे न हानिरिति भावः। अत्र दुष्कर जीवनोपाय कामादर्शन-जनकसिद्धाञ्जनविशेषदानरूप जीवनोपायम् उपन्यस्य तद-सम्भवात् पत्युः प्रस्थानं विदेशयात्रा उपरुध्यते प्रतिषिध्यते इति ईदृशम् उपायाक्षेपम् आहुः कवय इति शेषः। १५१॥१५२॥

रोषाक्षेपमुदाहरति प्रहर्त्तेवेत्यादि। हे वल्लभ! ते तव

मुग्धा कान्तस्य यावोक्तिश्रवणादेव मूर्च्छिता ।
बुद्ध्वा वक्ति प्रियं दृष्ट्वा किं चिरेणागतो भवान्॥१५५
इति तत्कालसम्भूतमूर्च्छयाक्षिप्यते गतिः ।
कान्तस्य क्रातराक्ष्या यन्मूर्च्छाक्षेपः स दृष्टश्चः॥१५६

मुग्धात् प्रयामि गच्छामि इति वाणी प्रवृत्ता उच्चरिता एव इत्यर्थः प्रयाणे तस्या प्रयाणं दूरापास्तं, तदर्थकवाणीनि मरणमपि समर्थयामिति भावः, अतः अनुरागस्तादृशोऽपि त्वया शिथिलीकृत इत्याशयेनाह अयतेति । इदानीं मन्दप्रेम्णः शिथिलितानुरागेण अयता गच्छतापि त्वया मम, किम् अस्ति न किमपि प्रयोजनमस्तीत्यर्थः । अयतेति इ गतादित्वस्यात् भौवादिकात् नियत्वम् । अत्र उद्रिक्तेन अतिरिक्तेन स्नेहेन प्रेम्णा निर्यन्त्रित आक्रान्त आत्मा यस्यास्तादृश्या सरभ्यया कुपितया कयाचित् प्रियेण आरब्धम् उद्युक्त प्रयाणं प्रियकृतविदेशगमनोद्योग इत्यर्थः यत् यस्मात् निषिध्यते अतः अयं रोषाक्षेपः ॥ १५३ ॥ १५४ ॥

मूर्च्छाक्षेपं निरूपयति मुग्धेत्यादि। काचित् मुग्धा कान्तस्य यावोक्तेः विदेशगमनस्य उक्तिश्रवणात् एव न तु विदेशगमनात् मूर्च्छिता मोहं प्राप्ता, अथ बुद्ध्वा सञ्जा लब्ध्वा दृष्टेति पाठे सञ्जातचैतन्या प्रियं दृष्ट्वा वक्ति भवान् किं कथं चिरेण आगतः, एतादृशं विलम्बं कृत्वा कथमागतोऽसीत्यर्थः। इत्यत्र तत्काले गमनश्रवणकाले सम्भूता मूर्च्छा यस्याः तया क्रातराक्ष्या मुग्धया कान्तस्य गतिः यत् आक्षिप्यते निषिध्यते स दृष्टश्चः मूर्च्छाक्षेपः ॥ १५५ ॥ १५६ ॥

घ्रातं न क्रतं कर्णे स्तौमिर्मधुनि नार्पितम्।
दृढिषां दीर्घिकास्वेव विशीर्णं नीलमुत्पलम्॥१५७॥
सावनुक्रोशाक्षेपः सानुक्रोशमिवोत्पले।
व्यावर्त्यं कर्म तद्योग्यं शोच्यावस्थोपदर्शनात्॥१५८॥
अमृतात्मनि पद्मानां हेष्टरि स्निग्धतारके।
मुखेन्दौ तव सत्यस्मिन्नपरेण किमिन्दुना॥१५९॥
इति मुख्येन्दुराक्षिप्तो गुणान् गौणेन्दुवर्त्तिनः।
तत्समान् दर्शयित्वेह श्लिष्टाक्षेपस्तथाविधः॥१६०॥

अनुक्रोशाक्षेपं निरूपयति नेत्यादि। तव दिषां शत्रूणां स्तौमि नीलम् उत्पलं न आघ्रातं न कर्णे कृतं मधुनि च न अर्पितं कुतरां दीर्घिकासु एव विशीर्णं विशुष्कम्। अत्र राजविषया रतिर्व्यज्यते. तेषां पराजयेन मरणात् पलायनाद्वेति भावः। अत्र उत्पले सानुक्रोशमिव सदयमिव तस्य उत्पलस्य योग्यं कर्म स्त्रीजनकर्तृकाघ्राणादिकं व्यावर्त्य निषिध्य शोच्याया अवस्थाया अनुपभोगेन वापीषु विशीर्णतारूपाया उपदर्शनात् प्रदर्शनात् असौ अनुक्रोशाक्षेपः। १५७॥ १५८॥

श्लिष्टाक्षेपमुदाहरति अमृतात्मनीत्यादि। अमृतमेव आत्मा स्वभावो यस्य तादृशे परमाह्लादके इत्यर्थः. अन्यत्र अमृतं जलं तदात्मके. पद्मानां हेष्टरि पराजयकारिणि. अन्यत्र सङ्कोचकत्वात् अतो तथा स्निग्धे तारके अक्षिकनीनिके यस्य तस्मिन् तव अस्मिन् मुखेन्दौ सति अपरेण इन्दुना किं न किमपि प्रयोजनमस्तीत्यर्थः। इत्यत्र तत्समान् तस्य मुखेन्दोः सदृशान् गौणम् आरोपितं यत् इन्दुः मुखमित्यर्थः तद्वर्त्तिनः

अर्थो न मस्मृतः कश्चिन्न विद्या काचिदर्जिता ।
न तपः सञ्चितं किञ्चिद् गतञ्च सकलं वयः॥१६१॥
अस्मादनुशयाक्षेपो यस्मादनुशयोत्तरम् ।
अर्थार्जनादेर्व्याहृत्तिर्दर्शितेह गतायुषा ॥ १६२ ॥
किमयं शरदभ्रोदः किंवा हंसकदम्बकम् ।
रुतं नूपुरमत्रादि श्रूयते तन्न तोयदः ॥ १६३ ॥
इत्यय संशयाक्षेपः संशयो यन्निवर्त्यते ।
धर्मेण हसमुखेनाभिजात्यसृष्टधनजातिना ॥ १६४ ॥

तदीयान् गुणान् दर्शयित्वा मुख्य इन्द्र आक्षिप्त प्रतिषिद्ध. इत्यत तथाविध तादृग श्लिष्टाक्षेप. अयम् अस्य श्लेषमूलकत्वात् इति भाव ॥ १५९ ॥ १६० ॥

अनुशयाक्षेपमुदाहरति अर्थ इति। कश्चित् अर्थ धन न मस्मृत, काचित् विद्या च न अर्जिता, किञ्चित् तप न सञ्चित सकल वयश्च गतम्। अत्र यस्मात् अनुशयोत्तर पश्चात्तापबहुल यथा तथा गतायुषा जनेन अर्थार्जनादे. व्याहृत्ति अभाव दर्शिता तस्मात् अयम् अनुशयाक्षेप. ॥ १६१ ॥ १६२ ॥

संशयाक्षेपमुदाहरति किमित्यादि। अय किं शरदभ्रोद, शरत्कालीन जलापगमात् शुभ्र मेघ., किंवा हसाना कदम्बक समूह, किन्तु नूपुरमवादि नूपुरध्वनिसदृश रुत श्रूयते, तस्मात् तोयद मेघ न। अत्र असृष्टा धनजातिर्येन तादृशेन हसमुखेन केवलहससम्बन्धिना धर्मेण तादृशरुतेन यत् तस्मात् संशय निवर्त्यते तस्मात् अय संशयाक्षेपः ॥१६३॥१६४॥

चित्रमाक्रान्तविश्वोऽपि विक्रमस्ते न शाम्यति।
कदा वा दृश्यते दृप्तिरुदीर्णस्य हविर्भुजः ॥१६५॥
अयमर्थान्तराक्षेपः प्रक्रान्तो यैन्निवार्य्यते।
विस्मयोऽर्थान्तरस्येह दर्शनात् तत्समधर्मणः ॥१६६॥
न स्तूयसे नरेन्द्र! त्वं ददासीति कदाचन।
स्वमेव मत्वा गृह्णन्ति यतस्त्वद्धनमर्थिनः ॥१६७॥
इत्येवमादिराक्षेपः हेत्वाक्षेप इति स्मृतः।
अनयैव दिशान्योऽपि विकल्पः शक्य ऊहितुम्१६८

इति आक्षेपचक्रम्।

अर्थान्तराक्षेपमुद्दिशति चित्रमिति। ते तव विक्रम आक्रान्त विश्व येन तादृशोऽपि न शाम्यति एतत् चित्रमाश्चर्य्यम्। वा अथवा उदीर्णस्य उद्दीप्तस्य हविर्भुज अग्ने. दृप्ति कदा दृश्यते न कदापि इत्यर्थः। इह अत्र तत्समधर्मणः तस्य विक्रमस्य समानधर्मस्य अर्थान्तरस्य हविर्भुक्दृप्त्यभावरूपस्य दर्शनात् प्रदर्शनात् प्रक्रान्त चित्रमिति पदेन प्रस्तुतः विस्मयः यत् निवार्य्यते, अयम् अर्थान्तराक्षेपः अर्थान्तरेण प्रस्तुतस्याक्षेपात्। अत्र राजविषयिणी रतिर्व्यज्यते ॥ १६५ ॥ १६६ ॥

हेत्वाक्षेपमुद्दिशति नेत्यादि। हे नरेन्द्र! त्व ददामीति ह्रत्वा कदाचन न स्तूयसे, यतः अर्थिन तव धन स्वं निजस्वत्वास्पदीभूतमेव बुद्ध्वा इति शेषः गृह्णन्ति। एतेन राज्ञोऽतीवदानशीलत्वं सूचितम्। इत्यत्र स्वमेवेति हेतुवशात् प्रस्तुतराजस्तुतस्य आक्षेपात् हेत्वाक्षेपः अयम् आक्षेपस्य हेतुनाध्य-

ज्ञेयः सोऽर्थान्तरन्यासो वस्तु प्रस्तुत्य किञ्चन ।
तत्साधनसमर्थस्य न्यासो योऽन्यस्य वस्तुनः॥१६९॥

लात्। अनया एव दिशा रीत्या अन्योऽपि विकल्पः आक्षेपस्य भेदः कर्तुं निरूपयितुं शक्यः धीमद्भिरिति शेषः। कारणातिपे तु कारणस्येव आक्षेपः इह तु कारणेन आक्षेप इत्यनयोर्भेद इति बोध्यम्॥ १७७॥ १६८॥

इति उक्तरूपम् आक्षेपालङ्काराणां चक्रं समूहः।

अर्थान्तरन्यासमाह ज्ञेय इति। किञ्चन किमपि वस्तु प्रकृत प्रस्तुत्य उपन्यस्य तस्य साधने प्रमाणीकरणे समर्थस्य अन्यस्य अप्रकृतस्य वस्तुनः विषयस्य कीर्त्तनं स अर्थान्तरन्यासः ज्ञेयः। अत्र प्रस्तुत्य इति क्त्वाप्रत्ययेन प्रथमं प्रकृतस्य कीर्त्तनं ततस्तत्समर्थकस्य उपन्यास इति सूचितम्। कदाचित् वैपरीत्यमपि दृश्यते। भोजराजेन स विपरीतार्थान्तरन्यासोऽभिहितः। यथा, प्रतिकूलतामुपगते हि विधौ विफलत्वमेति बहुसाधनता। अवलम्बनाय दिनभर्तुरभून्न पतिष्यतः करसहस्रमपीति। अत्र पूर्वार्द्धवाक्यं परार्द्धस्य समर्थकमपि प्रागुपन्यस्तम्। वस्तुतस्तु प्रस्तुतस्य पूर्वोक्तस्य परोक्तस्य वा अप्रस्तुतेन समर्थनमर्थान्तरन्यास इति निष्कर्षः। अत्र समर्थ्यसमर्थकयो सामान्यविशेषभाव कार्य्यकारणभावश्च साधर्म्येण वैधर्म्येण वा भवतीति दर्पणकारः। यथा, सामान्यं वा विशेषेण विशेषस्तेन वा यदि। कार्य्यञ्च कारणेनेह कार्य्येण च समर्थ्यते।

विश्वव्यापी विशेषस्यः श्लेषाविद्धो विरोधवान् ।
अयुक्तकारी युक्तात्मा युक्तायुक्तो विपर्ययः ॥१७०॥
इत्येवमादयो भेदाः प्रयोगेष्वस्य लक्षिताः ।
उदाहरणमालेषां रूपव्यक्तौ निदर्श्यते ॥ १७१ ॥
भगवन्तौ जगन्नेत्रे सूर्याचन्द्रमसावपि ।
पश्य गच्छत एवास्तं नियतिः केन लङ्घ्यते ॥१७२॥

अर्थान्तरन्यासस्य भेदानाह विश्वव्यापीत्यादि । विश्वव्यापी सर्वत्र सम्बन्धीत्यर्थः विशेषस्य समर्थ्यः श्लेषाविद्ध श्लिष्टपदान्वितः. विरोधवान् प्रकृतविरोधी. अयुक्तकारी अनुचितकार्यकर्त्ता युक्तात्मा औचित्ययुक्तः. युक्तायुक्तः कियदंशेन युक्तः कियता वा अयुक्तः. तथा विपर्ययः वैपरीत्यगुणयुक्तः । अस्य अर्थान्तरन्यासस्य प्रयोगेषु इत्येवमादय एवम्प्रकारा भेदाः. विशेषाः लक्षिताः अनुभूताः एषाम् उक्तभेदानां तात्पर्यज्ञानाम् अन्वेषाञ्च रूपस्य स्वरूपस्य व्यक्तौ व्यक्तीकरणे वक्ष्यमाणा उदाहरणमाला निदर्श्यते ॥ १७० ॥ १७१ ॥

विश्वव्यापिनमुदाहरति भगवन्ताविति । भगवन्तौ षड्ऐश्वर्यशालिनौ जगतां नेत्रे नयनस्वरूपौ सूर्याचन्द्रमसौ अपि का कथा अन्येषामिति अपिना सूच्यते । अस्त गच्छत एव. पश्य । इत्यसमर्थं समर्थयति नियतिरिति । केन नियतिर्भाग्यं लङ्घ्यते अतिक्रम्यते न केनापीत्यर्थः । अत्र चतुर्थपादवाक्यरूपस्य समर्थकस्य विश्वव्यापित्वं ब्रह्मादिकीटपर्यन्तानां सर्वेषामेव नियत्यधीनत्वात् इति सामान्येन पूर्वोक्तद्विपादगतवाक्यस्य विशेषस्य समर्थनात् विश्वव्यापिनामार्यान्तरन्यरन्यास ।१७२।

पयोमुचः परीतापं हरन्त्येव शरीरिणाम् ।
नन्वात्मलाभो महतां परदुःखोपशान्तये ॥ १७३ ॥
उत्पादयति लोकस्य प्रीतिं मलयमारुतः ।
ननु दाक्षिण्यसम्पन्नः सर्वस्य भवति प्रियः ॥ १७४ ॥
जगदानन्दयत्येष मलिनोऽपि निशाकरः ।
पनुगृह्णाति हि परान् सदोषोऽपि द्विजेश्वरः ॥ १७५ ॥

विशेषस्यमुदाहरति पयोमुच इति । पयोमुच जलदा शरीरिणां परीताप हरन्त्येव । उक्तमर्थं समर्थयति नन्विति । महताम् आत्मलाभ. जन्मग्रहण परेषां दुःखस्य उपशान्तये नाशाय ननु निश्चितम् । अत्र महताम् इत्युक्तेर्न साधारण-प्राणिनामिति विशेषलाभात् उत्तरवाक्यरूपेण सामान्येन पूर्व-वाक्यरूपस्य विशेषस्य समर्थनात् विशेषस्यनामार्थान्तरन्यास ॥ १७३ ॥

श्लेषाविद्मुदाहरति उत्पादयतीति । मलयमारुत लोकस्य प्रीतिम् उत्पादयति । तथाहि, दाक्षिण्यसम्पन्न दाक्षिण्येन दक्षिणदिक्सम्पर्केण मलयस्य दाक्षिणात्यत्वात् इति भाव । अन्यत्र औदार्येण सम्पन्न युक्त लोक सर्वस्य प्रियो भवति ननु । अत्र श्लेषमूलत्वेनैव उत्तरवाक्यस्य पूर्ववाक्यसमर्थनात् श्लेषाविद्नामार्थान्तरन्यास. ॥ १७४ ॥

विरोधवन्तमुदाहरति जगदिति । एष निशाकर मलि-नोऽपि सकलङ्कोऽपि जगत् आनन्दयति । तथाहि द्विजेश्वर ब्राह्मणश्रेष्ठ सदोषोऽपि परान् अन्यान् अनुगृह्णाति उपदेश-दानादिना इति भाव. । अत्र निशाकरस्यापि द्विजराजत्वेन

मधुपानकलात् कण्ठान्निर्गतोऽप्यलिनां ध्वनिः।
कटुर्भवति कर्णस्य कामिनां पापमीदृशम् ॥१७६॥
अयं मम दहत्यङ्गमम्भोजदलसंस्तरः।
हुताशनप्रतिनिधिर्दाहात्मा ननु युज्यते ॥१७७॥
क्षिणोतु कामं शीतांशुः किं वसन्तो दुनोति माम्

द्विजेश्वरानुग्रहरूपेण सामान्येन विशेषस्य समर्थनं तद्व सदोषत्वानुग्राहकरूपयोर्विरुद्धधर्मयो' सामानाधिकरण्यात् विरोधयुक्तमिति विरोधवदर्थान्तरन्यासः ॥ १७५ ॥

अयुक्तकारिणमुदाहरति मधुनेति। मधुपानेन कलात् मधुरात् अलिनां भ्रमराणा कण्ठात् निर्गतोऽपि ध्वनिः कामिनां कर्णस्य कटुर्भवति। तथाहि, पापम् ईदृशं दु खद-मित्यर्थः। एतेन कामित्वस्य पापत्वमुक्तम्। अत्र पापस्य दु खकररूपसामान्येनार्थेन मधुरस्यापि भ्रमरध्वनिरूपविशेषस्य समर्थनात् तस्य सयुक्तत्वात् अयुक्तकारिनामार्थान्तरन्यास ॥ १७६ ॥

युक्तात्मानमुदाहरति अयमिति। अय हुताशनप्रतिनिधि' अग्निसदृशः अम्भोजाना पद्माना दलै. सस्तर शय्या मम अङ्ग दहति। तथाहि, दाह. दाहकता आत्मा स्वभाव. दाहकत्व-रूपा प्रकृतिरित्यर्थः अग्नेरिति शेषः युज्यते, अत्र पद्मदलरूप-शय्याया: हुताशनप्रतिनिधित्वेन अङ्गदाहकत्व युक्तम् इति सामान्येन विशेषस्य समर्थनात्। युक्तात्मनामार्थान्तरन्यास: ॥ १७७ ॥

युक्तायुक्तमुदाहरति क्षिणोत्वित्यादि। शीतांशुः कामं

मलिनाचरितं कर्म सुरभेर्नन्वमाम्रतम् ॥ १७८ ॥
कुमुदान्यपि दाहाय किमयं कमलाकरः ।
न चेन्दुसूर्य्योग्रेषु सूर्य्यसूत्रो मृदुर्भवेत् ॥ १७९ ॥
इत्यर्थान्तरन्यासचक्रम् ।

[illegible] पोऽयम्, तस्य कदाचित्प्रत्यवोडन दुष्टमिति भाव, [illegible] किं अयं मां दुनोति तापयति। तथाहि, सुरभे [illegible] गवनामधेयस्य पापेन अयुक्तस्य, मधो कामदुघायाश्च [illegible] परिभवोऽयमिति क्षोप। मलिनेन पापिना आचरित [illegible] प्रत्यवोडनरूपम् अमाम्रतम् अयुक्तं ननु, अत्र उत्कृष्टस्य [illegible] कारणेन अयुक्तत्वम् अपकृष्टस्य अपकर्मकारणेन युक्तत्वम् इति गुणाकृतामार्थान्तरम्। सुरभेरित्यस्य श्लिष्टत्वेन च [illegible] पोऽयनमो मतम् ॥ १७८ ॥

विपर्ययमुदाहरति कुमुदानीति। कुमुदान्यपि अति-शीतलान्यपीत्यर्थः, दाहाय, दाहकानीत्यर्थः, अय कमला-नामाकर पद्मानीत्यर्थः किं का कथा पद्मेषु सूर्य्यसूत्रत्वात् सूर्य्यतेजेषु इत्यर्थः, इन्दुसूत्रेषु चन्द्रपक्षेषु उग्रेषु दाहकेषु इत्यर्थः सूर्य्यसूत्रः सूर्य्यपक्षः न हि मृदु भवेत् यस्य इन्दु-पक्षोऽपि क्लेशावहः तस्य सूर्य्यपक्षस्य क्लेशावहत्वं किमु वक्तव्यमिति भावः। अत्र अयुक्तस्य कुमुदस्यापि अयुक्तकरणात् विपर्य्ययनामायमर्थान्तरन्यासः। स च इन्दुसूत्रसूर्य्यसूत्रपद-घटितवाक्यप्रमाणत्वेन पूर्ववद्वाक्यरूपविशेषः, समर्थित इत्यवधेयम् ॥ १७९ ॥

इति उत्तरत्रम् अर्थान्तरन्यासस्य चक्रं समूहः।

शब्दोपात्ते प्रतीते वा सादृश्ये वस्तुनोर्द्वयोः।
तत्र यद् भेदकथनं व्यतिरेकः स कथ्यते ॥१८०॥
धैर्य्यलावण्यगाम्भीर्य्यप्रमुखैस्त्वमुदन्वतः।
गुणैस्तुल्योऽसि भेदस्तु वपुषैवेक्षणेन ते ॥ १८१ ॥
इत्येकव्यतिरेकोऽयं धर्मैक्यैकत्र वर्त्तिना।
प्रतीतिविषयप्राप्तैर्भेदस्योभयवर्त्तिनः ॥ १८२ ॥

व्यतिरेकमाह शब्दोपात्ते इति। द्वयोर्वस्तुनोः उपमानोपमेययोः सादृश्ये शब्दोपात्ते साधारणधर्मप्रतिपादकशब्दप्रयोगेण बोधिते वा प्रतीते साधारणधर्मवाचकशब्दानुपादानात् व्यञ्जनया सूचिते सति तत्र तयोरित्यर्थः. षष्ठ्यर्थे सप्तमी। यत् भेदकथनं विशेषप्रतिपादनं स व्यतिरेकः कथ्यते। तथाच, उपमानोपमेययोः उत्कर्षापकर्षद्योतकवैशिष्ट्यकथनं व्यतिरेकः इत्युक्तम्। अत एवोक्तं विश्वनाथेन यथा, आधिक्यमुपमेयस्योपमानान्न्यूनतायवा। व्यतिरेक इति। तत्र उत्कर्षोदाहरणानि वक्ष्यमाणानि. अपकर्षोदाहरणं दर्पणकारेणोक्तम्। यथा. क्षीणः क्षीणोऽपि शशी भूयोभूयोऽभिवर्द्धते नित्यम्। विरम प्रसीद सुन्दरि। यौवनमनिवर्त्ति यातन्तु। अत्र उपमेयस्य यौवनस्य उपमानात् चन्द्रादचिरस्थायित्वेनापकर्षः। १८० ॥

तत्रैकव्यतिरेकमाह धैर्य्येत्यादि। धैर्य्यम् अनौद्धत्यम् अनतिक्रान्तवेलत्वञ्च. लावण्यं सौन्दर्य्यं लवणमयत्वञ्च. गाम्भीर्य्यं दुरवगाहस्वभावत्वम् अगाधत्वञ्च इत्यादिभिर्गुणैः. त्वम् उदन्वतः समुद्रस्य तुल्योऽसि केवलम् ईक्षणेन अतिमनोहरेण इत्यर्थः वपुषा शरीरेण ते तव भेद उदन्वत इति शेषः। अत्र एकत्र

अभिन्नवेलो गम्भीरावम्बुराशिर्भवानपि ।
अमावज्जनमद्भागस्त्वन्तु चामीकरद्युतिः ॥१८३॥
उभयव्यतिरेकोऽयमुभयोर्भेदको गुणौ ।
तार्णो पिशङ्गता चोभौ यत् पृथग्दर्शिताविह १८४
त्व समुद्रश्च दुर्वारो महामत्त्वो सतेजसौ ।
अयन्तु दृश्यो भेदः स जड़ात्मा पटुर्भवान् ॥१८५॥

अभिन्नवेलेन स्थितेन धर्मेण अतिमनोहरवपुषत्वरूपेण अम्बुराशिना उपमेयोपमानस्थितस्य भेदस्य उपमेयोत्कर्षस्य उपमानापकर्षस्य चेत्यर्थे प्रतीतिविषयप्राप्ते प्रतीतत्वात् इदं अयम् एकव्यतिरेक, एकमात्रगतधर्मस्य एव उभयोभेदकत्वात् इति भावः ॥ १८१ ॥ १८२ ॥

उभयव्यतिरेकमुदाहरति अभिन्नवेलेत्यादि। अम्बुराशिः भवान् अपि उभौ अभिन्नवेलौ अनतिक्रान्तमर्य्यादौ तथा गम्भीरौ दत्तगाहस्वभावौ अगाधौ इत्यर्थः। किन्तु असौ अम्बुराशिः अमज्जनमद्भागः सामुद्रिकजलस्य क्षारत्वादिति भावः, त्वन्तु चामीकरद्युति काञ्चनवर्ण अतिसुन्दर इत्यर्थः। इह उभयोः उपमानोपमेययोः कार्णं पिशङ्गता च इमौ उभौ भेदकौ भेदसाधने गुणौ यत् पृथक् दर्शितौ, अतः अयम् उभयव्यतिरेक उभयनिष्ठत्वादनयोर्भेदकयोरिति भावः ॥ १८३ ॥ १८४ ॥

एकव्यतिरेकमुदाहरति त्वमित्यादि। त्व समुद्रश्च दुर्वारौ दुर्वारौ अवार्य्यवेगश्च, महामत्त्वो सत्त्वगुणाधिक प्रबलजलश्च, सतेजसौ महाप्रतापः सवाडवानलश्च इत्यर्थः, अयन्तु दृश्यो भेदः स समुद्र जड़ात्मा जलमयस्वरूपः अन्यत्र शीतल-

स एष श्लेषरूपत्वात् सश्लेष इति गृह्यताम् ।
साक्षेपश्च सहेतुश्च दर्श्यते तदपि द्वयम् ॥ १८६ ॥
स्थितिमानपि धीरोऽपि रत्नानामकरोऽपि सन् ।
तव कक्षां न यात्येव मलिनो मकरालयः ॥ १८७ ॥
वहन्नपि महीं क्षत्स्नां सशैलद्वीपसागराम् ।
भर्तृभावाद् भुजङ्गानां शेषस्त्वत्तो निकृष्यते ॥ १८८ ॥

स्वभाव. भवान्तु अति सुनिपुणः अन्यत्र अतिवेगवान् । अत्र भेदकृतो धर्मयो श्लेषरूपत्वात् श्लिष्टत्वात् इत्यर्थः एष सश्लेषव्यतिरेक इति न च अत्र साधारणधर्माणा श्लिष्टत्वे सश्लेषव्यतिरेक इति वाच्य तथात्वे सर्वत्रैव सश्लेषव्यतिरेकत्वप्रसङ्गात् क्वचित् शब्दश्लेषस्य क्वचिद्वा अर्थश्लेषस्य सङ्गावस्य दुर्वारत्वात् इति सुधीभिर्भाव्यम् । पुनश्च अस्य भेदद्वय दर्श्यते साक्षेपः सहेतुश्च. उदाहरणे तु अनयोर्वक्ष्यमाणे इति ॥ १८५ ॥ १८६ ॥

साक्षेपव्यतिरेकमुदाहरति स्थितिमानिति । मकरालयः समुद्र यत मलिन. अत स्थितिमान् अनुल्लङ्घितमर्यादः अपि. धीरोऽपि गभीरोऽपि अन्यत्र दुरवगाहस्वभावोऽपि तथा रत्नानाम् आकर उत्पत्तिस्थानमपि अन्यत्र गुणरत्नानाम् आधारोऽपि इत्यर्थः तव कक्षा सादृश्य न यात्येव न प्राप्नोति एव । अत्र उपमानगतेन मालिन्यरूपधर्मेण साध्यप्राप्तेराक्षेपात् साक्षेपव्यतिरेकः ॥ १८७ ॥

सहेतुव्यतिरेकमाह वहन्निति । सशैलद्वीपसागरा क्षत्स्नां समग्रा मही वहन्नपि शेष. अनन्त भुजङ्गानां पन्नगानाम् अथच विटानां, भुजङ्गो विटसर्पयो. इति कोष. । भर्तृभावाद्

शब्दोपादानमाद्यस्य व्यतिरेकोऽयमीदृशः ।
प्रतीयमानसादृश्योऽप्यस्ति सोऽप्यभिधीयते ॥ १८९ ॥
त्वन्मुखं कमलञ्चेति द्वयोरप्यनयोर्भिदा ।
कमलं जलमंरोहि त्वन्मुखं त्वदुपाश्रयम् ॥ १९० ॥
अभ्रुविलासमस्पृष्टमदरागं मृगेक्षणम् ।
कुर्वन्तु नयनद्वन्द्वं तव तद्गुणभूषितम् ॥ १९१ ॥

सामिलात् लक्ष्म निरूप्यते निरूढो भवति। अत्र भुजङ्ग-पतिलक्षणधर्मस्य लक्ष्मोक्तया उपमानभूतानन्तापकर्षे हेतुत्व-कीर्तनात् सहेतुव्यतिरेक ॥ १८८ ॥

इत्थं शब्दोपात्तसादृश्यव्यतिरेकमुखा प्रतीयमानसादृश्य निरूपयति। शब्दोपादानेति शब्दस्य साधारणधर्मवाचकस्य उपादानेन यत् सादृश्य तस्य व्यतिरेकः अयं पूर्वोक्तप्रकारः। प्रतीयमान सादृश्य यत्र तादृशोऽपि व्यतिरेकोऽस्ति अधुना स अभिधीयते इत्यन्वय ॥ १८९ ॥

त्वन्मुखमिति। तव मुख कमलञ्च, अनयोर्द्वयोः इति भिदा भेद, कमल जलमरोहि जलज त्वन्मुखन्तु त्वदुपाश्रय त्वदेकाधारम्। अत्र साधर्म्यस्य अप्रयोगेऽपि मुखकमलयो साम्य प्रसिद्धिवशात् प्रतीयते इति प्रतीयमानव्यतिरेकः॥१९०॥

अभ्रुविलासेति। मृगस्य ईक्षण नयनम् अभ्रुविलासं भ्रू-विलासरहित तथा अस्पृष्ट मदरागो येन तादृशम् अप्राप्तमद्य-पानजनितलौहित्यमित्यर्थ, तव इदं नयनद्वयन्तु तद्गुणभूषित भ्रूविलासयुक्त स्पृष्टमदरागञ्च इत्यर्थः। अत्र उपमानमृगेक्ष-णोपमेयनयनद्वयानां विरुद्धधर्मवत्त्वमेव दर्शितं सादृश्य प्रतीय-मानव्यतिरेक ॥ १९१ ॥

पूर्वस्मिन् भेदमात्रोक्तिरस्मिन्नाधिक्यदर्शनम्।
सदृशव्यतिरेकश्च पुनरन्यः प्रदर्श्यते ॥ १८२ ॥
त्वन्मुखं पुण्डरीकञ्च फुल्ले सुरभिगन्धिनी।
भ्रमद्भ्रमरमन्भोजं लोलनेत्रं सुखन्तु ते ॥ १८३ ॥
चन्द्रोऽयमम्बरोत्तंसो हंसोऽयं तोयभूषणम्।
नभो नक्षत्रमालोदसुत्फुल्लकुमुदं पयः ॥ १८४ ॥

उक्तोदाहरणयो. फलं दर्शयति पूर्वस्मिन्निति। पूर्वस्मिन् उदाहरणे त्वन्मुखमित्यत्र भेदमात्रस्य उपमानोपमेययोर्भेदकधर्ममात्रस्य उक्ति. न तु उत्कर्षस्य अपकर्षस्य वा, भेदश्च द्विधा विरुद्धधर्माध्यास: कारणभेदश्च. अत्र तु कारणभेद एवेति बोध्यम्। अस्मिन् अव्यवहिते उदाहरणे अम्भोविलासमित्यत्र आधिक्यस्य उपमानोपमेययोर्निकर्षोत्कर्षरूपस्य दर्शनम् अत्र तु विरुद्धधर्माध्यास एव भेदकारणमित्यवधेयम्। अन्यश्च सदृशव्यतिरेक प्रदर्श्यते उदाह्रियते ॥ १८२ ॥

सदृशव्यतिरेक शाब्दमुदाहरति त्वन्मुखमिति। तव मुखं पुण्डरीकं पद्मञ्च फुल्ले विकसिते, फुल्लत्वमेकत्र स्मितशोभितत्वम् अन्यत्र प्रकाशमात्रं, तथा सुरभिगन्धिनी, अत्र पुष्पत्वसुरभिगन्धित्वयो: साधारण्यात् सादृश्यमत्र शाब्दम्। अम्भोजं भ्रमन्त: भ्रमरा यस्मिन् तत्, ते सुखन्तु लोले नेत्रे यस्मिन् तादृशम्। अत्र असामान्यमपि भ्रमद्भ्रमरत्वं लोलनेत्रत्वञ्च प्रायश: सदृशमेव न तु विरुद्धमिति सदृशव्यतिरेकोऽयं शाब्द: ॥ १८३ ॥

सदृशव्यतिरेकमार्थमुदाहरति चन्द्र इति। अयम् अम्ब-

प्रतीयमानशौक्ल्यादिसाम्ययोश्चन्द्रहंसयोः ।
कृतः प्रतीतगत्योश्च भेदोऽस्मिन् वियदभ्रमोः १९५
पूर्वत्र शब्दवत् साम्यमुभयत्रापि भेदकम् ।
भृङ्गनेत्रादितुल्यं तत् सदृशव्यतिरेकिता ॥ १९६ ॥
परलोकमलभ्यमवार्यं सूर्यरश्मिभिः ।

यत्तम आकाशभूषणं चन्द्र, अयं हंस तोयस्य भूषणम्, इदं नभ आकाश नक्षत्रमालि तारविराजित, पयश्च उत्फुल्लानि कुमुदानि यस्मिन् तादृशम् । नभो नक्षत्रमालीदमिदमुत्कुमुद पय इति च पाठ. क्वचित् दृश्यते । अत्र चन्द्रहंसयोराकाशपयसोश्च उपमानोपमेययो' सादृश्यमर्थत प्रतीयते इति सदृशव्यतिरेक आर्थ ॥ १९४ ॥

प्रतीयमानेति । अस्मिन् चन्द्रोऽयमित्यत्र उदाहरणे प्रतीयमान वाचकशब्दाप्रयोगात् आर्थं शौक्ल्यादिसाम्य ययो' तादृशयो चन्द्रहंसयो: प्रतीता प्रसिद्धा गतिर्ययोस्तथाभूतयो: वियदभ्रमो आकाशजलयो. उपमानोपमेययो' भेद: कृत: दर्शित इति सादृश्यस्य शब्दानुपात्तत्वात् सदृशव्यतिरेक आर्थ इति भाव ॥ १९५ ॥

पूर्वत्रेति । पूर्वत्र पूर्वस्मिन् त्वन्मुखमित्यत्र उदाहरणे उभयत्रापि उपमानोपमेययोरुभयोरपीत्यर्थ: शब्दवत् शब्दोपात्तं साम्य भेदक, भृङ्गनेत्रादिभ्रमदभ्रमरत्व लोलनेत्रत्वञ्च तुल्य विम्बानुविम्बतया सादृश्यबोधक, तत् तस्मात् सदृशव्यतिरेक: गाढ इति भाव ॥ १९६ ॥

सजातिव्यतिरेक दर्शयति अरत्नेति । यूना यौवनप्रभव

दृष्टिरोधकरं यूनां यौवनप्रभवं तमः ॥ १८७ ॥
सजातिव्यतिरेकोऽयं तमोजातेरिदं तमः।
दृष्टिरोधितया तुल्यं भिन्नमन्यैरदर्शि यत् ॥ १८८ ॥

व्यतिरेकचक्रम्।

प्रसिद्धहेतुव्याहत्या यत् किञ्चित् कारणान्तरम्।
यत्र स्वाभाविकत्वं वा विभाव्यं सा विभावना १८९

तमः मोहः अन्धकारश्च अरत्नालोकसंहार्यं रत्नानाम् आलोकेन असंहार्यं हर्त्तुमशक्यं सूर्यरश्मिभिः अवार्यम् अनाश्यं तथा दृष्टिः चक्षुः ज्ञानञ्च तस्या रोधः आवरणं तत्करम्। अत्र श्लेषेण तमःपदोपात्तयोर्मोहान्धकारयोर्विरुद्धधर्मत्वकीर्त्तनेऽपि दृष्टिरोधकत्वसाम्यात् सजातिव्यतिरेकः ॥ १८७ ॥

सजातिव्यतिरेकं घटयति सजातीति। यत् यस्मात् दृष्टिरोधितया तुल्यम् इदं तमः मोहरूपम् अन्यैः साधारणधर्मैः रत्नालोकहार्य्यत्वादिभिः तमोजातेः अन्धकारजातितः भिन्नम् अदर्शि प्रदर्शितम्, अतः अयं सजातिव्यतिरेकः ॥ १८८ ॥

विभावना निरूपयति प्रसिद्धेति। यत्र वैचित्र्ये प्रसिद्धस्य विख्यातस्य हेतोः कारणस्य व्याहत्या अभावप्रदर्शनेन यत् किञ्चित् कारणान्तरं वा स्वाभाविकत्वं स्वतःसिद्धत्वं विभाव्य विशेषेण अभिनिवेशेन भाव्य चिन्तनीयं सा विभावना। तथाच, प्रसिद्धं हेतुमन्तरेण फलोत्पत्तिदर्शनात् तस्य यत् किञ्चित् गूढकारणान्तरस्य वा तदनुपपत्त्या स्वाभाविकत्वस्य वा भावनावैचित्र्यं विभावनेति बोध्यम्। दर्पणकारस्तु, विभावना विना हेतुं कार्य्योत्पत्तिर्यदुच्यते, इत्याह ॥ १८९ ॥

अपीतजीवकादम्बमसंसृष्टामलाम्बरम् ।
अप्रसादितशुद्धाम्बु जगदासीन्मनोहरम् ॥ २०० ॥
अनञ्जिताऽसिता दृष्टिर्भ्रूरनावर्जिता नता ।
अरञ्जितोऽरुणश्चायमधरस्तव सुन्दरि ! ॥ २०१ ॥
यदपीतादिजन्यं स्यात् जीवत्वाद्यन्यहेतुजम् ।
अहेतुकस्य तस्येह विवक्षेत्यविरुद्धता ॥ २०२ ॥

कारणान्तरविभावनामाह अपीतेति । जगत् अपीताः अकृतमधुपानाः अथच जीवाः मत्ताः कादम्बाः हंसविशेषा यस्मिन् तत्, असंसृष्टं मार्जन्या अपरिष्कृतम् अथच अमलं निर्मलम् अम्बरम् आकाशं यस्मिन् तत्, तथा अप्रसादितं केनाप्यपरिष्कृतम् अथच शुद्धम् अम्बु जलं यस्मिन् तथाभूतम् अतएव अतिमनोहरम् आसीदित्यन्वयः । अत्र प्रसिद्धस्य जीवत्वकारणस्य पानस्य, अमलत्वकारणस्य मार्जनस्य, शुद्धिकारणस्य प्रसादनस्य अभावेऽपि तत्तत्फलोत्पत्तिः शरत्कालरूपं कारणान्तरं विभावयतीति कारणान्तरविभावना ॥ २०० ॥

स्वाभाविकत्वे विभावनामाह अनञ्जितेति । हे सुन्दरि ! तव दृष्टिः अनञ्जिता अञ्जनेन अननुलिप्तापि असिता श्यामला, भ्रूः अनावर्जिता अनाकृष्टापि नता वक्रीकृता, अयमधरश्च अरञ्जितोऽपि अरुणः अत्र प्रसिद्धमसितत्वकारणम् अञ्जनं वक्रताकारणमार्जनम् अरुणताकारणं रञ्जनं [तदभावेऽपि तत्तत्फलोपपत्तिः स्वाभाविकत्वमेव भावयतीति स्वाभाविकत्वविभावना ॥ २०१ ॥

उक्तयोरुदाहरणयोर्लक्षणं सङ्गमयन् विरोधं परिहरति यदिति । पूर्वोदाहरणे अपीतादिजन्यं पानाद्यजन्यमित्यर्थं

वक्त्रं निसर्गसुरभि वपुरव्याजसुन्दरम्।
अकारणरिपुश्चन्द्रो निर्निमित्तामुहृत् स्मर ॥२०३॥
निसर्गादिपदैरत्र हेतुः साक्षान्निवर्त्तितः।
उक्तञ्च सुरभित्वादि फलं तत् सा विभावना॥२०४

इति विभावनाचक्रम्।

जीवत्वादि अन्यहेतुज शरत्कालरूपकारणान्तरजन्य, द्वितीयोदाहरणे अञ्जितत्वाद्यजन्यम् अमितत्वादि अहेतुक स्वाभाविकम्। इह उदाहरणद्वये तस्य अन्यहेतुजत्वस्य अहेतुकस्य च विवक्षा वक्तुमिच्छा इत्यत अविरुद्धता विरोधाभाव। अय भाव कारणाभावे कथ कार्योत्पत्ति, कारणत्वस्य कार्याव्यवहितपूर्ववर्त्तित्वनियमात् कार्यत्वस्य कारणाव्यवहितोत्तरवर्त्तित्वनियमाच्च अत आपातत विरोधावगतावपि वक्तुरिच्छावशात् कारणान्तरस्य स्वभावरूपालौकिककारणस्य चानुमन्यानात् वैचित्र्यजनकत्वाच्च न विरोध इति सुधीभिर्विवेच्यम्॥२०२॥

पूर्व स्वभावस्यार्थत्वमुक्त सम्प्रति शब्द स्वाभाविकत्वमुदाहरति वक्त्रमित्यादि। वक्त्र मुख निसर्गेण स्वभावेन सुरभि सुगन्धि, वपुः शरीरम् अव्याजेन अकपटेन सुन्दरं स्वभावसुन्दर न तु आहार्यशोभयेत्यर्थ, चन्द्रः अकारणरिपु, अहेतुकशत्रु तया स्मर काम निर्निमित्तामुहृत् अकारणशत्रुः अत्र निसर्गादिपदै. साक्षात्प्रत्यक्षीभूत लौकिक इत्यर्थः हेतुः निवर्त्तित, सुरभित्वादिरूप फलञ्च उक्त, तत् तस्मात् सा प्रसिद्धा शब्दगतस्वाभाविकत्वलक्षणा विभावना इति॥ २०३॥ २०४॥

इति उल्लास विभावनाचक्रं विभावनासमूहः।

वस्तु किञ्चिदभिप्रेत्य तत्तुल्यस्यान्यवस्तुनः ।
उक्तिः संज्ञे परूपत्वात् सा समासोक्तिरिष्यते॥२०५

पिबन्मधु यथाकामं भ्रमरः फुल्लपङ्कजे ।
अप्यसन्नद्धसौरभ्यं पश्य चुम्बति कुड्मलम् ॥२०६॥

इति प्रौढाङ्गनावद्धरतिलीलस्य रागिणः ।
कस्याश्चिदपि बालायामिच्छावृत्तिर्विभाव्यते॥२०७

समासोक्तिमाह वस्तु इति । किञ्चित् किमपि वस्तु अभिप्रेत्य सङ्कल्प्य तत्तुल्यस्य तत्सदृशस्य अन्यस्य वस्तुनः उक्तिः कथनं सा संज्ञेपरूपत्वात् सज्ञेपेण उक्तत्वात् समासोक्तिरिष्यते संज्ञेपस्यैव समासत्वादिति । अयं भावः, द्वयोः प्रस्तुताप्रस्तुतयोः शब्देन प्रतिपादने भूयान् विस्तारः, स च न वैचित्र्यमावहतीति एकस्याप्रस्तुतस्य शब्देन प्रतिपादने व्यञ्जनया प्रस्तुतार्थस्य बोधनमतीवचमत्कारपदवीमारोहतीति सज्ञेपोक्तिरिति । उक्तञ्च ध्वनिकृता, वाच्योऽर्थो न तथा स्फुटते प्रतीयमानो यथेति । दर्पणकारस्तु समासोक्तिः समैर्यत्र कार्यलिङ्गविशेषणैः । व्यवहारसमारोपः प्रस्तुतेऽन्यस्य वस्तुन इत्याह ॥ २०५ ॥

समासोक्तौ कार्यलिङ्गविशेषणघटितत्वात् प्रथमं कार्यघटितां समासोक्तिमुदाहरति पिबन्नित्यादि । भ्रमरः फुल्लपङ्कजे विकसितारविन्दे यथाकामं मधु पिबन् असन्नद्धसौरभ्यम् अज्ञातमधुगन्धम् अपि कुड्मलं चुम्बति पश्य । इत्यत्र प्रौढायाम् अङ्गनायाम् आवद्धा रतिलीला येन तादृशस्य रागिणः अनुरागवतः कामिनः कस्याश्चित् बालायां मुग्धायाम् इच्छावृत्तिः

विशेष्यमात्रभिन्नापि तुल्याकारविशेषणा।
अस्त्यसावपराप्यस्ति भिन्नाभिन्नविशेषणा ॥ २०८ ॥
रूढ़मूलः फलभरैः पुष्पान्ननिशमर्थिनः।
सान्द्रच्छायो महाहृद्यः सोऽयमासादितो मया२०९
अनल्पविटपाभोगः फलपुष्पसमृद्धिमान्।
सुच्छायः स्थैर्य्यवान् दैवादेष लब्धो मया द्रुमः२१०

अभिलाषोदयः विभाव्यते ध्वन्यते इति अप्रस्तुतात् भ्रमर-कार्य्यात् प्रस्तुतस्य कामुककार्य्यस्य प्रतीति ॥ २०६ ॥ २०७ ॥

विशेषणघटितभेद दर्शयति विशेष्येति। विशेष्यमात्र विशेष्यपदमात्रं भिन्न श्लेषाभावात् एवमात्रबोधक यत्र सा तुल्याकारविशेषणा तुल्याकार श्लेषवशात् वाच्यद्वयोभयधर्म-बोधक विशेषण यत्र सा इत्येकविधा अस्ति, अपरा च भिन्नश्च अभिन्नश्च विशेषण यत्र तादृशी इति द्वितीयाऽपि अस्ति॥२०८॥

यथाक्रममुदाहरणे दर्शयति रूढ इति। रूढ प्रवृद्ध मूल शिफा मूलधनञ्च यस्य स, फलाना भरैः समूहै. बहुभिर्धनैश्च अनिशम् अर्थिनः पुष्णन् प्रतिपालयन्, तथा सान्द्रा घना छाया अनातपप्रदेश कान्तिश्च यस्य तादृश स: प्रसिद्धः अय महान् हृद्यः मया आसादित प्राप्त' ॥ २०९ ॥

अनल्पेति। अनल्प, बहुलः विटपाना शाखानाम् आभोग. विस्तारः यस्य स, फलानां पुष्पाणाञ्च समृद्धिः विद्यते अस्य स, शोभना छाया अनातपप्रदेश' कान्तिश्च यस्य स. तथा स्थैर्य्यवान् स्थैर्य्यं सारवत्त्व तद्वान् दृढप्रतिज्ञश्च। उक्तञ्च. व्यवसायादचलनं स्थैर्य्यं विघ्ने महत्यपीति। एवम्भूतः एष द्रुमः मया दैवात् लब्धः ॥ २१० ॥

उभयत्र पुमान् कश्चिद् वृत्तत्वेनोपवर्णितः ।
सर्वे साधारणा धर्माः पूर्वत्रान्यत्र तु इयम् ॥२११॥
निवृत्तव्यालसंसर्गो निसर्गमधुराशयः ।
पयसामिव निधिः कष्टं कालेन परिशुष्यते ॥२१२॥
इत्यपूर्वसमासोक्तिः पूर्वधर्मनिवर्त्तनात् ।
समुद्रेण समानस्य पुंसो व्यापत्तिसूचनात् ॥२१३॥

इति समासोक्तिचक्रम् ।

उभयत्र लक्षणं सङ्गमयति उभयत्रेति। उभयत्र पद्ययोः कश्चित् पुमान् वृत्तत्वेन उपवर्णितः, पूर्वत्र उदाहरणे सर्वे धर्मा साधारणा श्लेषमूलत्वात् विशेष्यपदमात्र श्लेषस्वर्गाभावात् भिन्नमिति। परत्रोदाहरणे तु इयम् आद्यद्वितीये विशेषणे श्लेषाभावाद् भिन्ने, तृतीयचतुर्थे श्लेषोपष्टम्भात् अभिन्ने इति भिन्नाभिन्नविशेषणत्वम् ॥ २११ ॥

अपूर्वसमासोक्तिमुदाहरति निवृत्तेत्यादि। निवृत्त. व्यालाना सर्पाणा खलानाञ्च ससर्ग. यस्मात् स, निसर्गेण स्वभावत मधुरा सुमिष्टजलानामाशय: आधार: अन्यत्र मधुर. मनोरम आशयो यस्य स, अयम् अम्भोनिधि: कालेन समयेन यत्नेन च परिशुष्यते शोष नीयते विनाश्यते च कष्ट कष्टकरमेतदित्यर्थ.। इत्यत्र पूर्वधर्मयो: व्यालससर्गित्वलवणजलत्वयो: निवर्त्तनात् अनुपादानेन तद्विपरीतधर्मयो: कीर्त्तनादित्यर्थ. समुद्रेण समानस्य पुस: व्यापत्तिसूचनात् विनाशद्योतनात् अपूर्वा पूर्वविपरीता समासोक्तिरियमित्यन्वय: ॥ २१२ ॥ २१३ ॥

विवक्षा या विशेषस्य लोकसीमातिवर्त्तिनी।
सातिशयोक्तिः स्यादलङ्कारोत्तमा यथा ॥२१४॥
मल्लिकामालधारिण्यः सर्वाङ्गीणार्द्रचन्दनाः।
क्षौमवत्यो न लक्ष्यन्ते ज्योत्स्नायामभिसारिकाः॥२१५
चन्द्रातपस्य वाहुल्यमुक्तासुत्कर्षवत्तया।

अतिशयोक्तिमाह विवक्षेति। विशेषस्य प्रस्तुतवस्तुगतस्य उत्कर्षस्य लोकसीमा लोकमर्य्यादा तस्या अतिवर्त्तिनी अलौकिकचमत्कारशालिनी या विवक्षा उक्तिः, अत्र स्वार्थे मन्प्रत्ययो द्रष्टव्यः। असौ अलङ्कारेषु उत्तमा सर्वालङ्कारश्रेष्ठा इत्यर्थः अतिशयोक्तिः स्यादित्यन्वयः। उक्तञ्चाग्निपुराणे, लोकसीमातिवृत्तस्य वस्तुधर्मस्य कीर्त्तनम्। भवेदतिशयो नाम सम्भवोऽसम्भवो द्विधेति ॥ २१४ ॥

अतिशयोक्तिमुदाहरति मल्लिकेति। अभिसारिका कान्तार्थिन्यः, कान्तार्थिनी तु या याति सङ्केतं साभिसारिकेति। मल्लिकाना माला मल्लिकामालं तस्य धारिण्यः, सर्वाङ्गीणं सर्वाङ्गव्यापम् आर्द्रं चन्दनं यासां ताः, तथा क्षौम पट्टवसनं विद्यते यासां ताः परिहितश्वेतपट्टवसना इत्यर्थः, अतएव ज्योत्स्नाया न लक्ष्यन्ते। अत्र ज्योत्स्नावर्णनस्य प्रस्तुतत्वात् तस्याः श्वेतत्व मल्लिकामालादिश्वेतनायिकाश्वेतत्वाभिन्नतया वर्णनात् समधिकत्वेन प्रतीयते. अथवा तादृशरजन्याम् अभिसारिकाणामलक्ष्यत्वासम्भवेऽपि अलक्ष्यत्वकथनात् प्रस्तुतायाः ज्योत्स्नायाः श्वेतत्वस्य सम्यगुत्कर्षः प्रतीयते ॥ २१५ ॥

उक्तोदाहरणे लक्षणं योजयति चन्द्रातपस्येति। अत्र

संशयातिशयादीनां व्यक्तौ किञ्चिन्निदर्श्यते ॥२१६॥

स्तनयोर्जघनस्यापि मध्ये मध्यं प्रिये ! तव ।
सन्ति नास्तीति सन्देहो न मेऽद्यापि निवर्त्तते २१७
निर्णेतुं शक्यमस्तीति मध्यं तव नितम्बिनि ! ।
स्तनयो नोपपद्येत पयोधरभरस्थितिः ॥ २१८ ॥
पश्यो विशालं भूपाल ! भुवनत्रितयोदरम् ॥

उत्प्रेक्षातिशयस्योत्साया: उत्कर्षवत्तया बाहुल्यं गाढत्वमुक्तम् । इदानीं संशयातिशयादीना व्यक्तौ व्यक्तीकरणे किञ्चित् निदर्श्यत इदाक्रियते इत्यन्वय: ॥ २१६ ॥

संशयातिशयोक्तिमुदाहरति स्तनयोरिति । हे प्रिये ! तव मध्य स्तनयो विपुलयोरिति शेष', जघनस्यापि विपुलस्येति शेष. मध्ये अस्ति वा नास्ति इति सन्देह: मे मम अद्यापि अस्तीति ज्ञाने मत्यपीत्यर्थ. न निवर्त्तते । अत्र तथाविधसंशयस्य अभावनीयत्वेऽपि तत्कल्पनात् मध्यदेशस्यातिक्षीणत्व ध्वन्यते इति संशयमूलातिशयोक्ति: ॥ २१७ ॥

निर्णयातिशयोक्तिमुदाहरति निर्णेतुमिति । हे नितम्बिनि । तव मध्य निर्णेतु शक्यम् अस्ति अन्यथा पयोधरयो: स्तनयो भरस्य स्थिति: न उपपद्येत मध्यं नास्ति चेत् कथं पयोधरौ तदुपरि वर्त्तेताम् । अत्र पयोधरयोर्निरवलम्बनस्थित्यनुपपत्ते मध्यदेशस्य अस्तित्वनिर्णयासम्बन्धेऽपि तत्कल्पनेन अतिक्षीणत्वनिर्णयात् निर्णयातिशयोक्तिरियम्॥२१८॥

अन्वयार्थिकं अतिशयोक्तिं दर्शयति अहो इति । हे भूपाल ! भुवनत्रितयोदर त्रिभुवनाभोग इत्यर्थ: विशालम्

माति मातुरुदरेऽपि यशोराशिर्यदत्र ते ॥२१८॥
अलङ्कारान्तराणामप्येकमाहुः परायणम् ।
वागीशमहितामुक्तिमिमामतिशयाह्वयाम् ॥२२०॥

इति अतिशयोक्तिचक्रम् ।

अन्यथैव स्थिता वृत्तिश्चेतनस्येतरस्य वा ।
अन्यथोत्प्रेक्ष्यते यत्र तामुत्प्रेक्षां विदुर्यथा ॥२२१॥

अहो इति आश्चर्यसूचकमव्ययम्। त्रिभुवनस्य विशालत्वमत्याश्चर्यमित्यर्थः। यद् यस्मात् अत्र त्रिभुवनोदरे मातुर्भगवत्योऽपि ते यशोराशि माति पर्याप्तता गच्छति। अत्र आश्रयस्य त्रिभुवनोदरस्य विशालत्वप्रतिपादनेन आश्रितस्य यशोराशेराधिक्यवर्णनात् आश्रयाधिक्यातिशयोक्तिः। २१८॥

अथ अलङ्कारोक्तमत्व दर्शयति। अलङ्कारेति वागीशमहितां वाक्पतिपूजिताम् इमाम् अतिशयाह्वयाम् अतिशयाख्याम् उक्तिम् अतिशयोक्तिमित्यर्थः अलङ्कारान्तराणाम् अन्येषाम् अलङ्काराणाम् अपि एक परायणम् परमाश्रयम् आहुः कवय इति शेषः. अस्या एव वैचित्र्यातिशयमहिम्ना सर्वेषामलङ्काराणां प्रादुर्भावादिति भावः. वैचित्र्यातिशयाभावे विद्यमानानामपि उपमादीना नालङ्कारता यथा गौरिव गवय इत्यादि। उक्तञ्च. कस्याप्यतिशयस्योक्तिरित्यन्वर्थविचारणात्। प्रायेणामी अलङ्कारा भिन्ना नातिशयोक्तित इति ॥ २२० ॥

अथोत्प्रेक्षां निरूपयति अन्यथेति। चेतनस्य इतरस्य अचेतनस्य वा प्रस्तुतस्य अन्यथा अन्येन प्रकारेण स्थिता वृत्तिः स्वाभाविकी वृत्तिः गुणक्रियादिश्च यत्र वैचित्र्ये अन्यथा अन्य-

मध्यन्दिनार्कमन्तप्तः सरसीं गाहते गजः ।
मन्ये मार्त्तण्डरुच्छाणि पद्मान्युद्वर्तुमुद्यतः ॥२२१॥

अत्रेति । अप्रस्तुतस्वरूपत्वेन उत्प्रेक्ष्यते सम्भाव्यते तामुत्प्रेक्षां विदुः । गतेलत यत्त्विति पाठे क्रियाविशेषणम् । यदुत्प्रेक्षणमित्यर्थः । उक्तश्च प्रकाशकारेण, सम्भावनमथोत्प्रेक्षा इति । सम्भावनं हि उत्कटकोटिकं भवति, तच्च प्रस्तुतस्य निगरणेन भवति, निगरणञ्च क्वचित् प्रस्तुतस्य अनुपादानं क्वचिदुपात्तस्यापि अधिकरणम् । यथा, विषयस्यानुपादानेऽप्युपादानेऽपि सूरय । अधिकरणमात्रेण निगीर्णत्वं प्रचक्षते इति । दर्पणकारस्तु भवेत् सम्भावनोत्प्रेक्षा प्रकृतस्य परात्मना । गम्या प्रतीयमाना सेति लक्षणं कृत्वा जातिगततया चास्या विविधभेदानाह ॥ २२१ ॥

चेतनागतामुत्प्रेक्षामुदाहरति मध्येति । मध्यन्दिनार्केण मध्याह्नसूर्येण मन्तप्तः गज सरसीं गाहते अवतरति । अत्रोत्प्रेक्षते मन्ये इति, मार्त्तण्डरुच्छाणि सूर्योपचान् पद्मानि उद्वर्तुम् उन्मूलयितुम् उद्यत इति मन्ये सम्भावयामीत्यर्थः । अत्र मन्तप्तस्य चेतनस्य गजस्य स्नानपानाद्यर्थकतया स्थित सरोऽवगाहन शत्रूपचोद्धरणार्थत्वेनोत्प्रेक्षितम् । मन्ये इति पदमुत्प्रेक्षाव्यञ्जकम् । अत्र च सन्तापकस्य प्रतीकाराक्षमेण गजेन तत्पक्षोद्धरणात् प्रत्यनीकालङ्कारः । तदुक्तं, प्रत्यनीकमशक्तेन प्रतीकारे रिपोर्यदि । तदीयस्य तिरस्कारस्तस्यैवोत्कर्षसाधक इति । तदनयो मद्वर इति कैश्चिदुक्त तन्न मनोरमं तत्पक्षोद्धरणस्य सम्भावनामात्रविषयत्वेन कविनोक्तत्वेन अतात्त्विकत्वात्, यत्र तु तत्पक्षापकारस्तात्त्विकस्तत्रैव तदलङ्कार इति सुधीभिर्विचिन्तनीयम् ॥ २२१ ॥

स्नातुं पातुं विसान्यत्तुं करिणो जलगाहनम् ।
तद्वैरनिष्क्रयायेति कविनोत्प्रेक्ष्य वर्ण्यते ॥२२३॥
कर्णस्य भूषणमिदं समायतिविरोधिनः ।
इति कर्णोत्पलं प्रायस्तव दृष्ट्या विलज्जते ॥२२४॥
अपाङ्ग-भागपातिन्या दृष्टेरंशुभिरुत्पलम् ।
स्पृश्यते वा न वेत्येवं कविनोत्प्रेक्ष्य वर्ण्यते ॥२२५॥
लिम्पतीव तमोऽङ्गानि वर्षतीवाञ्जनं नभः ।
इतीदृशमपि भूयिष्ठमुत्प्रेक्षालक्षणान्वितम् ॥२२६॥

लक्षणं घटयति स्नातुमिति । करिण स्नातु पातुं विसानि च भक्षयितु जलगाहन कविना तस्य वैरनिष्क्रयाय इति उत्प्रेक्ष्य सम्भाव्य वर्ण्यते । २२३ ॥

अचेतनगतामुत्प्रेक्षामुदाहरति कर्णस्येत्यादि । तव दृष्ट्या सम आयति दैर्घ्य तस्य विरोधिन बाधकस्य कर्णस्य इद भूषणम् इति कर्णोत्पल विलज्जते प्राय. निजाशुभि ताडयते इव. प्राय इति उत्प्रेक्षाव्यञ्जकम् । अत्र अपाङ्गभागपातिन्या. आकर्णायताया दृष्टे· अशुभि उत्पल स्पृश्यते वा न वा इति असत्रपि विषयसत्कारजनकत्वेन कविना उत्प्रेक्ष्य सम्भाव्य वर्ण्यते । उत्प्रेक्षाद्योतकेवादिप्रयोगाभावेऽपि क्वचित् प्रतीयमानोत्प्रेक्षा भवतीत्युक्त दर्पणकारैर उदाहृतञ्च तेनैव । यथा. तव्वक्त्रा. स्तनयुग्मेन मुखं न प्रकटीकृतम् । हाराय गुरवे स्थानं न दत्तमिति लज्जयेति । अत्र स्तनयोरचेतनत्वेन लज्जाया असम्भवात् लज्जयेवेत्युत्प्रेक्षा । २२४ । २२५ ।

लिम्पतीति । श्लोकार्द्धमिदम्. असत्पुरुषसेवेव दृष्टिर्विफलतां

केषाञ्चिदुपमाभ्रान्तिरिव श्लेष्वेष जायते ।
इवादिमान तिङन्तेनेत्यतिक्रम्याहभाषितम् ॥२२७॥
तुल्यधर्मश्च यत्तत्र तुल्यधर्मश्च यत्तया ।
निगीर्णसमसामान्यो धर्मः कोऽत समीक्ष्यते॥२२८॥

[illegible] निर्वर्णनप्रकरणोक्तम्। तमः [illegible] लिम्पतीव, नभ आकाशम् [illegible] भूयिष्ठ सम्यक् उत्प्रेक्षाया [illegible] तनस्य तमसः व्यापनरूपो [illegible] तथा तादृशस्य तमस सन्धानरूपो धर्मो नभ· [illegible] सन्धानरूपेणैकत्वेन सम्भावित इति उभयत्रैव विषयस्या-[illegible] ॥ २२६ ॥

अथ यदुक्तं इत्यादिपदप्रयोगे एवोत्प्रेक्षा इव प्रयोगेतूपमेति केषाञ्चित् दूषयति केषाञ्चिदिति। इह लिम्पतीति यथा इवशब्दं अनुक्त्वा इवशब्दप्रयोगेण तिङन्तेन उपमान न इति आशानां प्रामाणिकाना मुधिया भाषितं वचनम् अतिक्रम्य अनादृत्य केषाञ्चित् अज्ञानामित्यर्थः. उपमाभ्रान्तिः. उपमालङ्कार एवायमिति भ्रमः जायते इत्यन्वयः। अय भावः उपमानस्य भिन्नत्व साध्यत्वञ्च उभयोर्भेदकम्। उपमायाम् उपमानस्य भिन्नत्वमावश्यकम् इह तु साध्यत्वम्। तथाच तिङन्तपदप्रतिपाद्यस्य लेपनस्य वर्षणस्य च साध्यत्वान्नात्रोपमाशङ्केति। उक्तञ्च, भिन्नमेव समानार्थमुपमान विधीयते। तिङन्तार्थन्तु साध्यत्वादुपमान न जायते इति ॥ २२७ ॥

उपमाशङ्कानिरासाय युक्तिमपि दर्शयति उपमानोपमेयधर्मेति। तुल्यधर्मस्य समानगुणादिरूपसाधारणधर्मस्य व्यपे-

दि लेपनमेवेष्टं लिम्पतिर्नाम कोऽपरः।
स एव धर्मी धर्मी चेत्युन्मत्तोऽपि न भाषते ॥२२८
कर्त्ता यद्युपमानं स्यात् न्यग्भूतोऽसौ क्रियापदे।
क्रियासाधनव्यग्रो नालमन्यदपेक्षितुम्॥ २२९॥

च्या अनुरोधेन उपमानोपमेयत्वं भवतीति शेषः। अत्र लिम्पते, लिम्पतीति क्रियावाचकस्य पदस्य, नामत्वानुकरणात् षष्ठीति बोध्यम्। तमसश्च असौ धर्म साधारण इत्यर्थः। कः समीक्ष्यते लक्ष्यते न कोऽपीत्यर्थः तस्मात् साधर्म्याभावाद्व नोपमाशङ्केति भाव ॥ २२८ ॥

पुनश्चापत्तिमुद्भावयन् खण्डयति यदीति। यदि लेपनमेव इष्ट साधारणधर्मतया अभिलषित तदा लिम्पति नाम अपरः साधारणधर्मवान् उपमानरूपो धर्मीत्यर्थः कः न कोऽपीत्यर्थः। वैयाकरणैर्व्यापारस्यैव विशेष्यतया तिङन्तपदप्रतिपाद्यत्वेनोक्तत्वात्। तदुक्तं, फलव्यापारयोर्धातुराश्रये तु तिङः स्मृता। फले प्रधानं व्यापारस्तिङर्थस्तु विशेषणमिति। तथाच, लेपनस्यैव धर्मित्व न तु धर्मत्वमिति व्यक्तीकृतम्। लिम्पतिरित्यत्र अनुकरणे प्रथमेति बोध्यम्। ननु एकस्यैव लेपनस्य धर्मित्व धर्मत्वञ्चास्तु इत्याशङ्क्याह स एवेति। स एव लिम्पतिरेव धर्मी धर्मी चेति उन्मत्तोऽपि वातुलोऽपि न भाषते, उन्मत्तेनापि एकस्य धर्मित्व धर्मत्वं नोच्यते का कथा सुधियामिति भाव ॥ २२८ ॥

पुनरप्यापत्तिं खण्डयति कर्त्तेति। यदि कर्त्ता तिङा प्रतिपाद्यः लेपनरूपव्यापाराश्रयः उपमानं स्यात् तमस उपमानत्वेन मन्येत, तदपि न इति शेषः, यतः असौ कर्त्ता

यो लिम्पत्यमुना तुल्यं तम इत्यपि शंसतः ।
अङ्गानीति न सम्बद्धं सोऽपि मृग्यः समो गुणः२३१
यद्वेन्दुरिव ते वक्त्रमिति कान्तिः प्रतीयते ।

क्रियापटे व्यापाररूपे न्यग्भूतः विशेषणत्वात् तिरस्कृतः, तिङर्थस्य विशेषणत्वं पूर्वमुक्तम्। न हि विशेषणमुपमानं भवति विशेषणस्य साध्यतया उपमानस्य च सिद्धतया सर्वसम्मतत्वादिति भावः। तथाहि, स्वक्रियाया लेपनरूपायाः साधने लग्न व्यापृतः असौ कर्त्ता अन्यत् कार्य्यान्तरम् अपेक्षितुं द्रष्टुं साधयितुमित्यर्थः न अलं न समर्थः। अयं भावः, एतस्याधीनो यथा अन्यस्य कार्य्यं न कर्त्तुं शक्नोति तथा एतस्य विशेषणतया अधीनः कर्त्ता अन्यस्य उपमानरूपविशेषणतामात्मु न प्रभवतीति। उक्तञ्च दीधितिकारेण, इतरविशेषणत्वेनोपस्थितस्यान्यत्र विशेषणत्वेनान्वयायोगादिति। अतो नात्र कर्त्तुरुपमानत्व सङ्गच्छत इति ॥ २३० ॥

तिङर्थप्राधान्यवादिनैयायिकमतानुसारिणीमपि आपत्तिं खण्डयति य इति। यो लिम्पति, तमः असुना तुल्यम्, अत्र यदृद शब्दप्रयोग उपमानोपमेयत्वसूचकः, इत्यपि शंसतः कथयत वादिनः मते इति शेषः, अङ्गानि इति कर्मपदं न न सम्बद्धं न सङ्गतम् उपमेयतम कर्त्तृकतदन्वययोग्यक्रियालक्षणाभावात् उपमेयांशे अनन्वयाच्चेति। ननु अङ्गकर्मकलेपनकर्त्तृ तम इत्येव शाब्दबोधे का क्षतिरिति चेत् तत्राह स इति। सः समः साधारण गुणोऽपि मृग्यः अन्वेष्टव्यः अवश्यं वाच्य इत्यर्थः तदप्रयोगे उपमाया असम्भवादिति भावः ॥२३१॥

ननु साधारणधर्मांप्रयोगे लुप्तोपमापि भवतीति चेत्

न तथा लिम्पती लेपादन्यदत्र प्रतीयते ॥ २३२ ॥
तदुपश्लेषणार्थोऽयं लिम्पतिर्ध्वान्तकर्तृकः।
अङ्गकर्मा च पुंसैवमुत्प्रेक्ष्यत इतीष्यताम् ॥२३३॥
मन्ये शङ्के ध्रुवं प्रायो नूनमित्येवमादिभिः।
उत्प्रेक्षा व्यज्यते शब्दैरिवशब्दोऽपि तादृशः॥२३४॥

इति उत्प्रेक्षाचक्रम्।

तत्राह यथेति। ते वक्त्रम् इन्दुरिव इत्यत्र यथा कान्ति सौन्दर्यं साधारणधर्मतया प्रतीयते अत्र लिम्पती लेपात् अन्यत् किमपि तथा तद्वत् न प्रतीयते। तथाच, साधारण-धर्माप्रयोगेऽपि यत्र सादृश्यस्य प्रसिद्धतया साधारणधर्मस्य स्फुटत्वं तत्रैव लुप्तोपमा अत्र तु तमस. लेपनकर्तृत्व न तथा-त्वमिति काचिद् विप्रतिपत्तिरिति भाव ॥ २३२ ॥

उपसंहरति तदिति। तत् तस्मात् उपश्लेषण व्यापनमेव अर्थो यस्य तथाभूत ध्वान्तकर्तृकः तम कर्तृक' तथा अङ्गकर्मा अयं लिम्पति' लेपनक्रिया पुसा कविनिबन्धनवक्त्रा उत्प्रेक्ष्यते सम्भाव्यते इति इष्यताम् इष्टत्वेन गृह्यताम्। तथाच, तम-कर्तृकमङ्गव्यापनम् उत्प्रेक्षाया विषय. लेपनञ्च विषयि. ततश्च प्रस्तुतस्तमोव्यापनरूपो विषय अप्रस्तुततादृशलेपन-रूपविषयित्वेन उत्प्रेक्ष्यते न तूपमानभूतेन तेन उपमीयते इति भाष्यम् ॥ २३३ ॥

इवशब्दस्य उत्प्रेक्षाया व्यञ्जकत्वमाह मन्ये इति। मन्ये इत्यादिभिः शब्दैः उत्प्रेक्षा व्यज्यते, इवशब्दोऽपि तादृश उत्-प्रेक्षाव्यञ्जक इत्यर्थः ॥ २३४ ॥

हेतुश्च सूक्ष्मलेशौ च वाचामुत्तमभूषणम् ।
कारकज्ञापकौ हेतू तौ चानेकविधौ यथा ॥२३५॥
अयमान्दोलितप्रौढ़चन्दनद्रुमपल्लवः ।

हेतुसूक्ष्मलवाख्यानलङ्कारानुद्दिशति हेतुरिति । हेतुः सूक्ष्म तथा लेश इत्युद्देशवाक्येनोक्ता एते त्रयः वाचाम् उत्तमभूषणम् उत्कृष्टालङ्काराः एतेषामलङ्कारत्वमनङ्गीकुर्वतो भामहादीन् प्रति कटाक्षोक्तिरियम् । तत्र हेतू द्विविधौ कारक ज्ञापकश्च हेतुलक्ष, मिषाभ्यधिपितार्थसाधकत्वम् । कारक, मिषाभ्यधिपितार्थस्य हेतुर्भवति साधकः । कारको ज्ञापक इति द्विधा सोऽप्युपजायते । प्रवर्त्तते कारकाख्य पाक् पश्चात् कार्य्यजन्मतः । पूर्वं श्लेष इति ख्यातस्तयोरेव विशेषता । कार्य्यकारणभावाद्वा स्वभावाद्वा नियामकात् । अविनाभावनियमादविनाभावदर्शनात् । ज्ञापकस्य च भेदोक्तिर्व्याप्यव्यापकदर्शनात् इति । भोजराजेनाप्युक्तः, य. प्रवृत्तिं निवृत्तिं वा प्रयुक्तिज्ञानतोऽविदन् । उदासीनोऽपि वा कुर्य्यात् कारकः स प्रचक्षते । द्वितीया च तृतीया च चतुर्थी सप्तमी च यथा । क्रियानाविष्टमाचष्टे लक्षणं ज्ञापकस्य सः इति । तौ च कारकज्ञापकौ अनेकविधौ बहुप्रकारौ उदाहरणेषु ज्ञातव्यौ इति श्लेष अस्मिंश्च हेत्वलङ्कारे मतान्तरोक्तस्य काव्यलिङ्गस्य कार्य्यकारणभावोक्तार्थान्तरन्यासस्य तथा अनुमानस्य अन्तर्भावात् न पृथगुक्तिरिति बोध्यम् । दर्पणकारस्तु अभेदेनाभिधा हेतुर्हेतोर्हेतुमता महेति लक्षणमाह । स चास्मिन् मते अतिशयोक्तिरेवेति ध्येयम् ॥ २३५ ॥

कारकहेतुमुदाहरन्नाह अयमित्यादि अयम् आन्दोलिताः

उत्पादयति सर्वस्य प्रीतिं मलयमारुतः ॥ २३६ ॥
प्रीत्युत्पादनयोग्यस्य रूपस्यावोपदर्हणम् ।
अलङ्कारतयोद्दिष्टं निहत्तावपि तत्समम् ॥ २३७ ॥
चन्दनारण्यमाधूय स्रष्टा मलयनिर्झरान् ।
पथिकानामभावाय पवनोऽयमुपस्थितः ॥ २३८ ॥
अभावसाधनायालमेवम्भूतो हि मारुतः ।
विरहज्वरसम्भूतमदनाग्न्यातुरे जने ॥ २३९ ॥

आधूता. प्रौढा परिणता' चन्दनद्रुमस्य पवना येन तादृश मलयमारुत सर्वस्य प्रीतिम् उत्पादयति । अत्र मलयमारुतस्य प्रीत्युत्पादने कारकत्वम् आन्दोलितेत्यादिविशेषणवत्तया समधिक वैचित्र्यमावहति सहृदयानामिति । अत्र प्रीत्युत्पादनयोग्यस्य रूपस्य वैचित्र्यजनकतया कीर्त्तनम् अलङ्कारतया उद्दिष्टं कथित तत् उपदर्हण निहत्तावपि निषेधेऽपि समं तुल्यम् । यथा. सुग्धे ! तव मुखामोदलोलुपो मधुपो भ्रमन् । कर्णिकाकमल फुल्लमपि नाभिसरत्यय मिति । अत्र अभिसरणक्रियाया निषेध ॥ २३६ ॥ २३७ ॥

पूर्वं भावसाधने उदाहरण दर्शयित्वा इदानीम् अभावसाधनाय उदाहरति चन्दनेति । अय पवन चन्दनारण्यं चन्दनवनम् आधूय कम्पयित्वा, तथा मलयनिर्झरान् सृष्ट्वा पथिकानाम् अभावाय नाशाय उपस्थित. तादृशस्य पवनस्य विरहिणामतीव दुःसहत्वादिति भाव: ॥ २३८ ॥

अभावेति । एवम्भूत: उक्तगुणसमन्वित. मारुत: विरहज्वरेण सम्भूत: य: मदनाग्नि: तेन आतुरे जने अत्र षष्ठ्यर्थे

निर्वर्त्त्ये च विकार्य्ये च हेतुत्वं तदपेक्षया ।
प्राप्ये तु कर्मणि प्रायः क्रियापेक्षैव हेतुता ॥ २४० ॥
हेतुर्निर्वर्त्तनीयस्य दर्शितः शेषयोर्द्वयोः ।

मम्मो। तादृशस्य जनस्य इत्यर्थं अभावसाधनाय अलं समर्थं. अत अभावसाधको हेतुरिति भाव ॥ २३९ ॥

हेतुत्वम् क्रियाकर्मोभयापेक्षिता, तत्र क्रियापेक्षित्वे उदाहरणम् सम्मति कर्मापेक्षित्वमात्र निर्वर्त्त्ये चेति। निवर्त्त्ये च विकार्ये च कर्मणि तदपेक्षया हेतुत्व तत्तत्कर्मापेक्षी हेतुरित्यर्थ. प्राप्ये तु कर्मणि प्राय बाहुल्येन हेतुता क्रियापेक्षैव क्रियापेक्षो हेतुरित्यर्थ'। तत्र निर्वर्त्त्यं पूर्वमसदेव क्रियया जन्यम् अथवा पूर्वमसदेव क्रियया प्रकाश्यमानमिति द्विविधम्। यथा, कटं करोति, पुत प्रसूते इत्यादि। विकार्यं क्रियया रूपान्तरमापाद्यमानम्। यथा, काष्ठं दहति सुवर्णं कुण्डलं करोति इत्यादि। दहति भस्मीकरोतीति भस्मैव काष्ठस्य रूपान्तर बोध्यम्। उक्तञ्च, यदभज्जायते पूर्वं जन्मना यत् प्रकाश्यते। तन्निर्वर्त्त्यं विकार्यञ्च कर्म द्वेधा व्यवस्थितम्। प्रकृत्युच्छेदसम्भूत किञ्चित् काष्ठादिभस्मवत्। किञ्चिद् गुणान्तरोत्पत्त्या सुवर्णादिविकारवत् इति। प्राप्यन्तु क्रियाव्याप्तमेव न तु विक्लित्यादिगुणान्तरितम्। तदुक्त, क्रियाकृतविशेषाणा मिहत्यैव न गम्यते। दर्शनादनुमानाद् वा तत् प्राप्यमिति कथ्यते इति। जौमरास्तु अनीप्सितमपि कर्मेच्छन्ति। यथा, द्रुममर्गं परिहरतीत्यादि। अत्रापि क्रियापेक्षो हेतुरिति बोध्यम् ॥ २४० ॥

हेतुरिति। निर्वर्त्तनीयस्य कर्मणः हेतुः दर्शितः अय-

दृष्ट्वोदाहरणद्वन्द्वं ज्ञापको वर्ण्यिष्यते ॥ २४१ ॥
उत्प्रवालान्यरण्यानि वाप्यः संफुल्लपङ्कजाः।
चन्द्रः पूर्णश्च कामेन पान्थदृष्टेर्विषं कृतम् ॥ २४२ ॥
मानयोग्यां करोमीति प्रियस्थानस्थितां सखीम्।
बाला भ्रूभङ्गजिह्माक्षी पश्यति स्फुरिताधरा ॥ २४३ ॥

मान्दोलितेत्यादुदाहरणे इति शेषः। शेषयोः उन्नावग्निट्योर्द्वयोः विकार्यप्राप्ययोरित्यर्थः उदाहरणद्वन्द्वं दत्वा दर्शयित्वा ज्ञापको हेतुः वर्णयिष्यते। प्रतिज्ञेयं शिघाणामुल्कण्ठावारणायेति बोध्यम् ॥ २४१ ॥

विकार्यहेतुं दर्शयति उत्प्रवालानीति। अरण्यानि उत्प्रवालानि उन्नतपल्लवानि, वाप्यः दीर्घिकाः संफुल्लानि पङ्कजानि यासु ताः तथा चन्द्रः पूर्णश्च, अतः कामेन पान्थदृष्टेः पथिकनयनस्य विषं कृतम् उन्नानामेव त्रयाणामतीवोद्दीपकतया सन्तापकत्वादिति भावः। अत्र उन्नत्वस्य विषं कृतं विषीभावरूपं विकारमापादितमिति आरोपरूपवैचित्र्यस्यैव हेत्वलङ्कारत्वम् अनेवविधे सुवर्णं कुण्डलं करोतीत्यादौ विकारस्य सत्यतया वैचित्र्याभावान्नालङ्कारतेति बोध्यम् ॥ २४२ ॥

प्राप्यहेतुं दर्शयति मानयोग्यामिति। बाला मुग्धा काचित् भ्रुवोर्भङ्गेन जिह्मे अक्षिणी यस्याः सा, तथा स्फुरितं कम्पितं अधरो यस्याः तादृशी सती मानयोग्यां मानाभ्यां मम्यां खुरली योग्येत्यमरमाला। करोमीत्यभिप्रेत्येति शेषः, प्रियस्य स्थाने सकाशे स्थितां सखीं पश्यति निरीक्षते। अत्र सखीमिति प्राप्यकर्मापेक्षी बालायास्तादृशसकोपनिरीक्षणे हेतुरिति बोध्यम् ॥ २४३ ॥

गतोऽस्तमर्को भातीन्दुर्यान्ति वामाय पक्षिणः ।
इतोऽमपि माध्वेव कालावस्थानिवेदने ॥ २४४ ॥
अवश्यैरिन्दुपादानामसाध्यैश्चन्दनाम्भसाम् ।
केनोष्मभि. सुबोधं ते सखि ! कामातुरं मनः २४५
इति लक्ष्याः प्रयोगेषु रम्या ज्ञापकहेतवः ।
अभावहेतवः केचिद् व्याक्रियन्ते मनोहराः॥२४६॥

ज्ञापकहेतुमुदाहरति गत इति। अर्कः अस्तं गत, इन्दु भाति, पक्षिणः वामाय वामस्थानाय यान्ति गमनार्थ-योगे कामणि चतुर्थी। इति उक्तरूपम् इदं गतोऽस्तमर्क इत्यादिकं कालावस्थायाः कालविशेषस्य सन्ध्याया इत्यर्थः. निवेदने ज्ञापने साधु एव वैचित्र्यजनकत्वात् उत्कृष्टोपाय इत्यर्थः, अर्कस्यास्तमितत्वादि ज्ञापको हेतुः, ज्ञाप्या च सन्ध्या अत्र तु ज्ञाप्यस्य अशब्दत्वात् प्रतीयमानत्वम्। सन्ध्या वर्त्तते इत्यादौ तु नालङ्कारता वैचित्र्याभावादिति बोध्यम् ॥ २४४ ॥

ज्ञाप्यस्य शब्दत्वे उदाहरति अवश्यैरिति। हे सखि! ते तव कामातुरं विरहाकुलं मनः इन्दुपादानां चन्द्रकिरणा-नाम् अवश्यैः अनार्द्रैः, तथा चन्दनाम्भसां चन्दनार्द्रजलानाम् असाध्यैः अप्रतिकार्यैः देहस्य उष्मभिः सन्तापैः सुबोधं सुखेन केन ज्ञेयम्। अत्र कामातुर मनोरूप ज्ञाप्य शब्द देहतापाद्य ज्ञापका। अत्र च वैचित्र्यविशेषवत्त्वा एवास्यालङ्कारस्य विषय इति ॥ २४५ ॥

इतीति। इति एवरूपा ज्ञापकहेतवः रम्याः सहृदय-चमत्कारकाः प्रयोगेषु कवीना निबन्धेषु लक्ष्याः ज्ञातव्याः,

अनभ्यासेन विद्यानामसंसर्गेण धीमताम्।
अनियहेण चाक्षाणां जायते व्यसनं नृणाम्॥२४७॥
गतः कामकथोन्मादो गलितो यौवनज्वरः।
गतो मोहश्च्युता तृष्णा कृतं पुण्याश्रमे मनः॥२४८॥

अभावरूपाः मनोहरा केचित् हेतवश्च व्याख्यियन्ते उच्यन्ते ॥ २४६ ॥

अभावरूपाश्च हेतवश्चतुर्विधा. प्रागभाव ध्वंसाभाव. अन्योन्याभाव अत्यन्ताभावश्चेति मनसि कृत्वा क्रमेण उदाहरिष्यन् प्रथम प्रागभावमाह अनभ्यासेनेति। विद्यानाम् अनभ्यासेन अशिक्षया. धीमता साधूनाम् असंसर्गेण तथा अक्षाणाम् इन्द्रियाणाम् अनियहेण असंयमेन हेतुना नृणा व्यसन स्त्रीद्यानाद्यष्टादशविध दुष्प्रवृत्तिरिति यावत् जायते। उक्तञ्च मनुना व्यसनप्रस्तावे. मृगयाक्षो दिवास्वप्न परीवाद स्त्रियो मद । तौर्यत्रिक वृथाट्या च कामजो दशको गण। पैशुन्य साहस द्रोह ईर्ष्यासूयार्थदूषणम्। वाग्दण्डजञ्च पारुष्यं क्रोधजोऽपि गणोऽष्टक इति। अत्र पूर्व विद्याभ्यासाद्यभावे व्यसनोत्पत्तिरिति विद्याभ्यासादीना व्यसन प्रति प्रागभावरूपहेतुत्वम् ॥ २४७ ॥

प्रध्वंसमुदाहरति गत इति। कामकथया उन्माद उन्मत्तता गतः, यौवनज्वर गलित. मोहः अज्ञानं गत. तृष्णा वासना च्युता. अत पुण्याश्रमे तपोवनाश्रमे मन कृतम् अर्पितम्। अत्र कामकथादीना ध्वंसरूपस्य अभावस्य पुण्याश्रमगमने हेतुत्वम्॥ २४८॥

वनान्यमूनि न गृहाण्येता नद्यो न योषितः ।
मृगा इमे न दायादास्तन्मे नन्दति मानसम् २४९
अत्यन्तमसदार्य्याणामनालोचितचेष्टितम् ।
अतस्तेषां विवर्द्धन्ते सततं सर्वसम्पदः ॥ २५० ॥
उद्यानसहकाराणामनुद्भिन्ना न मञ्जरी ।
देयः पथिकनारीणां सतिलः मलिलाञ्जलिः॥२५१

अन्योन्याभावमुदाहरति वनानीति। अमूनि वनानि, गृहाणि न, एता नद्य, योषितः न इमे मृगा, दायादाः न, तत् तस्मात् मे मम मानस नन्दति, गृहाश्रमाद् वानप्रस्थाश्रम गतस्योक्तिरियम्। अत्र वनगृहादीनाम् अन्योन्यभेदेन मानस-नन्दने अन्योन्याभावरूपहेतुत्वम् ॥ २४९ ॥

अत्यन्ताभावमुदाहरति अत्यन्तमिति। आर्य्याणां साधूनाम् अनालोचितचेष्टितम् अविमृश्यकारित्वम् अत्यन्तम् असत् अविद्यमान नास्तीत्यर्थः, अतस्तेषां सर्वसम्पदः सतत विवर्द्धन्ते। अत्र अविमृश्यकारिताया अत्यन्ताभाव सर्वसम्पद्वृद्धौ हेतुरिति ॥ २५० ॥

सम्प्रति अभावाभावरूप हेतु दर्शयति उद्यानेति। उद्यान-सहकाराणाम् उपवनचूतानां मञ्जरी न अनुद्भिन्ना अपितु उद्भिन्ना, अतः पथिकनारीणां प्रोषितभर्तृकाणां सतिलः सलिलाञ्जलि देय, चूतमञ्जर्युद्भेदेन वसन्तोदयात् तस्य च सार्वत्रिकत्वात् ताद्दशीनां मरणमुपस्थितमिति ध्वन्यते। अत्र मञ्जरीरूपस्य अभावस्य अभावरूपो हेतुरिति अभावाभावस्य हेतुत्वम् ॥ २५१ ॥

प्रागभावादिरूपस्य हेतुत्वमिह वस्तुनः ।
भावाभावस्वरूपस्य कार्यस्योत्पादनं प्रति ॥ २५२ ॥
दूरकार्यस्तत्सहज कार्यान्तरजस्तथा ।
अयुक्तायुक्तकार्यौ चेत्यसंख्यास्त्रिहेतवः ॥ २५३ ॥
तेऽमी प्रयोगमार्गेषु गौणवृत्तिव्यपाश्रयाः ।
अत्यन्तसुन्दरा दृष्टास्तदुदाहृतयो यथा ॥ २५४ ॥

अभावहेतुमुपसंहरति प्रागिति । इह उदाहरणेषु प्रत्यक्षं । भावाभावस्वरूपस्य भावरूपस्य अभावरूपस्य च कार्यस्य उत्पादन प्रति प्रागभावादिरूपस्य वस्तुन विषयस्य हेतुत्व दर्शितमिति शेष ॥ २५२ ॥

अधुना चित्राख्यहेतुभेदान् निर्दिशति दूरकार्य इति । दूरे कार्य यस्य स, तत्सहज तेन कार्येण सह जात, कार्यान्तरज कार्यान्तर जात, अयुक्तकार्य अयुक्तम् अनुचित कार्यं यस्य स, तथा युक्तकार्य युक्तम् उचित कार्य यस्य स, इति एवप्रकारा असंख्या संख्यातीता बहुविधा इत्यर्थ चित्रहेतव, चित्राख्या हेतव । उक्तञ्च भोजराजेन, क्रियाया कारण हेतु कारको ज्ञापकस्तथा । अभावश्चित्रहेतुश्च चतुर्विध इहेष्यते इति ॥ २५३ ॥

तेऽमीति । ते पूर्वोक्ता अमी चित्रहेतव गौण्यो या वृत्ति तादृश्यनिबन्धना लक्षणा तैव व्यपाश्रय, अवलम्बन येषा ताहशा तादृशलक्षणा वृत्तिनिबन्धना प्रयोगाणा निबन्धानां मार्गेषु रीतिषु अत्यन्तसुन्दरा, अतिमनोहरा दृष्टा, यथा तेषामुदाहृतय उदाहरणानि वक्ष्यमाणानीत्यर्थ ॥ २५४ ॥

त्वदपाङ्गाक्ष्यं जैत्रमनङ्गास्त्रं यदङ्गने ! ।
मुक्तं तदन्यतस्तेन मोऽप्यहं मनसि क्षतः ॥ २५५ ॥
पाविर्भवति नारीणां वय: पर्य्यस्तशैशवम् ।
महैव विविधैः पुमामङ्गजोन्मादविभ्रमैः ॥ २५६ ॥
पश्चात् पर्य्यस्य किरणानुदीर्णं चन्द्रमण्डलम् ।
प्रागेव हरिणाक्षीणामुदीर्णो रागसागरः ॥ २५७ ॥

त्वदपाङ्गाक्ष्यमुदाहरति त्वदपाङ्गाक्ष्यमिति। हे अङ्गने। नारीत्वि। यत् तत् प्रसिद्ध जैत्र जयसाधन तव अपाङ्गाक्ष्यम् अपाङ्गरूपम् अनङ्गस्य कामस्य अस्त्रम् अन्यत अन्यस्मिन् जने मुक्त पातित त्वयेति शेष तेन अस्त्रेण स लक्ष्यभूत: जन. तथा अहमपि अलक्ष्यभूत इत्यर्थ मनसि क्षत विद्ध । अत्र पश्चस्य लक्ष्यवेधरूप कार्य्य सन्निहितम् अलक्ष्यवेधरूपन्तु दूरवर्त्ति, इति हेतोरस्त्रस्य दूरकार्य्यत्व तस्य चासम्भवाच्चित्र-मिति ॥ २५५ ॥

तत्सहजमुदाहरति आविर्भवतीति। नारीणा पर्य्यस्तं निराकृत शैशव येन तादृश वय यौवनमित्यर्थ पुसा विविधै अङ्गजेन कामेन य उन्माद तस्य विभ्रमै सहैव आविर्भवति। अत्र नारीणा यौवनरूपस्य हेतोस्तत्कार्य्यभूतपुरुषविभ्रमै सहाविर्भावात् तत्सहजत्व तच्च कार्य्यकारणयोर्यौगपद्येन वैचि-त्र्यातिशयसूचनात् चित्रम् ॥ २५६ ॥

कार्य्यानन्तरजमुदाहरति पश्चादिति। हरिणाक्षीणा रागसागर प्रेमानुरागसमुद्र प्रागेव उदीर्ण. उच्छलित: स्फीत इत्यर्थ, पश्चात् किरणान् पर्य्यस्य उत्क्षिप्य चन्द्रमण्डलम्

राज्ञां हस्तारविन्दानि कुट्मलीकुरुते कुतः।
देव! त्वच्चरणाहन्तरविबालातपः स्पृशन् ॥ २५८ ॥
पाणिपद्मानि भृपानां सङ्कोचयितुमीशते।
त्वत्पादनखचन्द्राणामर्चिषः कुन्दनिर्मलाः ॥ २५९ ॥
इति हेतुविकल्पानां दर्शिता गतिरीदृशी।
इति हेतुचक्रम्।

उद्दीर्णम् उदितम्। अत्र चन्द्रोदयस्य रागोद्दीपकत्वात् कारणस्य तत्कार्यस्य च रागस्य पश्चाज्जातत्वेन वार्यानन्तरत्वं तच्च कार्यकारणयोरग्रपश्चाद्भावप्रतिपादनेन ममधिक वैचित्रीमावहतीति चित्रम् ॥ २५७ ॥

अयुक्तकार्यमुदाहरति राज्ञामिति। हे देव! तव चरणाहन्तरविं तस्य बालातप नवोदितार्कमयूख अत्र चरणरागे बालातपत्वारोपात् अतिशयोक्तिरूपालङ्कारो व्यज्यते। राज्ञां हस्ता एव अरविन्दानि तानि स्पृशन् कुत कुट्मलीकुरुते मुकुलीकरोतीत्यर्थ बालातपस्पर्शात् अरविन्दाना विकास एव भवति न तु सङ्कोच, अत्र कारणस्य तस्य तत्सङ्कोचरूपकार्यमयुक्तमिति अयुक्तकार्यत्व तच्च राजविषयकरतिभावस्य सातिशयचमत्कारविषयत्वात् अतिमनोरममिति चित्रम्। २५८।

युक्तकार्यमुदाहरति पाणिपद्मानीति। कुन्दनिर्मला कुन्दपुष्पधवला तव पादनखरूपचन्द्राणाम् अर्चिष भृपाना पाणिरूपाणि पद्मानि सङ्कोचयितुम् ईशते प्रभवन्ति। अत्र चन्द्रकिरणरूपकारणस्य पद्मनिमीलनकार्यं युक्तं तच्च राजविषयिणो रतिभावस्य व्यञ्जकतया सातिशया चमत्कृतिपदवीमारोहतीति चित्रम्॥ २५८॥

इङ्गिताकारलक्ष्योऽर्थः सौक्ष्म्यात् सूक्ष्म इति स्मृतः ॥२६०॥

कदा नौ सङ्गमो भावीत्याकीर्णे वक्तुमक्षमम् ।
अवेक्ष्य कान्तमबला लीलापद्मं न्यमीलयत् ॥२६१
पद्ममन्मीलनादत्र सूचितो निशि सङ्गमः ।
पाण्डुरामयितुमिच्छन्त्या प्रियमङ्गजपीडितम् ॥२६२॥

हेतुमुपसंहरति इतीति। हेतोर्विकल्पाना प्रभेदानाम् इति पूर्वोक्तप्रकारा गति दर्शिता। अनयैव रीत्या अन्येऽपि प्रभेदा ज्ञातव्या इति भाव ।

इति हेतुचक्रम् ।

अथ सूक्ष्म निरूपयति इङ्गितेति। अभिप्रायप्रकाशक-चेष्टाविशेष इङ्गित इङ्गतो भाव इति विश्व । आकार. प्रकाशविशेषव्यञ्जकमुखरागादि, स्यादाकारोऽङ्गवैकृतमिति धरणिः । एताभ्या लक्ष्य अनुमेय अर्थ विषयः सौक्ष्म्यात् दुर्विज्ञेयत्वात् सूक्ष्म इति स्मृत । प्रकाशकारस्तु, कुतोऽपि लक्षित सन्नोऽप्यर्थोऽन्यस्मै प्रकाश्यते। धर्मेण केनचिद् यत्र तत्र सूक्ष्म परिचक्षते ॥ इत्याह। सलक्षितस्तु सूक्ष्मोऽर्थ आकारेणेङ्गितेन वा। कयापि सूच्यते भङ्ग्या यत्र सूक्ष्म तदुच्यत इति दर्पणकार ॥ २६० ॥

इङ्गितलक्ष्य सूक्ष्ममुदाहरति कदेत्यादि। कदा कस्मिन् समये नौ आवयो सङ्गमो भावी इति आकीर्णे जनबहुले स्थाने वक्तुमक्षम कान्तम् अवेक्ष्य अबला कामिनी लीलापद्म क्रीडाकमल न्यमीलयत् ममकोचयत्। अत्र अङ्गजपीडित

सदर्पितदृशस्तस्या गीतगोष्ठ्यामवर्तत ।
उद्दामरागतरला छाया कापि सुखाम्बुजे ॥२६
इत्यनुद्भिन्नरूपत्वात् रत्युत्सवमनोरथः ।
अनुल्लङ्घ्यैव सूक्ष्मत्वमभूदत्र व्यवस्थितः ॥ २६

इति सूक्ष्मम्

कामार्त्तं प्रियम् आत्मामयितुम् इच्छन्त्या अनया काम
यन्नन्मीलनात् निशि रात्रौ सङ्गमो भावीति शेष सूचि
पद्मनिमीलनमिह इङ्गित निशि प्रियसङ्गमरूपसूच्यो
दोध्यम्. अत्र च महदयवमत्कारितया अलङ्कारत्वम
न्त्यम् ॥ २६१ ॥ २६२ ॥

आकारलक्ष्य सूक्ष्म दर्शयति सदर्पितदृश इति। स
गोष्ठ्या सङ्गीतसमदि मयि अर्पिते दृशौ यया तादृश्या त
सुखाम्बुजे उद्दाम· अतिप्रहृष्ट य राग. रमणाभिलाष
तरला विव्हला कापि अनिर्वचनीया छाया कान्ति अव
अत्र मुखच्छायावैलक्षण्येन नायिकाया रत्युत्सवाभिला
लक्षितत्वात् सूक्ष्मत्वम् ॥ २६३ ॥

नन्वत्र तादृशमनोरथस्य सुव्यक्तत्वे कथ तर्हि सूक्ष्म
मित्याशङ्क्याह इतीति। अत्र रत्युत्सवमनोरथः अनुद्भिन्न
त्वात् आकारलक्षितत्वेन स्फुटतया प्रतीयमानत्वाभा
सूक्ष्मत्वम् अनुल्लङ्घ्यैव अपरित्यज्यैव व्यवस्थित वर्णित अ
त्वन्वय.। तथाच तादृशी मुखच्छाया अवश्यमेव रत्युत्सव
रं सूचयतीति न तावन्निश्चयम् अन्यविधमनोरथेऽपि

लेशो लेशेन निर्भिन्नवस्तुरूपनिगूहनम् ।
उदाहरणमेवास्य रूपमाविर्भविष्यति ॥ २६५ ॥
राजकन्यानुरक्तं मां रोमोद्भेदेन रक्षकाः ।
अवगच्छेयुरा ज्ञातमहो शीतानिलं वनम् ॥२६६॥
आनन्दाश्रु प्रवृत्तं मे कन्यां दृष्ट्वैव कन्यकाम् ।

निता कथञ्चित् तममर्थं लक्षयितुं शक्नोतीति सूक्ष्मालङ्कार-स्यायमाश्रय इति बोध्यम ॥ २६४ ॥

इदानीमुद्देशक्रमप्राप्तलवापरपर्य्याय लेश निरूपयति लेश इति। लेशेन किञ्चिन्मात्रतया निर्भिन्नस्य प्रकटितस्य वस्तुन यद् रूप तस्य निगूहन गोपन लेश, उदाहरणम् एव अस्य अलङ्कारस्य रूप स्वरूपम आविर्भविष्यति प्रकाशिष्यते। तममेव व्याजोक्ति वदन्ति केचित्। यथा, व्याजोक्तिश्छन्नो-द्भिन्नवस्तुरूपनिगूहनम इति। अपह्नुतौ लेशनिर्भिन्नवस्तुन नापह्नव, इह तु तथात्वनयोर्भेद ॥ २६५ ॥

अनिष्टसम्भावनाया लेशमुदाहरति राजकन्येति। रोमोद्-भेदेन रोमहर्षेण, राजकन्याया दर्शनजनितेनेति भाव। मा राजकन्यायाम् अनुरक्तम् अभिलाषुक रक्षका राजान्तपुर-रक्षिण अवगच्छेयु, सम्भावनाया विधिलिङ्। आ ज्ञातम्, आ इति सम्भ्रमद्योतकमव्ययम्। ज्ञात विदित निगूहनप्रकारो ज्ञायत इत्यर्थ। ज्ञातमिति वर्तमाने क्तप्रत्यय:। अहो वनं शीत अनिल यत्र तत्, शीतानिलस्पर्शेन रोमाञ्चोदय इति भाव। अत्र रोमोद्भेदस्य शीतानिलजत्वेन अनुरागनिगूहनं वैचित्र्यमावहतीति अस्यालङ्कारत्वम् ॥ २६६ ॥

लज्जाया लेशमुदाहरति आनन्दाश्रु इति। कन्यका दृष्ट्वैव

अङ्गि मे पुष्परजसा वातोद्धूतेन दूषितम् ॥ २६७ ॥
इत्येवमादिस्थानेऽयमलङ्कारोऽतिशोभते ।
लेशमेके विदुर्निन्दां स्तुतिं वा लेशतः कृताम् २६८
युवैष गुणवान् राजा योग्यस्ते पतिरूर्जितः ।
रणोत्सवे मनः सक्तं यस्य कामोत्सवादपि ॥ २६९ ॥

मे मम कथम् आनन्दाश्रु प्रवृत्तम् अत्र वान्यादर्शनेन अनुरागोदयात् आनन्दाश्रुप्रवृत्तिर्लक्ष्यतीति भाव । अत्र निगूढप्रकारमाह अङ्गीति। वातोद्धूतेन पवनचालितेन पुष्परजसा कुसुमपरागेण मे अङ्गि दूषितम्। अत्र आनन्दाश्रुणोऽङ्गिदूषणजन्यत्वप्रतिपादनेन अनुराग महत्त इति ॥ २६७ ।

अन्यालङ्कारत्व प्रतिपादयन्नाह इतीति। इत्येवमादिस्थाने एवमाद्युदाहरणे अयम् अलङ्कार अतिशोभते महदुपचमत्कारितया समुल्लसति। एके पण्डिता लेश लेशत इत्येन कृता निन्दा वा स्तुति व्याजस्तुतिमित्यर्थ विदु । तदुक्त. दोषस्य यो गुणीभावो दोषीभावो गुणस्य च । स लेश स्यात् ततो नान्या व्याजस्तुतिरणीयत इति। अनेनैव व्याजस्तुत्यलङ्कारोऽभिहित इति भाव ॥ २६८ ॥

स्तुतिव्याजेन निन्दामाह युवेति। एष राजा युवा गुणवान् तथा ऊर्जित. विक्रान्त. अत ते तव योग्य पति । यस्य मन कामोत्सवादपि रणोत्सवे सक्तम्। स्वयवरा कन्या प्रति तत्सख्या उक्तिरियम्। अत्र द्वितीयार्द्धे महावीरत्वेन स्तुतिर्बोधितापि कामोत्सवे अनासक्तत्वप्रतिपादनव्याजेन तव सम्भोगसुख दुर्लभम् अतो नाय वरणीय इति द्योतयतीति स्तुत्या निन्दावगमात् व्याजस्तुतिः ॥ २६८ ॥

वीर्य्योत्कर्षस्तुतिर्निन्दैवास्मिन् भावनिवृत्तये ।
कन्यायाः कल्पते भोगान्निर्विविक्षोर्निरन्तरम्॥२७०
चपलो निर्दयग्रामो जनः किमनेन मे सखि ! ।
याग प्रमार्जनायैव चाटवो येन सिञ्चिताः ॥२७१॥
दोषाभासो गुणः कोऽपि दर्शितश्चानुकारिता ।
मानं सखीजनोद्दिष्टं कर्तुं रागादशक्तया ॥२७२॥

इति लेशचक्रम् ।

गुणालङ्कारं मङ्गमयति वीर्य्येति। अस्मिन् उदाहरणे निर्विविक्षोः भोगात् रतोत्सवान् निर्विविक्षोः भोक्तुमिच्छोः, निर्भोगो अतिभोगयोरिति कोषः । कन्यायाः भाव्यस्य वरणाभिप्रायस्य निवृत्तये वीर्य्योत्कर्षस्य वीर्य्याधिक्यस्य स्तुतिः निन्दैव कल्पते, निन्दारूपेणैव पर्य्यवस्यतीत्यर्थः ॥ २७० ॥

निन्दाव्याजेन स्तुतिमाह चपल इति। हे सखि। अमी जन चपल अस्थिर, निर्दय परपीडानभिज्ञतया दयारहितश्च, येन आग प्रमार्जनाय अपराधक्षालनाय चाटव प्रियवादा सिञ्चिता, अतस्तेन युष्माभिरुपदिष्टेन मानेन किम। प्रियमि मानो गौरवजनकत्वेन विधेय इत्युपदिशन्ती सखी प्रति कस्याश्चिन्नायिकाया उक्तिरियम् ॥ २७१ ॥

दोषाभास इति। रागात् प्रियानुरागाधिक्यात् सखीजनेन उद्दिष्टम् उपदिष्ट मान कर्त्तुम् अशक्तया नायिकया चाटुकारितारूप कोऽपि स्त्रीजनहृद्य गुण दोष इव आभासते इति तथोक्त दर्शित दोषरूपेण कथित इत्यर्थः। अत्र निन्दाव्याजेन स्तुतिर्गम्यते इति व्याजस्तुति. ॥ २७२ ॥

उद्दिष्टानां पदार्थानामनुद्देशो यथाक्रमम्।
यथासंख्यमिति प्रोक्तं संज्ञान क्रम इत्यपि ॥२७३॥
भ्रुवन्ते चोरिता तन्वि! स्मितेक्षणसुखद्युतिः।
स्नातुमम्भः प्रविष्टायाः कुमुदोत्पलपद्मजैः ॥२७४॥
प्रेयः प्रियतराख्यानं रसवद्रसपेशलम्।
ऊर्जस्वि रूढ़ाहङ्कारं युक्तोत्कर्षञ्च तत्त्रयम् ॥२७५॥

क्रमालङ्कार निरूपयति उद्दिष्टानामिति। उद्दिष्टानाम् उक्तानां पदार्थानां यथाक्रमम् अनु पश्चात् उद्देश पश्चादुक्त-पदार्थैः सङ्गति यथासङ्ख्यम् इति. सङ्ख्यानमतिक्रम्य इत्यपि प्रोक्तं. यथासङ्ख्य सङ्ख्यान क्रम इति पर्य्यायशब्दा इत्यर्थ ॥ २७३ ॥

क्रममुदाहरति भ्रुवमिति। हे तन्वि! स्नातुम् अम्भ जलं प्रविष्टाया: ते तव स्मितेक्षणमुखद्युतिः कुमुदोत्पलपद्मजैः भ्रुव निश्चितं चोरिता अपहृता क्रियइत्येनेति शेष.। समय-हरणे नायिकायां तदसत्त्वेन चारुत्वापायादिति भाव। तव स्मितद्युति कुमुदेन. ईक्षणद्युति उत्पलेन. मुखद्युति पद्मजे-नेति यथाक्रमसमुक्तपदार्थाना यथाक्रम पद्मदुक्तपदार्थैः सम-न्वयचारुत्वातिशयप्रापादयतीति अस्यालङ्कारत्वम्। २७४।

तत्रेति प्रेयोरसवदूर्जस्विनामकमलङ्कारत्रितय निरूपयति प्रेय इति। प्रियतर भावाभिव्यक्त्या अतिप्रीतिजनम् आख्यान प्रेयः अतिप्रियत्वादन्वर्थसञ्ज्ञेयम्। तथा रसपेशल रसेन रत्या-दिस्थायिभावरूपेण पेशल मनहृदयानन्दजनन रसवत्। भाव-रसपदार्थौ विस्तरादेनोक्तौ। यथा. सञ्चारिण प्रधानानि

पश्य या मम गोविन्द ! जाता त्वयि गृहागते ।

देवादिविषया रतिः । उद्बुद्धमात्रः स्थायी च भाव इत्यभिधीयते ॥ विभावैरनुभावैश्च सात्त्विकैर्व्यभिचारिभिः । रमतामेति रत्यादिः स्थायी भाव सचेतसामिति । अनयोर्विस्तारश्च ग्रन्थगौरवभिया न लिखितः, विस्तारदर्शनार्थिभिस्तत्तद्ग्रन्थेषु गन्तव्यमेव इति । तथा रूढः, अभिव्यक्तः, अहङ्कारः गर्वः तत्र तथोक्तम् आख्यान गर्वप्रधानमाख्यानम् ऊर्जस्वि, ऊर्जो बलं तदस्यास्तीति योगबलात् अहङ्कारस्य च ऊर्जोधर्मत्वात् तथा व्यपदेशः इति । तेषाम् उक्तानां प्रेयःप्रभृतीनाम् अलङ्काराणां त्रय युक्तः समुचितः उत्कर्षो यस्मिन् तादृशम् अतएवेषामलङ्कारत्वकीर्त्तन न दोषावहमिति भावः । उक्तिभिन्नेषु भावेषु च देवादिविषयकरतिभावस्यैव प्रेयोनामालङ्कारव्यपदेशः, अन्येषां भावानां रसाभासभावाभासभावशान्तिभावोदयभावशबलतानाञ्च रस्यमानपदार्थत्वेन रसवदलङ्कारत्वम् । उक्तञ्च विश्वनाथेन, रसभावौ तदाभासौ भावस्य प्रशमोदयौ । सन्धिः शबलता चेति सर्वेऽपि रसनाद्रमा इति । पूर्वाख्यभावस्य तु ऊर्जस्विनामालङ्कारत्वमिति विशेषः । ध्वनिकारादयस्तु अङ्गिनो रसादेरलङ्कार्यत्वम् अङ्गस्य तु अलङ्कारत्वमाहुः । यथा, प्रधानेऽन्यत्र वाक्यार्थे यत्राङ्गन्तु रसादयः । काव्ये तस्मिन्नलङ्कारो रसादिरिति मे मतिः ॥ विश्वनाथस्तु, रसभावौ तदाभासौ भावस्य प्रशमस्तथा । गुणीभूतत्वमायान्ति यदालङ्कृतयस्तदा । रसवत् प्रेय ऊर्जस्वि समाहितमिति क्रमात् । भावस्य चोदये सन्धौ मिश्रत्वे च तदाख्यका इत्याह ॥ २७५ ॥

प्रेय उदाहरति अद्येति । गोविन्द ! अद्य त्वयि गृहा-

कालेनैषा भवेत् प्रीतिस्तवैवागमनात् पुनः॥२७६॥
इत्याह युक्तं विदुरो नान्यतस्तादृशी धृतिः।
भक्तिमात्रसमाराध्यः सुप्रीतश्च ततो हरिः॥२७७॥
सोमः सूर्यो मरुद् भूमिर्व्योम होतानलो जलम्।
इति रूपाण्यतिक्रम्य त्वां द्रष्टुं देव! के वयम् २७८

गते गा ... प्रीतिः, जाता, कालेन समयान्तरेण त्वयैव नान्यत्र ... क्वचित् साधोर्विश्वेश्वरस्य धृतिः सन्तोषो भवति। पुनरागमनात् ... प्रीतिः भवेत् भविष्यतीत्यर्थः। अत्र भगवद्विदुरसम्बन्धी वाक्यभङ्ग्या, सादयाना सातिशयचमत्कृतिमादधातीति प्रेयोऽलङ्कारः॥ २७५॥

एतदेव व्यनक्ति इतीति। विदुर इति युक्तम् आह, यतस्तस्य अन्यतः अन्यस्मात् आगन्तुकात् तादृशी धृतिः सन्तोषः न ... इति शेषः, तत भक्तिमात्रेण न तु केनाप्यन्येनोपचारेण सम्यगाराध्य हरिः तस्य सुप्रीतश्च अभवत् इति वाक्यशेषः। उद्योगपर्वोक्तश्लोकश्च अस्य प्रतिरूपो यथा, या प्रीतिः पुण्डरीकाक्ष! तवागमनकारणात्। सा किमाख्यायते तुभ्यमन्तरात्मासि देहिनामिति॥ २७७॥

पूर्वं वक्तव्यत्वेन प्रीतावुदाहृतम् इदानीं केवलं वक्तुः प्रीतावुदाहरति सोम इत्यादि। हे देव! सोम चन्द्र सूर्य, मरुत् वायु, भूमि, व्योम आकाश, होता यजमान, अनल, अग्नि, तथा जलम् इति ते रूपाणि अष्टौ मूर्त्तीः अतिक्रम्य अतीत्य स्थित परमात्मस्वरूप त्वा द्रष्टुं वयं के? न वयं योग्या इत्यर्थः, तथापि यद् दृष्टोऽसि स केवलं भक्तानुग्रह एवेति। देवे महेश्वरे साक्षात्कृते तपसा प्रत्यक्षगोचरीकृते सति राज-

इति साक्षात्कृते देवे राज्ञो यद्राजवर्मणः ।
प्रीतिप्रकाशनं तत्र प्रेय इत्यवगम्यताम् ॥ २७९ ॥
अपीति पक्षान्तरे यया मे मरणं मतम् ।
सैवा तन्वी मया लब्धा कथमप्येव जन्मनि ॥२८०॥

तस्य वासवदत्तासंगमस्य राज्ञ इति निर्देशरूपं यत् प्रीतिप्रकाशनं तदपि प्रेय इति व्यवगम्यताम्, अत्रापि भगवद्विषयकरतिभावस्यानुरागस्य प्रियाख्यानस्य सत्त्वादिति ॥ २७८ ॥ २७९ ॥

अथ रसवदलङ्कारं दर्शयन् रसानाञ्च शृङ्गारादीनां प्राधान्यप्रदर्शनेन च प्रथमं शृङ्गारमुदाहरति मृतेति। यया इति निर्दिश्य इत्यध्याहार्य्यं प्रेत्य परलोके यया मालत्या मद्गन्तु मद्गमं कर्तुं मे मरणं मतम् इष्टं मरणावधारणं कृतमित्यर्थः, एषा सा तन्वी अत्रैव जन्मनि मरणं विनेत्यर्थः अहं मया लब्धा प्राप्ता। मृता मदालसा नागानां प्रसादेन पुनः प्रत्युज्जीविता प्राप्य तत्पत्युः कुवलयाश्वस्योक्तिरियम्। सैषा तन्वीत्यत्र सैवावन्तीति पाठोऽपि दृश्यते। तत्रापि आवन्ती अवन्तिदेशभवा वासवदत्तेत्यर्थः, तस्याश्च दाहप्रवादेन मरणनिश्चयात् दुःखितस्य वत्सराजस्य पुनस्तां प्राप्यानन्दोक्तिरियम्। अत्र सम्भोगशृङ्गाररसः। तल्लक्षणन्तूक्तं विश्वनाथेन। यथा, दर्शनस्पर्शनादीनि निषेवेते विलासिनौ। एतावनुरक्तावन्योन्यं सम्भोगोऽयमुदाहृत इति। अयञ्च विप्रलम्भानन्तर्य्यात् परां पुष्टिं नीतः। उक्तञ्च विश्वनाथेन, न विना विप्रलम्भेन सम्भोगः पुष्टिमश्नुते। कषायिते हि वस्त्रादौ भूयान् रागो विवर्द्धते। इति। विप्रलम्भश्च तेनैवोक्तः। यथा, यत्र नु दृष्टिः प्रच्छन्ना नाभीष्टमुपैति विप्रलम्भोऽसाविति ॥२८०॥

प्राक्प्रीतिर्दर्शिता सैवं रतिः शृङ्गारतां गता ।
रूपबाहुल्ययोगेन तदिदं रसवद् वचः ॥ २८१ ॥
निगृह्य केशेष्वाकृष्टा कृष्णा येनाग्रतो मम ।
सोऽयं दुःशासनः पापो लब्धः किं जीवति क्वचं२८२
इत्यारुह्य परां कोटिं क्रोधो रौद्रात्मतां गतः ।
भीमस्य पश्यतः शत्रुमित्यं तद्रसवद् वचः ॥२८३॥

नन्वत्रापि नायिकाविषयरतिभावो व्यज्यते तत् प्रेयोऽलङ्कार एव भणनम्ब न स्यादित्याशङ्क्याह प्रागिति । प्राक् पूर्वोक्तयोरुदाहरणयो प्रीतिः भगवद्विषयकरतिव्यञ्जिका एव न तु विभावादिपरिपुष्टा दर्शिता । उक्तञ्च, मनोऽनुकूलेष्वर्थेषु सुखसंवेदनं वचः । अस्मप्रयोगविषया सैव प्रीतिर्निगद्यत इति । इह तु सा रतिः कान्ताविषयकोऽनुराग इत्यर्थः । उक्तञ्च, रतिर्मनोऽनुकूलेऽर्थे मनसः प्रवणायितमिति । रूपाणां विभावानुभावव्यभिचारिणां बाहुल्यं विस्तारः तस्य योगेन शृङ्गारतां गता. तस्मात् इदं मृतेत्युक्तं वचः रसवत् रसवदलङ्कारेण अलङ्कृतमित्यर्थः ॥ २८१ ॥

रौद्ररसमुदाहरति निगृह्येति । येन मम अग्रत सामनात्य इत्यर्थः कृष्णा द्रौपदी केशेषु अवच्छेदे सप्तमी । आकृष्टा. सः अयं पापः दुःशासनः मया प्राप्तः क्वचं जीवति किम् ? नैव जीवतीत्यर्थः ॥ २८२ ॥

इतीति । अत्रं दुःशासनं पश्यतः भीमस्य क्रोधः इति उक्तप्रकारेण परां कोटिम् आरुह्य विभावादिभिः परिपोषं प्राप्य इत्यर्थः रौद्रता रौद्रभावं गतः रौद्ररसत्वेन परिणत

इदम्म्लानमानाया लग्नं स्तनतटे तव ।
छादयतामुत्तरीयेण नवं नखपदं सखि ! ॥ २८९ ॥
पंशुकानि प्रवालानि पुष्पं हारादिभूषणम् ।
शाखाश्च मन्दिराण्येषां चित्रं नन्दनशाखिनाम् २९०

इतेति । तस्य च शोणितपायिन. अल्पभूषणा: राक्षसा: आलम्बनविभावा, अन्ये च अनुभावव्यभिचारिण आक्षिप्ता: तैश्च परिपुष्ट बीभत्सरसत्वं भजते । अत्र राक्षविषयकरतिभावस्य प्राधान्यात् बीभत्सपरिपुष्टतया तस्यैव चमत्कारित्वात् प्रेयोऽलङ्कारतामेव युक्तमिति बोध्यम् । रसवत्प्रेयसो: सङ्कर इति केचित् ॥ २२८ ॥

हास्यमुदाहरन्नाह इदमिति । हे सखि ! अम्लान: अखण्डित मानो यया: तादृश्या: अस्माक पुन: पुनरारब्धेनापि अविगतमानाया इत्यर्थ: तव स्तनतटे इद नवं न तु प्राचीनं नखपद नखाघातचिह्न लग्नम् उत्तरीयेण छादयताम् । सखीसन्निधौ मानवतीं रहसि कान्तेन सह कृतविहारा कान्चित् प्रति तत्सख्या उपहासोक्तिरियम् । अत्र हास: स्थायिभाव: । तल्लक्षणमुक्तम् । यथा, वागादिवैकृतैश्चेतोविकासो हास इष्यत इति । तादृशी मानवती नायिका आलम्बनविभाव', नखक्षतमुद्दीपनविभाव', तादृशवचनानि अनुभावा: व्यभिचारिणश्च यथायथ प्रतीयमाना एतैश्च परिपुष्ट: अय हास' हास्यरसत्वेन परिणमति ॥ २८९ ॥

अद्भुतरसमुदाहरति अंशुकानीति । एषां नन्दनशाखिना प्रवालानि अंशुकानि वसनानि, पुष्पं हारादिभूषण, शाखाश्च मन्दिराणि गृहाणि, चित्रं किमाश्चर्यमित्यर्थ: । अत्र स्थायि-

इदं सघोनः कुलिशं धारासन्निहितानलम्।
स्मरणं यस्य दैत्यस्त्रीगर्भपाताय कल्पते ॥ २८१ ॥
वाक्यस्याग्राम्यता योनिर्माधुर्ये दर्शितो रसः।
इह त्वष्टरसायत्ता रसवत्ता स्मृता गिराम् ॥२८२॥

इति रसवदलङ्कारः।

भावो विस्मय। तल्लक्षणं यथा. विविधेषु पदार्थेषु लोकसीमातिवर्त्तिषु। विस्मारचेतसो यस्तु स विस्मय उदाहृत इति। अलौकिकनन्दनगात्रविभिरालम्बनविभावे तथाच तत्प्रकृते उद्दीपनविभावे अन्यैश्च प्रतीयमानैरनुभावे सञ्चारिभिश्च परिपुष्ट अद्भुतरसतया पर्य्यवस्यतीति ॥ २८० ॥

भयानकरसमुदाहरति इदमिति। इदं सघोनः एतस्य कुलिशं वज्रं धारासु सन्निहितं अनलं यस्य तादृशं. तस्य स्मरणं दैत्यस्त्रीणाम् असुरकामिनीनां गर्भपाताय कल्पते प्रभवति। अत्र दैत्यस्त्रीणां भयमेव स्थायिभावः। तल्लक्षणं यथा. रौद्रसत्त्वा तु जनित चित्तवैक्लव्यट भयमिति। सघोनः आलम्बनविभावेन तादृशकुलिशेन उद्दीपनविभावेन गर्भपातेन च अनुभावेन अन्यैश्च प्रतीयमानैः तत्तत्सात्त्विकचित्तव्यापारैः. परिपुष्टः भयानकरसत्वं प्राप्नोतीति। २८१ ॥

ननु माधुर्य्यनिरूपणे मधुर रसवदित्युक्ते रसवत्त्वस्य माधुर्य्यगुणत्वेन अभिहितम् अत्र तु अलङ्कारत्व कथं भवेदत इत्याह वाक्यस्येति। माधुर्ये माधुर्य्यनिरूपणे वाक्यस्य अग्राम्यता ग्राम्यत्वदोषाभाव एव योनिः कारणं यस्य तादृश रस दर्शितः अग्राम्यताया एव रसत्वेन उपचारत कीर्त्तनमिति भावः। इह तु गिरां वाचा रसवत्ता रसवदलङ्कारत्वम् अष्टसु

अपकर्त्ताऽहमस्मीति हृदि ते मास्म भूद् भयम् ।
विमुखेषु न मे खड्गः प्रहर्त्तुं जातु वाञ्छति २९३
एवमुक्त्वा परो युद्धे निरुद्धो दर्पशालिना ।
पुंसा केनापि तज्ज्ञेयमूर्जस्वीत्येवमादिकम्॥२९४॥
पर्य्यमिष्टमनाख्याय मानात् तस्यैव सिद्धये ।
यत् प्रकारान्तराख्यानं पर्य्यायोक्तं तदिष्यते ॥२९५

...षेषु शृङ्गारादिषु आगन्तवो मताः । तथाच, रसव्यञ्जकयाम्य-तादीनामाभासमङ्गतालङ्कारादिमत्त्वं माधुर्य्यगुणत्वं रसवद-लङ्कारस्य रस एवेति भेदः ॥ २९२ ॥

उदाहरणालङ्कारमुदाहरति अपकर्त्तेति । अहं ते अपकर्त्ता शत्रुरस्मि इति हेतोः ते मम मास्म भूत् न भवतु, मे मम खड्गः विमुखेषु प्रहर्त्तुं जातु कदाचिदपि न वाञ्छति । तथा-चोक्तं कन्यादित्यनुवृत्तौ मनुना । यथा, नायुधव्यसनप्राप्तं नार्तं नातिपरिक्षतम् । न भीतं न परावृत्तं सतां धर्ममनु-स्मरन्निति । युद्धे पलायनपरं शत्रुं प्रति कस्यचित् वीरस्योक्तिः । अत्र गर्वरूपो व्यभिचारिभावः स्थायिभावादपि उत्साहा-दृद्धिमा इति ऊर्जस्विनामालङ्कारः । यस्य तु तादृशोद्रेकाभावः तत्र धीरो रस एव रसवदलङ्कारतया परिणमतीति बोध्यम् ॥ २९३ ॥

एवमुक्त्वेति । दर्पशालिना अहङ्कारवता केनापि पुंसा एवम् उक्तरूपं वचनम् उक्त्वा युद्धे परः शत्रुः निरुद्धः । तस्मात् ऊर्ज्जस्वीत्येवमादिकं रसान्तरेऽपि तादृशो गर्वः ऊर्जस्वीत्यर्थः ॥ २९४ ॥

पर्य्यायोक्तं लक्षयति पर्य्यमिति । इष्टम् अभिलषितम्

दशत्यसौ परभृतः सहकारस्य मञ्जरीम् ।
तमहं वारयिष्यामि युवाभ्यां स्वैरमास्यताम्॥२८६॥
सङ्गमय्य सखीं यूना सङ्केते तद्रतोत्सवम् ।
निर्वर्त्तयितुमिच्छन्त्या कयाप्यपसृतं ततः ॥ २८७॥

इति पर्य्यायोक्तम् ।

किञ्चिदारभमाणस्य कार्य्यं दैववशात् पुनः ।

अर्थं साक्षात् वाचकशब्देन अनाख्याय अकथयित्वा तस्यैव इष्टार्थस्य सिद्धये प्रतिपत्तये यत् प्रकारान्तरेण भङ्गिविशेषेण आख्यान व्यञ्जनया द्योतनं तत् पर्य्यायोक्तम् इष्यते। समानार्थकशब्दान्तरस्यैव पर्य्यायत्वात् अन्वर्थसञ्ज्ञेयमिति बोध्यम् ॥ २८५ ॥

पर्य्यायोक्तमुदाहरति दशतीति। असौ परभृतः कोकिलः सहकारस्य कुञ्जवहिस्थितस्येति शेषः मञ्जरी दशति, अहं तं निवारयिष्यामि युवाभ्यां स्वैरं स्वच्छन्दम् आस्यतां स्थीयतामिति कान्तकामिन्योः सुरतोत्सवस्य व्याघातो मा भूदिति विविच्य सख्यास्ततोऽपसरणस्यौचित्ये इतोऽहं गमिष्यामीति वाचकपदेनाभिधाने वैचित्र्यातिशयस्याभावो जायते इति परभृतवारणव्याजेन तदपसरणं व्यञ्जीकृतमिति पर्य्यायोक्तम् ॥ २८६ ॥

सङ्गमय्येति। सङ्केते सङ्केतस्थाने सखीं यूना सह सङ्गमय्य तयोः रतोत्सवं निर्वर्त्तयितुं सम्पादयितुमिच्छन्त्या कयापि सख्या ततः अपसृतमित्यन्वयः॥ २८७ ॥

समाहितं निरूपयति किञ्चिदिति। किञ्चित् कार्य्यम्

तत्साधनसमापत्तिर्या तदाहुः समाहितम् ॥२९८॥
मानमस्या निराकर्तुं पादयोर्मे पतिष्यतः ।
उपकाराय दिष्ट्यैतद्दीप्तं घनगर्जितम् ॥ २९९ ॥
आशयस्य विभूतिर्वा यन्महत्त्वमनुत्तमम् ।
उदात्तं नाम तं प्राहुरलङ्कारं मनीषिणः ॥३००॥

प्रारभमाणश्च कर्तुमुद्युक्तस्य दैववशात् अकस्मात् पुनः तस्य साधनस्य समाधानस्य या समापत्तिः समायोगः तत् समाहितम् आहुः । समाधानप्राप्तत्वात् अन्वर्थसंज्ञेयमिति । दैववशादिति पुनर्निमित्तपरिग्रहः प्रयत्नकारणान्तरालम्बनेन कार्यसमाधानेऽपि चमत्कारमात्रात्। तदुक्तं भोजराजेन, कार्यारम्भे मनोवाञ्छितादृष्टदैवाकृतं च यत् । आकस्मिकी बुद्धिपूर्वोभयी वा तत् समाहितम् इति ॥ २९८ ॥

समाहितमुदाहरति मानमिति । अस्याः मानिन्याः मानं निराकर्तुं पादयोः पतिष्यतः मम उपकाराय दिष्ट्या दैवेन प्रवृत्तं घनगर्जितम् उद्दीप्तम् । अत्र मानभङ्गाय पादपतनप्रवृत्तस्य दैवादुद्दीप्तेन घनगर्जितेन तस्यातीवोद्दीपकत्वात् अकस्मिन तत्समाधानमिति समाहितमलङ्कारः ॥ २९९ ॥

उदात्तमनुपपादयति आशयस्येति । आशयस्य अभिप्रायस्य विभूतिः सम्पत्तिः वा यत् अनुत्तमम् अलौकिकं महत्त्वम् अधिक्यं, मनीषिणः तम् उदात्तं नाम अलङ्कारं प्राहुः । तथाच, प्रस्तुतस्य उदाराशयत्ववर्णनेन लोकातिशयसम्पद्वर्णनेन च यद् वैचित्र्यं स एव उदात्तालङ्कार इति निष्कर्षः । केचित् तु यद्यपि प्रस्तुतस्याङ्गं महता चरितं भवेदिति आहुः ।

गुरोः शासनमलंतुं न शशाक स राघवः।
यो रावणशिरश्छेदकार्य्यभारेऽप्यविक्लवः॥ ३०१॥
रत्नभित्तिषु संक्रान्तैः प्रतिबिम्बशतैर्हतः।
ज्ञातो लङ्केश्वरः क्षुद्रादञ्जनेयेन तत्त्वतः॥३०२॥
पूर्ववाशयमाहात्म्यमत्राभ्युदयगौरवम्।
मुच्यङ्गितमिति प्रोक्तमुदात्तद्वयमप्यदः॥ ३०३॥

उदात्तम्।

तस्मते प्रस्तुतस्य अङ्गत्वेन महता चरित्रवर्णनमपि उदात्तालङ्कार इति बोध्यम्॥ ३००॥

आशयमहत्त्वे उदाहरति गुरोरिति। यः रावणस्य शिरश्छेदः कार्य्यं तस्य भारः तस्मिन्नपि अविक्लवः अव्याकुलः स राघवः गुरोः पितुः शासनं राज्यत्यागपूर्वकवनगमनादेशम् अलेतुम् अतिक्रमितु न शशाक। अत्र रावणवधरूपासाध्यसाधनत्वमस्य तादृशगुरुनिदेशवर्त्तित्वेन अलौकिक माहात्म्यं प्रतीयते इत्युदात्तत्वम्॥ ३०१॥

विभूतिमहत्त्वे उदाहरति। रत्नभित्तिष्विति। आञ्जनेयेन अञ्जनासुतेन हनुमता क्षुद्रात् अतिकटेन बहुपर्य्यालोचनया इत्यर्थः रत्नभित्तिषु सङ्क्रान्तैः प्रतिफलितैः प्रतिबिम्बानां शतैः हत लङ्केश्वर रावण तत्त्वत ज्ञात ईदृशैश्वर्य्यशाली नास्तीति अयमेव लङ्केश्वर इति विदित इत्यर्थः। अत्र लङ्केश्वरस्य तादृशैश्वर्य्यमहत्त्ववीर्त्तनमेव उदात्तालङ्कार इति॥ ३०२॥

द्वैविध्यमुपसंहरति पूर्ववेति। पूर्वत्र गुरोरित्युदाहरणे

अपङ्क्तिरपङ्क्त्य किञ्चिदन्यार्थदर्शनम् ।
न पञ्चेषु स्मरस्तस्य सहस्रं पतिणामिति ॥ २०४ ॥
चन्दन चन्द्रिका मन्दो गन्धवाहश्च दक्षिण: ।
मयीवाग्निमयी सृष्टिर्मयि शीता परान् प्रति ॥ २०५ ॥
तेजस्विनेवमभ्युपेत्यैव परेष्वात्मनि कामिना ।
शीतापकाशनात्तस्य सेयं विषयनिह्नुति: ॥ २०६ ॥

[illegible] मात्रामात्रम्, अत एवाभित्तिष्विवुदाहरणे अभ्युद- [illegible] मन्यत्रित मुप्रतीतमिति अद उदात्तद्वयं प्रोक्तम् [illegible] निलाप्य मद्भावादिति भाव: ॥ २०३ ॥

अपङ्क्तिं निरूपयति अपङ्क्तिरिति । किञ्चित् किमपि [illegible] अपङ्क्त्य अपलप्य अन्यस्य अर्थस्य दर्शनं व्यवस्थापनम् अपङ्क्ति: । अत्र धर्मापङ्क्नवेन धर्मान्तरारोपण तत्त्वापङ्क्व- [illegible] धर्मिनिर्देशेन धर्म्यन्तरारोप इत्यनयोर्भेद । उदा- [illegible] नेति । यस्य काम पञ्चेषुर्न तन्मात्रेषुभि समग्रजगता- [illegible] इषवोऽनामग्रावादिति भाव:, अतस्तस्य पत्रिणा सहस्रम् [illegible] नेय । अत्र स्मरस्य पञ्चेषुत्वधर्मं प्रतिषिध्य सहस्रेषु- [illegible] धर्मान्तरारोपात्पङ्क्तिरिति बोध्यम् ॥ २०४ ॥

विषयापङ्क्तिमुदाहरति चन्दनमित्यादि । चन्दन चन्द्रिका [illegible] दक्षिण: गन्धवाह मा इय मयि विरहिणीत्यर्थ: [illegible] मयी सृष्टि अग्निवत् मेया प्रतीयते इत्यर्थ, परान् [illegible] अविरहिण इत्यर्थ प्रति शीता शीतला सृष्टि तेषा- [illegible] मप्रकाशकत्वादिति भाव । अत्र कामिनां परेषु शैशिर्यं [illegible] अभ्युपेत्य अस्यैव आत्मनि औष्ण्यप्रकाशनात् अग्नि-

असावनन्दकिरणश्चन्द्रमा नामतो मतः।
अन्य एवायमर्थात्मा विषनिष्यन्दिदीधितिः॥३०७॥
इति चन्द्रत्वसंदिग्धो निवर्त्यार्थान्तरात्मता।
उक्ता स्मरार्त्तेनित्थं या स्वरूपापह्नुतिर्मता॥३०८॥
उपमापह्नुतिः पूर्वमुपमास्वेव दर्शिता।

सत्यत्वधर्मारोपणेन चन्दनादीनां शैत्यदाहकत्वयोर्विषयभेदस्य कीर्त्तनात् विषयापह्नुतिरियमित्यन्वयः॥३०५॥३०६।

स्वरूपापह्नुतिमाह असाविति। चन्द्रमा असृतस्यन्दिनः किरणा यस्य स. नामत नाम्नैव मत. ख्यात न तु अर्थत इत्यर्थः तस्य किरणानाम् असृतस्यन्दित्वस्य प्रत्यक्षविरुद्धत्वादिति भावः। विरहिण उक्तिरियम्। विरहे चन्द्रकिरणस्य अतीवोद्दीपकत्वादसह्यत्वमिति बोध्यम्। अय चन्द्रमा अन्य अर्थात्मा वस्तुस्वरूप एव. अर्थोऽभिधेयं वस्तुप्रयोजननिवृत्तिश्चित्यमर। चन्दति आह्लादयतीति व्युत्पत्तिलभ्यार्थात् अन्यपदार्थ एवेत्यर्थः। यथा. मण्डपादिशब्दा व्युत्पत्तिलभ्येषु मण्डपानकर्तृरूपेषु अर्थेषु अशक्ता गृहादिरूपार्थवाचकास्तद्वदिति भावः. अत विषनिष्यन्दिनो दीधितयो यस्य तथोक्त। इत्यत्र स्मरार्त्तेन विरहिणा इत्यर्थः इन्दौ चन्द्रत्वम् आह्लादकत्वस्वरूपत्व निवर्त्य निषिध्य अपह्नुत्य इत्यर्थः अर्थान्तरात्मता वस्त्वन्तरस्वरूपत्वम् उक्ता आरोपिता अत एव स्वरूपापह्नुतिर्मता॥३०७॥३०८।

उपमापह्नुतिरिति। उपमाया सादृश्येन अपह्नुतिः पूर्वम् उपमासु उपमालङ्कारभेदेषु एव मध्ये दर्शिता प्रतिषेधोपमा-

इत्यपङ्क्तिभेदानां लक्ष्यो लक्ष्येषु विस्तरः ।

अपङ्क्तिचक्रम् ।

श्लिष्टमिष्टमनेकार्थमेकरूपान्वितं वचः ।
तदभिन्नपदं भिन्नपदप्रायमिति द्विधा ॥ ३१० ॥

एषा वर्णिता इत्यर्थः । इति उक्तरूपाया अपङ्क्तेः भेदानां विस्तरः लक्ष्येषु यथायथं लक्ष्येषु उदाहरणेषु लक्ष्यः अनुसन्धेय इत्यर्थः ॥ ३०९ ॥

श्लेष लक्षयति श्लिष्टमिति । अनेकार्थम् अभिधया युगपदनेकार्थप्रतिपादकम् एकेन अभिन्नेन रूपेण आकारेण घटितं युक्तं वचः श्लिष्टं श्लेषालङ्कारयुक्तम् इष्टं कविभिरभिलषितम् । तथाच, शब्दार्थयोरेकतावभासहेतुः सम्बन्धविशेषः श्लेषः, स चात्र शब्दयोरेकप्रयत्नोच्चार्यत्वरूप अर्थयोस्तु एकप्रयत्नोच्चार्यमाणशब्देन ऐककालिकत्वबोधरूपः । अन्ये तु शब्दयोर्जतुकाष्ठन्यायेन अर्थयोश्च एकवृन्तगतफलद्वयन्यायेन श्लेष इत्याहुः । यत्र अभिन्नया वृत्त्या शब्दस्य अनेकार्थत्वं तत्रैव श्लेषः, यत्र तु अनेकार्थत्वेऽपि शक्तिसङ्कोचकानां संयोगादीनां सद्भावः । यदुक्तं विश्वनाथेन, सयोगो विप्रयोगश्च साहचर्यं विरोधिता । अर्थः प्रकरणं लिङ्गं शब्दस्यान्यस्य सन्निधिः । सामर्थ्यमौचिती देश कालो व्यक्तिः स्वरादयः । शब्दार्थस्यानवच्छेदे विशेषस्मृतिहेतवः ॥ यथा, 'सशङ्खचक्रो हरिरित्यत्र शङ्खचक्रसयोगेन हरिशब्दो विष्णुमेवाभिधत्ते इत्यादि । तत्र न श्लेषः अभिधया युगपदर्थद्वयप्रतीतेरभावात्, तादृशस्थले सयोगादिना एकार्थबोधनात् अभिधायां विरतायां पश्चात् व्यञ्जनया अर्थान्तरप्रतीतौ ध्वनित्वमेव । यथा, भट्टात्मनो

असावुदयमारूढः कान्तिमान् रक्तमण्डलः।
राजा हरति लोकस्य हृदयं मृदुभिः करैः ॥३१॥

दुरधिरोहतनोर्विशालवक्षोरुहे. हतशिलीमुखनखक्षतस्य यथानुपप्लुतगते परवारणस्य दानाम्बुसिक्तसुभग मतन दर्पोभृदित्यत्र पदरचेन प्रयत्नः प्रकृतः एतत्, प्रतीयते, पश्चात् कञ्चनता इत्यीति। तत्र अर्थस्य अनेकत्वं क्वचिद् वस्तुन. द्रव्यस्य रूपलेऽपि सम्बन्धिभेदेन इति दोध्यम्। आद्यस्मादत्र शब्दश्लेष द्वितीयस्तु अर्थश्लेष इति विश्वनाथादय। तन्न इति ध्यमाह तदिति। तत् यत्र अभिन्नपद शब्दतावच्छेदकस्य विभिन्नत्वेऽपि एकप्रकृतिप्रत्ययसमासादिघटितत्वेन अभिन्नानि पदानि यस्मिन् तत्, तथा भिन्नानाम् अनेकप्रकृतिप्रत्ययादिघटितत्वेन विलक्षणाना पदाना प्रायो वाचकत्व तत्। तथाच अभिन्नपदवाच्ये अभङ्गश्लेष भिन्नपदवाच्ये सभङ्गश्लेष इति द्विविधत्व श्लेषस्तु समधिकचमत्कारितया कविभिर्बाहुल्येन प्रयुज्यत इति प्रायपदाभिप्राय। विश्वनाथस्तु. श्लिष्टैः पदैरनेकार्थाभिधाने श्लेष इष्यते। वर्णप्रत्ययलिङ्गानां प्रकृत्यो पदयोरपि। श्लेषाद् विभक्तिवचनभाषाणामष्टधा च स। तत्र वर्णश्लेषो यथा, प्रतिकूलतामुपगते हि विधौ विफलत्वमेति बहुसाधनता। अवलम्बनाय दिनभर्तुर भूत्र पतिष्यत करसहस्रमपीत्यत्र विधाविति विधिविधुशब्दयोरिकारोकारयोर्वर्णयो. श्लेष इत्यादष्टधा भेदमाह। ३१०।

तत्राभिन्नपदमुदाहरति असाविति। उदयमुदयाद्रिम् उदयाचलञ्च आरूढः कान्तिमान् कमनीयमूर्त्ति किरणमाली च रक्तमण्डल. अनुरक्तप्रकृति. लोहितविम्बश्च राजा नृप

दोषाकरेण सम्बन्धन् नभःपथवर्त्तिना ।
राज्ञा प्रदोषे भाणित्वमभ्रष्टं किं न बाधते ॥३१२॥
उपमारूपकाक्षेपव्यतिरेक द्विशोचराः ।
प्रागेव दर्शिता श्लेषा दृष्टान्ते दीक्षनाधरैः ॥ ३१३ ॥

अन्यो च मृदुभिः पल्वे प्रीतस्य कौ राजहंसै किरणैश्च कोमलैः स्पृष्टस्य चरतः । अत्र दर्शनविरहाभावात् राजचन्द्रो भाति वाक्यो, उदयाद्रिप्रदानात् । एकप्रकृतिप्रत्ययसाधित-त्वादभिन्नानीति अभङ्गश्लेष ॥ ३११ ॥

भिन्नपदसमुदायेति दोषाकरेति । प्रदोष रजनीमुख तस्मिन्दोषा क्षपित पुरुष दोषाकरेण दोषाणां कर तेन निशाकरेण दोषस्य शब्दस्य च तद्वत् नक्तपथे आकाशपथे वर्तते इति तथोक्ते तत्पथे चक्षुश्चित्ताचारे न वर्त्तमानेन च राज्ञा पत्न्या सम्बन्धन सयोग प्राप्तान् सन् अप्रियम् विधायित इत्यत्र मात्र इत्थम् प्रकारेण किं काव्य बाधते न बाधते । अत्र दोषाकरेणेत्यादिनि प्रकृतिप्रत्ययसमासै-भिन्नानीति सभङ्गश्लेष । राज्ञेत्यत्र तु अभङ्ग तदत सभङ्गा-भङ्गश्लेष इति वैविध्यम । उक्तञ्च, पुनरस्विधा सभङ्गोऽथ भङ्ग-स्तदुभयात्मक इति । केवलमभङ्गोदाहरण विल्वनाथेन दर्शि-तम । यथा, पृथुकाक्षेष्वरपात्र भणितनि पपरिजन देव ! । विलसत्करेणुगहन सम्प्रति ममभावयो मदनमिति ॥ ३१२ ॥

श्लेषस्य प्राधान्य दर्शयित्वा अलङ्कारविशेषेषु अप्याङ्गत्व दर्शयितुमाह उपमेति । प्रागेव उपमारूपकाक्षेपव्यतिरेकादि: न चर्चा, श्लेषा तादृशा श्लेषा दर्शिता अपरे केचन अपरा-ङ्गभूता अत्यर्थं, दर्श्यन्ते । तत्र साधारणधर्मप्रयोगे

क्वचित्क्रियाभिन्नक्रिय: क्वचिद्विरुद्धक्रियोऽपर:।
विरुद्धकर्मा चान्यस्त्रय: क्रमेण नियमवानपि ॥ ३१४॥
नियमाक्षेपरूपोक्तिरविरोधी विरोध्यपि।
तेषां निदर्शनेष्वत्र स्वरूपमाविर्भविष्यति ॥ ३१५ ॥
वक्रा: स्वभावमधुरा: भणन्त्यो रागमुल्बणम्।
दृशो दूत्यश्च वर्षन्ति कान्ताभि: प्रेषिता: प्रियान्॥ ३१६

धर्मोपमाया श्लेषोपमायाश्च अर्थश्लेष:, समानोपमायास्तु शब्दश्लेष:, एकसन्दष्टापि दोष्यम् ॥ ३१३ ॥

दर्शयिष्यमाणानां भेदानाह अस्तीति। क्वचित् श्लेष: अभिन्नक्रिय:, क्वचित् अभिन्नक्रिय: अपर विरुद्धकर्मा, अन्य: अनियमत्वात् नियमाक्षेपरूपोक्ति:, अविरोधी, तथा विरोधी निदर्शनेषु वक्ष्यमाणेषु उदाहरणेषु तेषा भेदाना रूप स्वरूपम् आविर्भविष्यति प्रकाशिष्यते ॥ ३१४ ॥ ३१५ ॥

तत्र अभिन्नक्रियमुदाहरति वक्रा इति। कान्ताभि: प्रेषिता: प्रहिता: प्रान्तु प्रेरिताश्च वक्रा स्वभावकुटिला कुटिलमार्गदर्शयित्र्यश्च, स्वभावेन मधुरा मनोहारिण्य मिष्टभाषिण्यश्च तथा उल्बणम् अतिप्रौढ राग लौहित्य प्रेमानुरागश्च भणन्त्य कथयन्त्य प्रकाशयन्त्यश्च दृश नयनानि दूत्यश्च प्रियान् वर्षन्ति। अत्र वक्रादीना क्रिष्टता, वर्षणक्रिया तु उभयत्रैकैव इति अभिन्नक्रिय श्लेषमूलयोगिनाम्नोरस्य पोषकत्वात् तदङ्गम्। केचित् तु एकया क्रियया वाक्यद्वयस्य दीपनात् प्रकाशस्य दीपकस्य अङ्गमित्याहु ॥ ३१६ ॥

मधुरा रागवर्द्धिन्यः कोमलाः कोकिलागिरः ।
आकर्ण्यन्ते मदकलाः श्लिष्यन्ते चासितेक्षणाः ३१७
रागमादर्शयन्नेष वारुणीयोगवर्द्धितम् ।
तिरोभवति घर्मांशुरङ्गजस्तु विजृम्भते ॥ ३१८ ॥
निस्त्रिंशत्वमसावेव धनुष्येवास्य वक्रता ।

अविरुद्धक्रियमुदाहरति मधुरा इति। मधुराः मनोहारिण्य माधुर्याख्यस्वाभाविकाङ्गनालङ्कारवत्यश्च। माधुर्यलक्षणन्तु उक्तं यथा सर्वावस्थाविशेषेषु माधुर्यं रमणीयतेति। रागवर्द्धिन्य उद्दीपकत्वात् प्रणयाविष्करणाच्च अनुरागं वर्द्धयन्त्य कोमलाः सुखस्पर्शाः मृदुश्लक्ष्णाश्च तथा मदकलाः मदोन्मत्ता सौभाग्यादिजनितगर्वान्विताश्च। मदलक्षणन्तूक्तं यथा मदो विकार सौभाग्ययौवनाद्यवलेपज इति। कोकिलानां गिर वाच असितेक्षणाश्च आकर्ण्यन्ते तथा श्लिष्यन्ते आलिङ्ग्यन्ते च। इत्यत्र आकर्णनश्लेषणक्रिययोरेककालीनत्वसम्भवाम् अविरुद्धक्रियोऽयमभङ्गश्लेषः पूर्ववत् तुल्ययोगितामेव पुष्णातीति तदङ्गम् ॥ ३१७ ॥

विरुद्धक्रियमुदाहरति रागमिति। एष घर्मांशुः सूर्यः वारुण्या पश्चिमाशायाः सुरायाश्च योगेन समाश्रयेण पानेन च वर्द्धितं रागं लौहित्यम् अनुरागञ्च आदर्शयन् प्रकटयन् वर्द्धयंश्च तिरोभवति अस्तं गच्छति, अङ्गजस्तु कामस्तु विजृम्भते उद्योतते। अत्र तिरोभवनजृम्भणक्रिये परस्पर विरुद्धे इति विरुद्धक्रियश्लेषस्तथैव तुल्ययोगिता परिपुष्णातीति तदङ्गम् ॥ ३१८ ॥

नियमवन्तमुदाहरति निस्त्रिंशत्वमिति। अस्य नरेन्द्रस्य

शरेष्वेव नरेन्द्रस्य मार्गणत्वञ्च वर्त्तते ॥ ३१८ ॥
पद्मानामेव दण्डेषु कण्टकत्वञ्च रञ्जति ।
अथवा दृश्यते रागिमिथुनालिङ्गनेष्वपि ॥ ३१९ ॥

अमी खड्गे एव न तु अन्यत्र निस्त्रिंशत्व निर्गतस्त्रिंशतोऽङ्गुलिभ्य इति व्युत्पत्त्या त्रिंशदङ्गुल्यधिकपरिमाणवत्त्व निर्दयत्वञ्च. अथ निस्त्रिंश खड्गे ना निर्दये त्रिषु इति मेदिनी। वक्रता कौटिल्य प्रतिकूलता च धनुष्येव नान्यत्र मार्गणत्व बाणत्व शरेषु एव न तु आत्मनि इत्यर्थः, वर्त्तते इति सम्बन्धनीयम्। अत्र प्रत्येकमेवकारेण द्वितीयार्थानां व्यवच्छिन्नत्वात् नियमवानर्थन्यासः परिसङ्ख्यालङ्कार पुष्णातीति तदङ्गम्। परिसङ्ख्यालङ्कारश्च ग्रन्थकृतानुक्त पर वैचित्र्यसङ्ग्रहात् अपरैरुक्त.। यथा, प्रश्नादप्रश्नतो वापि कथितात् वस्तुनो भवेत्। तादृगन्यव्यपोहेच्छाव्द आर्योऽथवा तदा। परिसङ्ख्येति। यदि च, विधिरत्यन्तमप्राप्ते नियम पाक्षिके सति। अत्र च अन्यत्र च प्राप्ते परिसङ्ख्येति गीयते॥ इति नियमपरिसङ्ख्ययोर्भेद प्रतीयते. किन्तु अत्र परिसङ्ख्या अन्यव्यपोहमात्रप्रतीतिरेव न तु तादृग्लक्षणेति अविरोध इति बोध्यम्॥ ३१८॥

नियमाक्षेपरूपोक्तिमुदाहरति पद्मानामिति। त्वयि रक्तिं सति पद्मानामेव दण्डेष नालेषु न तु दण्डनामकोपायेषु. अथवा रागिण. अनुरक्तस्य मिथुनस्य स्त्रीपुसदोरालिङ्गनेषु अपि कण्टक. तीक्ष्णाग्रावयव रोमाञ्च क्षुद्रशत्रुश्च. रोमाञ्चे क्षुद्रशत्रौ च तरोरङ्गे च कण्टक इति कोष। दृश्यते। अत्र पद्मानामेवेति नियमस्य अथवेत्यादिना आक्षेपरूपा उक्तिरिति

महीभृद् भूरिकटकस्तेजस्वी नियतोदयः ।
दक्ष. प्रजापतिर्यासोत् स्वामी शक्तिधरश्च सः ३२१
अच्युतोऽप्यवृषच्छेदी राजाप्यविदितक्षयः ।
देवोऽप्यविबुधो जज्ञे शङ्करोऽप्यभुजङ्गवान् ॥ ३२२ ॥

श्लेषचक्रम् ।

निगमात्तेषरूपोक्ति पूर्वार्द्धे स्थितायाः परिसंख्यायाः द्वितीयार्द्धे च एकत्रनिक्षिप्तकण्ठक्रम्य वाक्यद्वयोद्दीपनात् प्राधान्येन स्थितश्च दीपकस्य अङ्गमित्यवधेयम् ॥ ३२० ॥

अविरोधिनमुदाहरति महीभृदिति । स महीभृत् राजा पर्वतश्च भूरिकटक बहुस्कन्धावार विशालनितम्बश्च, तेजस्वी प्रतापवान् मयूखमालो च, नियतोदय सततोन्नतिशाली प्रतिदिनञ्च जातोन्नतश्च, दक्ष निपुण ऋषिविशेषश्च, प्रतापति. प्रजापाल सृष्टिकर्त्ता च, स्वामी प्रभु विशाखश्च, स्वामी प्रभुशिवयोरिति मेदिनी। शक्तिधर प्रभावोत्साहमन्त्रजशक्तिसम्पन्न अस्त्रविशेषवांश्च, आसीत्। अत्र महीभृदादिविशेषपदार्थानां परस्परसम्बन्धे अविरोधात् अयम् अविरोधो नाम ॥ ३२१ ॥

विरोधिनमुदाहरति अच्युत इति। अच्युत सत्पथादभ्रष्ट विष्णुश्च अपि अवृषच्छेदी वृष धर्म तदाख्योऽसुरश्च तस्य छेदी न भवतीति तथोक्त, राजा नरपतिः चन्द्रश्च अपि अविदित अज्ञात क्षय क्षीणता दुर्बलता इत्यर्थ. रोगविशेषश्च येन तादृश, देव राजा अमरश्च अपि अविबुध विगतपण्डित. देवश्च न भवतीति तथोक्त, शङ्कर शुभकृत् हरश्च अपि अभुजङ्गवान् दुर्जनरहित सर्परहितश्च जज्ञे, स इति कर्त्तृपद-

गुणजातिक्रियादीनां यत् तु वैकल्यदर्शनम्।
विशेषदर्शनायैव सा विशेषोक्तिरिष्यते ॥ ३२३ ॥
न कठोरं न वा तीक्ष्णमायुधं पुष्पधन्वनः।
तयापि जितमेवासीदमुना भुवनत्रयम् ॥ ३२४ ॥

सम्बाहार्यम्। अत्र अच्युतादिपदानां द्वितीयार्थे विष्णौ हयग्रीवादिपदार्थान्वयो विरुद्ध इति विरोधवान् अयं श्लेष विरोधाभासस्त्वाह्नम्। ३२२।

विशेषोक्तिं निरूपयति गुरुरिति। विशेषस्य प्रस्तुतस्य वैशिष्ट्यातिशयस्य तस्य दर्शनाय प्रतिपत्तये गुणजातिक्रियादीनाम् आदिपदेन द्रव्यादीनाञ्च यत् तु वैकल्यदर्शनं कार्यनिर्वाहानुपयोगित्वप्रतिपादनं सा विशेषोक्तिर्नाम अलङ्कार इष्यते इत्यन्वयः। अतिशयोक्तौ प्रस्तुतस्य विशेषदर्शनमङ्गत्वेऽपि गुणादीनां वैकल्यप्रतिपादनं नास्तीत्यनयोर्भेदः। एवकारेण विशेषदर्शनाभावे नायमलङ्कार इति ध्वनितम्। विशेषणादयस्तु सति हेतौ फलाभावो विशेषोक्तिरुक्ता इत्येतल्लक्षणमाह। ३२३।

अत्र गुरुवैकल्ये विशेषोक्तिमुदाहरति नेति। पुष्पधन्वन आयुधम् अस्त्रं न कठोरं न वा तीक्ष्णं पुष्पमयत्वादिति भावः, तयापि अमुना भुवनत्रयं जितमेव आसीत्। अत्र कामस्य वीर्योत्कर्षरूपविशेषप्रदर्शनाय आयुधस्य कठोरतीक्ष्णत्वरूपयोर्गुणयोर्वैकल्यदर्शनरूपा विशेषोक्तिः। विभावनायां गूढकारणस्य स्वाभाविकत्वस्य वा विभावने तात्पर्यमस्ति अत्र तु विशेषकरणं कार्यनिष्पादकतया वर्णना यस्य उत्कर्षप्रतिपादने तात्पर्यमस्तीत्यनयोर्भेदः। ३२४।

न देवकन्यका नापि गन्धर्वकुलसम्भवा ।
तथापि वेधसोऽप्यस्या विधातुं वेधसोऽप्यलम् ॥ ३२५ ॥
न रक्ता भ्रुकुटिर्नापि स्फुरितो दशनच्छदः ।
न च रक्ता भवद्दृष्टिर्जितञ्च द्विषतां बलम् ॥ ३२६ ॥
न रथा न च मातङ्गा न हया न च पत्तयः ।
स्त्रीणामपाङ्गदृष्टेव जीयते जगतां त्रयम् ॥ ३२७ ॥

जातिवैकल्ये विशेषोक्तिं दर्शयति नेति । एषा देवकन्यका गन्धर्वकुलसम्भवापि न, तथापि वेधसः ब्रह्मणोऽपि तपोभङ्गं विधातुमस्या अलं शक्ता । अत्र देवत्वगन्धर्वत्वरूपजातिवैकल्यं तपोभङ्गसामर्थ्यवर्णनात् नायिकायाः मनोमोहित्वातिशयविशेषप्रतिपादित इति जातिवैकल्ये विशेषोक्तिः ॥ ३२५ ।

क्रियावैकल्ये विशेषोक्तिं दर्शयति नेति । भ्रुकुटिः न बद्धा, दशनच्छदः अधरश्च न स्फुरितः, न कम्पितः दृष्टिश्च न रक्ता अरुणा, तथापि द्विषता शत्रूणां बलं जितञ्च । अत्र बन्धनस्फुरणरञ्जनरूपा क्रिया, तेषाञ्च वैकल्यप्रतिपादनं वर्णनीयस्य नायकस्य उत्कर्षद्योतनाय, अतस्तत् क्रियावैकल्ये विशेषोक्तिरिति ३२६ ॥

द्रव्यवैकल्ये विशेषोक्तिं दर्शयति नेति । स्त्रीणाम् अपाङ्गदृष्टा एव कर्त्र्यो जगता त्रयं जीयते, रथा न, मातङ्गा न, हया न, पत्तयश्च न उपयोगिन इति शेषः । अत्र रथादीनां द्रव्याणां वैकल्यप्रतिपादनरूपविशेषोक्तिः ॥ ३२७ ॥

एकचक्रो रथो यन्ता विकलो विषमा हयाः ।
आक्रामत्येव तेजस्वी तथाप्यर्को नभस्तलम् ॥३२८॥
सैषा हेतुविशेषोक्तिस्तेजस्वीतिविशेषणात् ।
अयमेव क्रमोऽन्येषां भेदानामपि कल्पने ॥ ३२९ ॥

विशेषोक्तिचक्रम् ।

विवक्षितगुणोत्कृष्टैर्यत्समीक्ष्य कस्यचित् ।
कीर्त्तनं स्तुतिनिन्दार्थं सा मता तुल्ययोगिता ३३०

हेतुविशेषोक्तिं दर्शयति एकचक्र इति। रथः एकचक्रः, यन्ता सारथिः विकलः अङ्गहीनः अनूरुत्वादिति भावः हयाः अश्वाः विषमाः अयुग्माः सप्तसङ्ख्यकत्वादिति भावः, तथापि अर्कः सूर्यः नभस्तलम् आक्रामति एव यतः सः तेजस्वीत्यन्वयः। अत्रापि रथादीनां द्रव्याणां वैकल्यप्रतिपादनरूपविशेषोक्तिस्तेजस्वित्वरूपहेतुकथनेन समधिकं वैचित्र्यमाटधातीति हेत्वलङ्कारानुप्राणिता इति बोध्यम् ॥ ३२८ ॥

सैषेति। तेजस्वीति विशेषणात् हेतुगर्भादिति भावः सा एषा विशेषोक्तिः हेतुविशेषोक्तिः सहेतुका इत्यर्थः, अन्येषामपि भेदानां विशेषाणां कल्पने अयमेव क्रमः नियमः यथा हेत्वलङ्कारसद्भावेनास्या भेदः तथान्येषामपि अलङ्काराणां सद्भावेनेति भावः ॥ ३२९ ॥

तुल्ययोगितां निरूपयति विवक्षितेति। विवक्षिता प्रस्तुतगतत्वेन इष्टा ये गुणाः तैरुत्कृष्टैः विख्यातैः अप्रस्तुतैः समीक्ष्य तुल्यपक्षीकृत्य कस्यचित् प्रस्तुतस्य स्तुतिनिन्दार्थं स्तुत्यर्थं निन्दार्थं वा कीर्त्तनं सा तुल्ययोगिता मता इत्यन्वयः। विव-

इन्द्र कुबेरो वरुण सङ्ख्याको भवानपि ।
अनन्यसदृशीं लोकपाल इति स्तुतिम् ॥३३१॥
सङ्गतानि मृगाक्षीणां तडिद्विलसितानि च ।
घनारब्धान्यपि स्वयम् ॥३३२॥

तुल्ययोगिता ।

तत्र पूर्वोक्तमेवेति अप्रस्तुतमविवक्षित ह्याभ्यामेकेन वा समी-कृत्य यथा सङ्गतादिति बोध्यम् । दीपके वाक्यान्तरीय-पदस्थ अनेकस्यादिना वाक्यान्तरार्थेदीपकत्वम् इह तु स्तुति-निन्दासमीकरणमित्यनयोर्भेद । उपमाया वाच्यार्थस्य व्यङ्ग्या-त्व । ॥ सास्यप्रतीति गाम्यो इह तु सर्वेषा समकक्षतया साद्दश्यप्रतीतिरित्यनयोर्भेद । तथा निन्दितगुणशालित्वेन अप्रस्तुते सह प्रस्तुतस्य सम-कक्षतया तादृग्गुणवत्त्वकीर्तनेन स्तुतिनिन्दा वा तुल्ययोगि-तेति निष्कर्ष ॥ ३३० ॥

तत्र स्तुतावुदाहरति यम इति । यम कुबेर वरुण: सङ्ख्या-नश्च इन्द्र तथा भवान् अनन्यविषयाम् अनन्यसक्ता लोकपाल इति स्तुतिम् आख्या बिभ्रति । अत्र लोकपालत्वरूपो गुण: प्रस्तुते नास्ति विवक्षित, तेन च गुणेन उत्कृष्टै: यमादिभि: सह समकक्षतया कीर्तनेन स्तुतिरूपा तुल्ययोगिता ॥ ३३१ ॥

निन्द्यामुदाहरति सङ्गतानीति । मृगाक्षीणा सङ्गतानि सङ्गमा तडिद्विलसितानि च स्वय घनारब्धानि घन निविडं यथा तथा अन्यत्र घनैर्मेघैरारब्धानि अपि क्षणद्वय न स्थितिमत्त्वमात्रव्याप्तित्वात्तेषामिति भाव । अत्र क्षणस्थायि-त्वरूपो गुणो अप्रस्तुते मृगाक्षीसङ्गमे विवक्षित:, तेन च अप्र-

विरुद्धानां पदार्थानां यत्र संसर्गदर्शनम्।
विशेषदर्शनायैव स विरोधः स्मृतो यथा ॥ ३३३ ॥
कूजितं राजहंसानां वहति मदमञ्जुलम्।
क्षीयते च मयूराणां सतमुत्क्रान्तसौष्ठवम् ॥३३४॥

तुततडिद्विलसितस्य समकक्षतया वर्णनेन निन्दाप्रतीयमाना तुल्ययोगिता. सा च घनारब्धानीति श्लेषानुप्राणिततया समधिका चारुता पुष्णातीति बोध्यम् ॥ ३३२ ॥

विरोध लक्षयति विरुद्धानामिति। विशेषस्य प्रस्तुतगतोत्कर्षस्य दर्शनाय प्रतिपादनाय एव विरुद्धाना परस्परविरोधिनां पदार्थाना यत्र वैचित्र्येण समर्गदर्शनं सम्बन्धप्रतिपादनं सामानाधिकरण्यकीर्त्तनमित्यर्थः सः विरोधः स्मृत। यथेति उदाहरणार्थम्। तथाच प्रस्तुतोत्कर्षप्रतिपत्तये आपाततः विरुद्धत्वेन प्रतीयमानाना पदार्थाना सामानाधिकरण्यप्रतिपादनरूप वैचित्र्य विरोध इति निष्कर्षः। स च जात्यादिभिर्जातिरिति चतुर्विध गुणादिभिर्गुणस्येति त्रिविध, क्रियाद्याभ्या क्रियाया इति द्विविध. द्रव्यस्य द्रव्येणेति एकविध इति मिलित्वा दशविधो बोद्धव्य इति। ३३३ ॥

कूजितमिति। राजहसाना मदमञ्जुल मदमनोहर कूजितं वहति हृदि गच्छतीति, मयूराणाञ्च उत्क्रान्त मौष्ठव मनोहारित्व यस्मात् तादृग मत् क्षीयते च। अत्र एकस्मिन्नेव कूजिते रुते च शब्दरूपे कर्त्तरि विरुद्धयोरपि हृद्यिययोः समर्गदर्शनेन विरोध सम्बन्धिभेदेन च तत्प्रशमनम् अनेन च प्रस्तुतस्य शरत्कालस्य एकजातीययोरपि बलाबलकारित्वेन वैशिष्ट्य प्रतीयते इति ॥ ३३४ ॥

[illegible]नभरेरम्बरं दुर्दिनायते ।
[illegible]नेन जगदाक्रान्तं जायते जगतां मनः ॥ ३३५ ॥
[illegible]पृथ्वोणि रक्तोष्टमभितेक्षणम् ।
[illegible]नाभि यत् स्त्रीणां कं न कल्पलतास्तनम्॥३३६
[illegible]ग्मोरु पद्मोत्पलमुखेक्षणम् ।
[illegible]ते तन्वि तामसाकं तत्ते तापाय कल्पते॥३३७

[illegible]ति । मालविष्ये वार्षिके जलधरे अम्बरम् [illegible]पति मालवेन श्यामलमिलार्थे भवति, जगता [illegible] [illegible] जनसामान्य लोचित्येन च आक्रान्तं जायते । [illegible] [illegible] नोपितायाः कज्जलश्यामलत्वरूपसमर्गकीर्त्तन [illegible] [illegible] प्रमाणप्रमाणत्वम् । अनेन च प्रस्तुतस्य वर्षासम- [illegible] [illegible] प्रतीयते ॥ ३३५ ॥

[illegible]ति । स्त्रीणां तनुमध्यं पृथुश्रोणि विशालनितम्बं [illegible] [illegible] पलितलक्षणं कृष्णनयनं नतनाभि गभीरनाभि तथा [illegible] [illegible] [illegible] जनं न क्लिन्नं न तापयति अपितु सर्वमेवे- [illegible] [illegible] पृथुश्रोणि रक्तत्वामितत्वयोः नतत्वोन्नतत्व- [illegible] [illegible] प्रस्तुतानां स्त्रीणां वैचित्र्यं प्रतीयते, आश्रय- [illegible] [illegible] विरोधपरिहार ॥ ३३६ ॥

[illegible]ति । हे तन्वि ! ते रूपं मृणालवत् शीतलौ बाहू [illegible] [illegible] रम्भे इव ऊरू यस्य तत्, पद्ममिव उत्पले इव मुखम् [illegible] च यस्य तादृशमपि अस्माकं तापाय कल्पते । अत्र [illegible] उपमितिगर्भत्वयोर्हि शीतलत्वादिक गुणः तस्य च [illegible] [illegible] विरोध । मृणाले एव बाहू यस्य इत्यादिरूपक-

समारुतोद्धूताम्रचूतचम्पकरेणवः ।
प्रयन्ति पान्थानामस्पृशन्तोऽपि लोचने ॥३३८॥
कृष्णार्जुनानुरक्तापि दृष्टिः कर्णावलम्बिनी ।
याति विध्वंसनीयत्वं कस्य ते कलभाषिणि ! ३३९
इत्यनेकप्रकारोऽयमलङ्कारः प्रतीयते ।

विरोधचक्रम् ।

समासे तु कृष्णालवरम्भात्वादिभिर्जातिभिस्तापक्रिययोः विरोधः । वस्तुविरहित्वेन च तस्य परिहारः ॥ ३३७ ॥

उद्यानेति । उद्यानमारुतेन उपवनवायुना उद्धूताः चूतचम्पकाना रेणवः परागाः पान्थाना पथिकाना लोचने नेत्रे अस्पृशन्तोऽपि उदञ्चयन्ति उद्गतवाष्पे कुर्वन्ति विरहित्वादिति भावः । अत्र स्पर्शनाभावेऽपि उदञ्चयणक्रियेति विरोधः तत्परिहारस्तु परागाणामुद्दीपकत्वादिति ॥ ३३८ ॥

कृष्णेति । हे कलभाषिणि मधुरवचने ! ते दृष्टिः कृष्णार्जुनानुरक्ता अपि कर्णावलम्बिनी कस्य विध्वंसनीयत्वं याति, न कोऽपि विध्वंसितीत्यर्थः । अत्र कृष्णार्जुनयोरनुरक्तिः कर्णावलम्बनमिति क्रिययोरापातत. प्रतीयमानोऽपि विरोधः श्लेषेण शाम्यति तद् यथा, कृष्णा श्यामला अर्जुना धवला अनु पश्चाद्भागे प्रान्ते इत्यर्थः रक्ता कर्णावलम्बिनी आकर्णविश्रान्तेति च ॥ ३३८ ॥

इतीति । इति एवंप्रकारेण अयम् अलङ्कारः विरोध इत्यर्थः अनेकप्रकारः बहुविधः प्रतीयते । प्रतीयते इत्यत्र प्रतिभोभते इत्यपि पाठः ।

[illegible] या स्मृति. ॥ ३४० ॥

[illegible] वनेष्वपरसेविन ।

[illegible] ॥ ३४१ ॥

[illegible] प्रशस्यते ।

[illegible] ॥ ३४२ ॥

अप्रस्तुतप्रशंसा ।

[illegible] व्याजस्तुतिरसौ स्मृता ।

[illegible] अप्रस्तुतप्रशंसा लक्षयति अप्रस्तुतेति। अप्र[illegible] बहुवचनमविवक्षित[illegible] ॥ अप्रस्तुतान्यपि अप्रस्तुतानि संख्यावत्। या स्मृति[illegible] तथाच, अप्रस्तुतस्तवेन [illegible] ॥ ३४० ॥

अप्रस्तुतप्रशंसा दर्शयति सृगमित्यादि। अपरसेविन परं [illegible] वनेषु अयत्नसुलभे अनागमनीये [illegible] सृगादीभिरादिभि अन्यै सत्त्व जीवन्ति। प्रभु[illegible] अन्यद्योतिकियम। अत्र राजानुवर्त्तने राज[illegible] प्रागनिर्वेदेन केनचित मनस्विना प्रशस्यमानया त्यम अप्रस्तुता सा सृगवृत्ति प्रशस्यते इति अप्रस्तुतप्रशंसा [illegible] सृगस्य स्तुत्या स्वस्य निन्दा[illegible] अप्रस्तुतप्रस्तुतयोरुभयो प्रशंसायां [illegible] ॥ ३४१ ॥ ३४२ ॥

अथ व्याजस्तुतिं निर्दिशति यदीति। यदीति यदि[illegible] यत स्तौति असौ व्याजस्तुति स्मृता। अत्र

दोषाभासा गुणा एव लभन्ते ह्यत्र सन्निधिम् ३४३
तापसेनापि रामेण जितेयं भूतधारिणी।
त्वया राज्ञापि सैवेयं जिता सा भून्मदस्तव॥३४४॥

दोषा इव आभास्यन्ते आपाततः प्रतीयन्ते इति दोषाभासाः गुणा एव वस्तुतः अत्र सन्निधिं लभन्ते गुणस्वरूपेणैव परिणमतीत्यर्थः। निन्दन्निव स्तौतीत्यत्र स्तुवन्निव निन्दतीत्यपि प्रत्ययविपरिणामेनान्वेतव्यं वैचित्र्यसाम्यात् वैचित्र्यस्यैवालङ्कारत्वादिति बोध्यम्। तथाच, व्याजेन निन्दाव्याजेन स्तुतिः स्तुतिव्याजेन च निन्दा व्याजस्तुतिरिति निष्कर्षः। उक्तञ्च प्रकाशकारेण, व्याजस्तुतिर्मुखे निन्दा स्तुतिर्वा रूढिरन्यदेति। उदाहृतञ्च तेनैव। स्तुत्या निन्दाया यथा, हे हे लाजितबोधिसत्त्व! वत्सं किं विस्तरैस्तोयधे। नास्ति त्वत्सदृश्य पर परहिताधाने गृहीतव्रतः। तथत्यान्यजनोपकारघटनावैमुख्य। लब्ध्वा यशो भारस्योद्वहने करोपि कृपया साहायक यन्मरोरिति। अत्र समुद्रस्य स्तुतिव्याजेन निन्दाप्रतिपादन चारुतातिशयं दर्शयति॥ ३४३॥

व्याजस्तुतिमुदाहरति तापसेनेति। रामेण परशुरामेण तापसेनापि जयसाधनसामग्रीरहितेनापीति भावः, इयं भूतधारिणी पृथ्वी जिता, त्वया राज्ञापि प्रभूतजयसाधनसामग्रीमताऽपि सैव पृथ्वी न त्वतिरिक्ता जिता अतः तव मदः गर्वः मा भूत्। अत्र प्रस्तुतस्य राज्ञः आपाततः निन्दा प्रतीयत एव परं साक्षाद् भगवदवतारेण परशुरामेण महादेवप्रसादलब्धपरशुना या पृथ्वी जिता, त्वया मानवेनापि सा जितेति पर्य्यवसानात् महती स्तुतिर्गम्यत इति॥ ३४४॥

पुंस. पुराणादाच्छिद्य श्रीस्त्वया परिभुज्यते ।
राजन्निक्ष्वाकुवंशस्य किमिदं तव युज्यते ? ॥३४५॥
भुजङ्गभोगसंसक्ता कलत्रं तव मेदिनी ।
भर्तारः परां कोटिमारोहन्ति कुतस्तव ? ॥ ३४६॥
इति श्लेषानुविद्धानामन्येषाञ्चोपलक्ष्यताम् ।
व्याजस्तुतिप्रकाराणामपर्य्यन्तस्तु विस्तरः ॥ ३४७ ॥

व्याजस्तुतिः ।

श्लेषमूलां व्याजस्तुतिं दर्शयति पुंस इति । हे राजन् ! त्वया पुराणात् आद्यात् ब्रह्मणः पुंसः आच्छिद्य आक्रम्य श्रीर्लक्ष्मीः सम्पत्तिश्च परिभुज्यते । इक्ष्वाकुवंशस्य इक्ष्वाकुवंशीयस्य तव इदं किं युज्यते ? आदिपुरुषादाच्छिन्नायाः लक्ष्म्या सम्भोग इक्ष्वाकुवंशीयस्य तव न योग्य इति निन्द्यया प्रतिपन्नतात्तं सम्पद इति स्तुतिर्गम्यते अत्र पुराणपदे श्रीपदे च श्लेषगतश्लेषबलात् समधिकचारुता स्फुट प्रतीयत इति बोध्यम् ॥ ३४५ ॥

शब्दश्लेषमूलामुदाहरति भुजङ्गेति । भुजङ्गानां भोगाः शरीराणि तै संसक्ता अन्यत्र भुजङ्गानां जाराणां भोगे संसक्ता मेदिनी तव कलत्रं भार्य्या पाल्या च, तथापि तव अहङ्कारः परां कोटिम् आरोहति कुत ? अत्र भुजङ्गादिशब्दानामनेकार्थत्वात् शब्दश्लेषमूला व्याजस्तुतिरियम् ॥ ३४६ ॥

व्याजस्तुतिमुपसंहरति इतीति । इति उक्तरूपाणां श्लेषानुविद्धा तथा अन्येषाञ्च अलङ्कारमूलानां व्याजस्तुतिप्रकाराणाम् अपर्य्यन्त अगेय विस्तर उपलक्ष्यतां ज्ञायताम् ॥३४७॥

अर्थान्तरप्रवृत्तेन किञ्चित् तत् सदृशं फलम्।
सदसद् वा निदर्श्येत यदि तत् स्यान्निदर्शनम्॥३४८
उदयन्नेष सविता पद्मेष्वर्पयति श्रियम्।
विभावयितुमृद्धीनां फलं सुहृदनुग्रहम्॥ ३४९॥
याति चन्द्रांशुभिः स्पृष्टा ध्वान्तराजी पराभवम्।
सद्यो राजविरुद्धानां सूचयन्ती दुरन्तताम्॥३५०॥

निदर्शनम्।

सम्प्रति निदर्शनं लक्षयति अर्थान्तरेति। अर्थान्तरे कार्य्यान्तरे प्रवृत्तेन जनेन तस्य अर्थान्तरस्य सदृशं सत् उत्कृष्टम् असत् अपकृष्टं वा किञ्चित् फलं निदर्श्येत प्रदर्श्येत यत्, तन्निदर्शनमित्यर्थः। यदीत्यस्य यदित्यर्थः। निदर्शनेत्यपि पाठः। दर्पणकारस्तु सम्भवन्वस्तुसम्बन्धोऽसम्भवन् वापि कश्चन। उत विम्बानुविम्बत्वं दर्शयेत् सा निदर्शनेत्याह॥ ३४८॥

सत्फलनिदर्शनं दर्शयति उदयन्निति। एषः सविता सूर्य्यः उदयन् उद्गच्छन् उन्नति प्राप्नुवन्च ऋद्धीनां फलं सुहृदनुग्रहं विभावयितुं सत्याम् ऋद्धौ सुहृदामानुकूल्यं कार्य्यमिति ज्ञापयितुं पद्मेषु श्रियम् अर्पयति। अत्र पद्मेषु औदार्यप्रवृत्तेन उदयशालिना सूर्य्येण सुहृदुपकाररूपमुदयफलं किञ्चित् निदर्श्यते इति फलत्वात्र उत्कृष्टमेव॥ ३४९॥

असत्फलनिदर्शनं दर्शयति यातीति। चन्द्रस्य अंशुभिः स्पृष्टा ध्वान्तराजी राजविरुद्धानां सद्यः दुरन्तता दुःखजनकमवसानं सूचयन्ती प्रकटयन्ती सती पराभवं याति। अत्र

सहोक्तिः सहभावेन कथनं गुणकर्मणाम् ।
अर्थानां यो विनिमयः परिवृत्तिस्तु सा स्मृता॥३५१॥
सह दीर्घा मम श्यामैरिमाः सम्प्रति रात्रयः ।
पाण्डुरास्त्र समैवाद्यैः सह ताश्चन्द्रभूषणाः ॥३५२॥

[illegible] परिभूयमाना तमस्तति राजविरोधिनां परिणाम-[illegible] फल निदर्शयतीति ॥ ३५० ॥

सहोक्तिपरिवृत्त्यलङ्कारौ लक्षयति सहोक्तिरिति। गुण[illegible]णाम इति कर्मशब्देनात्र क्रियेति बोध्य, सहभावेन कथन [illegible]क्ति, गुणकर्मणामित्युपलक्षणं द्रव्यादीनामपि सहभावस्य [illegible]तादिति बोध्यम्। उक्तञ्च दर्पणकारेण यथा सहार्थस्य [illegible]तार्थ[illegible]यत्र व्यादानक्रमो। सा सहोक्तिरिति। सा च [illegible]विषयायत्ता चेत् तदेवालङ्कारत्वं तस्या, नान्यथा। तथाहि, [illegible]णेन मम राम कानन गहन ययावित्यत्र वैचित्र्या-भावात् नायमलङ्कार इति बोध्यम्। तुल्ययोगितायां यौगपद्य नास्ति, अत्र तु तथैत्यनयोर्भेद इति। अर्थानां वस्तूनां विनि-मय प्रतिदान सा परिवृत्ति स्मृता। सा त्रिधा क्वचित् समेन समस्य, क्वचिदधिकेन न्यूनस्य, क्वचित् न्यूनेन अधिकस्य इति। अत्रापि वैचित्र्यस्य आवश्यकत्व बोध्यम्। भोजदेवस्तु व्यत्य-यमपि परिवृत्तिमाह। यथा, व्यत्ययो वस्तुनोर्यस्तु, यो वा विनिमयो मिथ इति। व्यत्ययस्तु एकस्थानात् कस्यचिद [illegible]स्तुन अन्यत्र स्थापनम्। यथा, कुमुदवनमपि श्रीमट-[illegible]खण्डमित्यादि ॥ ३५१ ॥

गुणसहोक्ति दर्शयति सहेति। सम्प्रति विरहे इत्यर्थः [illegible] रात्रय मम श्यामै, सह दीर्घा, चन्द्रभूषणाः ताश्च रात्रयः

वर्द्धते सह पान्थानां मूर्च्छया चूतमञ्जरी।
पतन्ति च समं तेषामसुभिर्मलयानिलाः॥ ३५३॥
कोकिलालापसुभगाः सुगन्धिवनवायवः।
यान्ति सार्द्धं जनानन्दैर्हृद्यं सुरभिवासराः॥३५४॥

समेव अङ्गैः सह पाण्डुरा। विरहिण्या उक्तिरियम्। अत्र दीर्घत्व पाण्डुरत्वं गुणपदार्थौ एककालीनतया उक्तौ। न च आविर्भवति नारीणां वयः पर्य्यस्तशैशवम्। सहैव विविधैः पुंसामङ्गजोन्मादविभ्रमैरिति पूर्वोक्तकार्य्यसहजचित्रहेतूदाहरणेऽपि क्रिययोः सहभावोऽस्ति तदनयोरभेद एवेति वाच्य सहभावसाधारण्येऽपि कार्य्यकारणभावस्यैव चित्रनियामकत्वात् अत्र तु दीर्घश्वासदीर्घरात्रयोर्न कार्य्यकारणभाव इति बोध्यम्॥ ३५२।'

क्रियासहोक्तिं दर्शयति वर्द्धते इति। पान्थाना विरहिणामित्यर्थः मूर्च्छया सह चूतमञ्जरी वर्द्धते मलयानिलाश्च तेषाम् असुभि. प्राणै. सम पतन्ति च। असुभिरित्यत्र असुभिरिति च पाठ। अत्र वर्द्धनं पतनञ्च क्रिये सहभावेनोक्ते वैचित्र्यविशेषमावहत इति अत्रापि यदिच चूतमञ्जरीविकासमलयपवनपतनाभ्यामेव पान्थानां मूर्च्छा प्राणनाशश्च ध्वन्यते तथाप्यसौ न विवक्षित इति चित्रहेतुत्वशङ्काया अनवकाश:॥ ३५३॥

कोकिलेति। कोकिलानाम् आलापेन रवेण सुभगाः सुरम्याः, सुगन्धिनः वनवायवः येषु तादृशाः सुरभिवासराः वसन्तदिवसाः जनानामानन्दैः सार्द्धं हृद्यं यान्ति। सहशब्दप्रयोग एवायमलङ्कार इति भ्रमनिरासार्थमिदमुदाहरणम्।

[illegible]यो दत्ताः सहोक्तीरत्र काश्चन ।

सहोक्तिः ।

[illegible] परिवृत्तिस्तु किञ्चिद्रूपनिदर्शनम् ॥ ३५५ ॥

[illegible] ददता भुजेन तव भूभुजाम् ।

चि[illegible] हृतं तेषां यशः कुमुदपाण्डुरम् ॥३५६॥

परिवृत्तिः ।

[illegible] वस्तुन्याशंसनं यथा ।

[illegible]तत्त्वाद्मनसगोचरम् ॥ ३५७ ॥

[illegible] ।

[illegible] पक्षभावेन उक्तौ वैचित्र्यातिशय-[illegible] ॥ ३५४ ॥

[illegible] सहोक्तेः काश्चन उदाहृतयः [illegible] दर्शिता अनयैव रीत्या अन्यविधापि [illegible] इत्यर्थः । परिवृत्तिः किञ्चित् अल्पमात्र [illegible] क्रिया इत्यन्वयः ॥ ३५५ ॥

[illegible] । [illegible] ददता तव भुजेन तेषां [illegible] कुमुदपाण्डुरं यशः हृतमित्यन्वयः । अत्र [illegible] विनिमयः कृत इति । समेन [illegible] न्यूनस्य यत्रायमुदाहरणानि मृग्याणीति [illegible]

[illegible] निर्दिशति आशीरिति । अभिलषिते [illegible] प्राप्तीच्छाप्रकटनम् अथवा शुभप्रार्थनम्

अनन्वयससन्देहावुपमास्वेव दर्शितौ।
उपमारूपकञ्चापि रूपकेष्वेव दर्शितम् ॥ ३५८ ॥

आशीर्नाम अलङ्कारः। अयमलङ्कारो वैचित्र्यविशेषावहत्वाभावान्न बहुभिराहृतः, अपरे तु तादृशाशंसनेन वैचित्र्यमस्तीत्याहुः। उक्तञ्च, आशीरिति च केषाञ्चिदलङ्कारतया मता। सौहृद्यस्याविरोधोक्तौ प्रयोगोऽस्याश्च तादृश इति। कैश्चित्तु नाट्ये एवास्याश्चमत्कारित्वान् नाट्यालङ्कारतया गण्यते। यथा, आशीरास्कन्दकपटा क्षमा गर्वोद्यमाश्रया इति। उदाहृतञ्च। यथा, ययातेरिव शर्मिष्ठा पत्युर्बहुमता भव। पुत्रं त्वमपि सम्राजं सेव पूरुमवाप्नुहि इति। अन्ये तु प्रेयोऽलङ्कारस्य भेद एवायमित्याहुः। यद्येति उदाहरणार्धम्। अवाङ्मनसगोचरं परमं ज्योतिः परमात्मा इत्यर्थः यतो वाचो निवर्त्तन्ते अप्राप्य मनसा सहेति श्रवणात्, वः युष्मान् पातु रक्षतु ॥ ३५७ ॥

सम्प्रति उद्देशक्रमप्राप्तानलङ्कारान् निरूप्य प्राप्तावसरतया मतान्तरोक्तानां केषाञ्चित् अलङ्काराणां स्वोक्तेष्वन्तर्भावं दर्शयति अनन्वयेति। अनन्वयः उपमानोपमेयत्वमेकस्यैव त्वनन्वय इत्युक्तलक्षणः, तथा ससन्देहः सन्देहः प्रकृतेऽन्यस्य संशय' प्रतिभोत्थित इत्युक्तप्रकारः. उपमासु उपमाभेदेषु एव दर्शितौ तथाच, चन्द्रारविन्दयोः कान्तिमतिक्रम्य मुखं तव। आत्मनैवाभवत् तुल्यमित्यसाधारणोपमा इत्युक्तरूपायामसाधारणोपमायामनन्वयस्यान्तर्भावः। किं पद्ममन्तर्भ्रान्तालि किं ते लोलेक्षण मुखम्। मम दोलायते चित्तमितीयं संशयोपमा इत्युक्तायां संशयोपमायां ससन्देहस्य अन्तर्भावः।

उत्प्रेक्षाभेद एवासावुत्प्रेक्षावयवोऽपि च ।
नानालङ्कारसंसृष्टिः सङ्कीर्णन्तु निगद्यते ॥ ३५९॥

रूपमारूपकत्वापि यदुक्तं वामनेन यथा, उपमाजन्यं रूपक-मुपमारूपकमिति। उदाहृतञ्च तेनैव यथा, जयति चतुर्दंग-लाकपत्रिलोचनस्य इति। केचिदिह परम्परितरूपकमाहुः। अपरे तु उपमामर्पितं रूपकम् उपमारूपकं यदुक्तम्, उपमानेन तत्रोपमेयस्य रूपणम्। यदु वदन्त्युपमाभेदमुपमारूपक यति। यथोदाहरणं यथा दिवाकरकरस्पर्शादुदयाद्रे पयो-धरात्। नीलाम्बुकमिव प्राच्यां यो गलति मम्मति॥ अत्र नीलाम्बुकमिवेत्युपमया सहितमुदयाद्रेः पयोधरादिति रूपक-मारोपितं। रूपकेषु रूपकभेदेषु एव दर्शितम्। यथा, इष्टं मानसं सरोदर्शनाद् गौणमुख्ययो उपमाव्यतिरेकाख्य रूप-कमिति यथेति। तस्मादेतेषां न पृथगुक्तिरिति भाव ॥३५८॥

उत्प्रेक्षेति। अमी अन्येऽलङ्क इत्यर्थः उत्प्रेक्षावयव तस्मा-न्नानालङ्कारभेद अपि उत्प्रेक्षाया भेद विशेष एव। तल्लक्षण यथा विष्टनार्थेन सम्पृष्ट किञ्चिच्चोपमयान्वित.। रूपकार्थेन वा यत्र उत्प्रेक्षावयवो यथेति। अयञ्च श्लेषादिसम्बन्धोत्-प्रेक्षामात्रमतो नात्र प्रयास इति भाव। एव नव्यैः परिगृहीं-तानामन्येषाञ्च अलङ्काराणामनयव रीत्या उक्तालङ्कारभेदेष्वन्त-र्भाव चिन्तयितव्य इति।

अथ सङ्कीर्ण निरूपयति नानेति। नानालङ्काराणा बहू-नामलङ्काराणा सम्सृष्टि एकत्र समावेशः सङ्कीर्णं निगद्यते तत्तदलङ्कारविशेषवतया पृथक् निरूप्यते यथा, लौकिकाना हार-केयूरादीना प्रत्येकस्य यादृशी शोभा यादृशी च समष्टि,

अङ्गाङ्गिभावावस्थानं सर्वेषां समकक्षता।
तुल्यबलत्वरसंसृष्टेर्लक्षणीया त्रयी गतिः॥ ३६०॥
आक्षिपन्त्यरविन्दानि सुग्धे! तव मुखश्रियम्।
कोषदण्डसमग्राणां किमेषामस्ति दुष्करम्॥३६१॥
स्मितमेव तमोऽङ्गानि वर्षतीवाञ्जनं नभः।
असत्पुरुषसेवेव दृष्टिर्विफलतां गता॥ ३६२॥

सङ्कीर्णम्।

तथा काव्यालङ्काराणामपि पत्येकस्य यादृशं वैचित्र्यं सङ्कीर्णस्य तदपेक्षया समधिकमिति पृथग्व्यपदेश इति भावः॥ ३५८॥

सङ्कीर्णस्य भेदानाह अङ्गेति। क्वचित् अङ्गाङ्गिभावेन प्रधानगुणभावेन अवस्थानं, क्वचित् सर्वेषां समकक्षता तुल्यबलत्वम्। इति अलङ्कारसंसृष्टे सङ्कीर्णालङ्कारस्य त्रयी गतिः, त्रौ भेदौ लक्षणीया ज्ञातव्या इत्यर्थः। अपरे तु एकानुप्रवेशे सन्दिग्धत्वे अङ्गाङ्गिभावे च सङ्करसञ्ज्ञा समकक्षतायान्तु संसृष्टिरञ्ज्ञेत्याहुः॥ ३६०॥

अङ्गाङ्गिभावसङ्कीर्णमुदाहरति आक्षिपन्तीति। हे मुग्धे! अरविन्दानि तव मुखश्रियम् आक्षिपन्ति तिरस्कुर्वन्ति जिगीषन्तीत्यर्थः। तथाहि, कोषदण्डसमग्राणां कोषो धनसमूहः दण्डश्चतुर्थोपायो नालश्च ताभ्यां समग्राणां पूर्णानामित्यर्थः एषां दुष्करं किम्? अत्र श्लेषः अर्थान्तरन्यासस्याङ्गम् अर्थान्तरन्यासश्च पूर्वार्द्धस्थितायाः उपमायाः इत्यङ्गाङ्गिभावो बोध्यः॥ ३६१॥

समकक्षतायां सङ्कीर्णं निदर्शयति स्मितमेवेति। तमः

श्लेष. सर्वासु पुष्णाति प्रायो वक्रोक्तिषु श्रियम् ।
भिन्नं द्विधा स्वभावोक्तिर्वक्रोक्तिश्चेति वाङ्मयम्॥३६३
तद् भाविकमिति प्राहुः प्रबन्धविषयं गुणम् ।
भाव कवेरभिप्रायः काव्येष्वासिद्धि मस्थितः॥३६४
परम्परोपजीवित्वं सर्वेषां वस्तुपर्वणाम् ।
विशेषणानां व्यर्थानामक्रिया स्थानवर्णना ॥३६५॥

पुष्णाति विस्तारयति. नभ' अभ्रेन वर्षतीव, दृष्टि' अमृतपुरुषस्य सोऽयमेवेत्यभिलाषं गता। अत्र पूर्वार्द्धे उत्प्रेक्षाया' उत्तरार्द्धे तत्प्रमाणाया निरपेक्षतया परस्पर प्राधान्येनावस्थानात् सङ्कर इति नोक्तम् ॥ ३६२ ॥

अथास्य सङ्करस्य सङ्गावं दर्शयति श्लेष इति। श्लेष: सर्वासु वक्रोक्तिषु वचनभङ्गिरूपासु अलङ्कृतिषु श्रिय शोभा पुष्णाति। अत वाङ्मय काव्य स्वभावोक्तिर्वस्तुस्वभाववर्णनरूपा वक्रोक्तिश्च इति भेददयात् द्विधा भिन्न द्विविध स्वभावोक्तिमत् वक्रोक्तिमच्चेति ॥ ३६३ ॥

इदानीं सर्वालङ्कारसंग्राहक भाविक निरूपयति तदिति। प्रबन्धा महाकाव्यादय' तद्विषयं तद्गतं गुण चमत्कारजनकधर्मविशेष तत् प्रसिद्ध भाविक तदाख्यमलङ्कारं प्राहु:। तथाहि कवेरभिप्राय भाव' तस्मन्निष्ठतया भाविकमित्यर्थसङ्गति। स च भाव काव्येषु आसिद्धि समाप्तिपर्यन्त स्थित:। एतेनास्य केवल पदवाक्यगतत्व न, महावाक्यघटितप्रबन्धगतत्वमपीति दर्शितम् ॥ ३६४ ॥

कवेरभिप्रायस्य प्रबन्धगतत्वे उदाहरति परस्परेत्यादि।

व्यक्तिरुक्तिक्रमवशाद् गम्भीरस्यापि वस्तुनः।
भावायत्तमिदं सर्वमिति तद् भाविकं विदुः॥३६६॥
यच्च सन्ध्यङ्गवृत्त्यङ्गलक्षणाद्यागमान्तरे।
व्यावर्णितमिदश्चेष्टमलङ्कारतयैव नः॥ ३६७॥

भाविकम्।

सर्वेषां वस्तूनाम् आधिकारिकेतिवृत्तानां पर्वणां तदुपयोगिनां प्रासङ्गिकेति वृत्तानाञ्च। उक्तञ्च, नखकुट्टने, इदं पुनर्वस्तु दुर्धैर्द्विविधं परिकल्प्यते। आधिकारिकमेकं स्यात् प्रासङ्गिकमथापरमिति। परस्परोपकारित्वम् अस्तीति शेषः। यथा, रामायणे रामचरितम् आधिकारिकं सुग्रीवादिचरितं प्रासङ्गिकं तयोश्च अङ्गाङ्गिभावेन परस्परोपकारित्वम्। एवमन्यत्रापि साक्षात् परम्परया वा वेदितव्यम्। तथा व्यर्थानां प्रकृतानुपयोगिनां विशेषणानाम् अक्रिया अननुष्ठानम् अप्रयोग इत्यर्थः साभिप्रायविशेषणोपन्यास इत्यर्थः अयञ्च परिकर इति प्रकाशकारः यथा विशेषणैर्यत् साकूतैरुक्तिः परिकरो मत इति। तथा स्थानानां प्रकृतोपयोगिविषयाणां वर्णना। किञ्च, उक्तिक्रमवशात् वचनपरिपाट्या गम्भीरस्यापि वस्तुनः व्यक्तिः प्रस्फुटत्वं या हि नव्यैरलङ्कारभेदरूपेण निर्दिष्टेति भावः। तत् इदं सर्वं भावायत्तम् अभिप्रायाधीनमिति भाविकं विदुः। भाविकालङ्कार एव तेषामन्तर्भाव इति भावः॥ ३६५॥३६६॥

यच्चेति। किञ्चेति चार्थः। सन्धयः मुखादयः पञ्च, तदङ्गानि उपक्षेपादीनि चतुःषष्टिप्रकाराणि, वृत्तयः कौशिकीत्वादयश्चतस्रः, तदङ्गानि नर्मादीनि षोडश, लक्षणानि भूषणादीनि षट्त्रिंशत् प्रकाराणि आदिपदेन नाट्यालङ्कारादीनां

पन्था. स एष विहृतः परिमाणवत्त्या
सङ्गल विस्तरमनन्तमलङ्क्रियाणाम् ।
वाचामतीत्य विषय परिवर्त्तमानान्
एभ्याम एव विवरीतुमल विशेषान् ॥ ३६८ ॥


इति पाचार्य्यदण्डिन. कृतौ काव्यादर्शे
पर्यालङ्कारविभागो नाम
द्वितीयः परिच्छेदः ।

एवम् ते न आशीरादयस्तत्रस्थितम्, वीप्सङ्गानि उपात्यकानीनि तत्र दश, नाभ्याङ्गानि गंयादीनि दश । एतत् सर्वं यत् स समासोक्तौ गत्यन्तरे व्यावर्णित विशेषेण व्याख्यात तदिह न पुनरुक्तम् अलङ्कारतयैव इष्टम् अभिलषितम् अलङ्कारसमूह कथितमित्यर्थ तेषाञ्च यथायथमुक्तेष्वन्तर्भाव इति भाव ॥ ३६७ ॥

उपसंहरति पन्था इति । अलङ्क्रियाणा स्वभावोक्त्याद्यलङ्काराणाम् अनन्तम् अशेष विस्तार प्रपञ्च सङ्कल्प्य मनसि परिमाणवत्त्या परिमितत्वेन एष स: प्रसिद्ध पन्था मार्ग विहृत । अनेनैव पथा अनुसरणे अपरेऽपि ज्ञातव्या इत्याह वाचामिति । वाचा विषयम् अतीत्य परिवर्त्तमानान् वक्तुमशक्यानित्यर्थ तान् विशेषान् भेदान् विवरीतु प्रकाशयितुम् एभ्याम एव शक्त । पुन पुनरभ्यासेनैव अपरेऽपि वेदितव्या इति भाव ॥ ३६८ ॥

इति श्रीतर्कवागीशविद्यासागरभट्टाचार्य्यविरचितायां
काव्यादर्शटीकायां द्वितीय परिच्छेद ।

तृतीयः परिच्छेदः ।



अव्यपेतव्यपेतात्मा व्याहत्तिर्वर्णसंहतेः ।
यमकं तच्च पादानामादिमध्यान्तगोचरम् ॥ १ ॥
एकद्वित्रिचतुष्पाद्यमकानां विकल्पनाः ।
आदिमध्यान्तमध्यान्तसर्वगाद्यन्तसर्वतः ॥ २ ॥

सम्प्रति अर्थालङ्कारेषु निरूपितेषु प्रथमपरिच्छेदे सामान्यतो निरूपितेष्वपि शब्दालङ्कारेषु प्राप्तावसरतया तद्विशेषान् निरूपयिष्यन् प्रथमं यमकमनुवदति अव्यपेतेति। अव्यपेत अव्यवहितः व्यपेत. व्यवहितश्च आत्मा स्वरूप यस्यास्तथाभूता वर्णसंहतेः स्वरव्यञ्जनसङ्घातस्य व्याहत्ति विशेषेण पुनराहत्तिः यमकमित्यर्थ.। अस्य विशेषेषु पूर्वोक्तेष्वपि अव्यहितत्वव्यवहितत्वभेदेन पुनर्द्वैविध्यं पूर्वोच्चारितवर्णसङ्घस्य क्वचिदव्यवधानेन. क्वचिद् व्यवधानेन पुनराहत्तिरिति। तच्च पादानाम् आदिगतं मध्यगतम् ,अन्तगतञ्च। एतदुपलक्षणं पादगतमपि बोध्यम् उक्तञ्च वामनेन, पाद पादस्यादिमध्यान्तभागाः स्यानानीति। अत्रापि पाद इत्युपलक्षणं तेन पाद. पादखण्डाः पद्यार्द्धं समस्तपद्यञ्च यमकस्य स्यानानीति बोध्यम् ॥ १ ॥

क्रमेण तत्तद्भेदान् निर्दिशति एकेत्यादि। एकद्वित्रिचतुष्पाद्यमकानां विकल्पनाः प्रभेदाः पद्यस्य प्रतिपादं चत्वारश्चत्वारः भेदा इत्यर्थः ते च अनियमयमके एव वेदितव्या.।

[illegible]वस्त्वेषां भेदाः सम्भेदयोनयः ।
सुकरा दुष्करायैव दृश्यन्ते तेऽत्र केचन ॥ ३ ॥
मानेन मानेन सखि ! प्रणयोऽभूत् प्रिये जने ।
[illegible]हिता जागृहमाश्लिष्य तमेव कुरु सत्वपम् ॥ ४ ॥
मेचनादेन [illegible]मानां मदनो मदनोदिना ।

[illegible], अमिश्रितमादिभागयमकं प्रथमादिपादगतत्वात् चतु-
[illegible]। तथा मध्यादिभागयमकमपि । अयञ्च भेद अन्यपे-
[illegible] । सम्भेदः सम्मिश्रण योनिर्येषां तादृशाः
[illegible] तेषां यमकानां भेदा आदिमध्यान्तमध्यान्त-
[illegible] मिश्रितत्वेन गत्यन्तरत्व अतिविस्तर
[illegible], सम्भेदेन आदिमध्यान्तेषु मध्यान्तेषु मध्याद्येषु
[illegible] । ते च सुकरा सुसाध्या सुबोधाश्च,
[illegible] दुःसाध्या दुर्बोधाश्च कविभिरुद्गीर्णमिति शेष । अव
[illegible] उदाहियन्ते इत्यर्थ ॥ २ ॥ ३ ॥

[illegible] प्रथमपादान्तमव्यवहितमभिन्नमादिभागयमकं निर्दि-
[illegible] । प्रिये जने अनेन ईदृशेन मानेन प्रणय मा
[illegible] प्रियजन प्रति एतादृग मान मा कुरु इत्यर्थ ।
[illegible] प्रणयेति प्रियो यस्या अन्यसम्भोगचिह्नित । मा
[illegible] इति सखिना धीरोद्धतीकषायितेत्युक्तत्वात्तथापि त्वं कान्त-
[illegible] प्रियमेव सत्वप सलज्ज कुरु, अपकारिणि
[illegible] तस्य लज्जाकरत्वात् गुरुशासनमिति भाव ।
[illegible] खण्डिता प्रति तत्सख्या उक्तिरियम् । अत्र मा-
[illegible] इति अव्यवहितमादिपादमादिभागयमकम् ॥ ४ ॥
[illegible] दर्शयन् इदानं निदिशति मेचनादेनेति । मदनः काम.

नुन्नमानं मनः स्त्रीणां मह रत्या विगाहते ॥ ५ ॥
राजन्वत्यः प्रजा जाता भवन्तं प्राप्य सत्पतिम्।
चतुरं चतुरम्भोधिरसनेयं करग्रहे ॥ ६ ॥
अरण्यं कैश्चिदाक्रान्तं कैश्चित् मग्न दिवौकसाम्।
पदातिरथनागाश्वरहितैरहितैस्तव ॥ ७ ॥

रत्या कामपत्न्या अनुरागेण च मह पुंमाना मदनोदिना मद-मपनयता मेघनादेन मेघगर्जितेन नुन्न अपनीत मानो यस्मात् तथोक्त स्त्रीणा मनः विगाहते आलोडयति व्याकुल-यतीत्यर्थः. मेघगर्जनस्य उद्दीपकत्वात् वर्षासु प्रमदाना मन सानुराग सकामञ्च भवतीति भाव। अत्र मदनो मदनो इति द्वितीयपादगतमव्यवहितमादिभागयमकम् ॥ ५ ॥

तृतीयपादगतमुदाहरति राजन्वत्य इति। चतुरम्भोधि-रसनायाः चतुःसागरपरिच्छिन्नाया उर्व्या पृथिव्या करग्रहे स्वप्राप्याशयग्रहणे पाणिग्रहे च चतुरम् आसमुद्रकरग्राहिण-मित्यर्थः. भवन्त सत्पति प्राप्य प्रजा राजन्वत्यः जाताः, सुराष्ट्र देशे राजन्वान् स्यात् ततोऽन्यत्र राजवानित्यमरः। अत्र चतुर चतुरमिति तृतीयपादगतमव्यवहितमादिभागयमकम् ॥ ६ ॥

चतुर्थपादगत निर्दिशति अरण्यमिति। तव कैश्चित् अहितैः शत्रुभि पदातिरथनागाश्वरहितै चतुरङ्गबलविहीनै-रित्यर्थः. भग्नैः अरण्यम् आक्रान्त पलायितत्वादिति भावः. कैश्चित् तथाभूतैः. दिवौकसां मग्न सुरलोक आक्रान्त युद्ध-मरणादिति भावः. जितो वा प्राप्स्यसे स्वर्ग जित्वा वा भोक्ष्यसे महीमिति महाभारतीयगीताध्याये भगवदुक्ते। अत्र रहितै-रहितैरिति चतुर्थपादगतमव्यवहितमादिभागयमकम् ॥ ७ ॥

अम्भोजं मधुरम्भोजवदने ! वद नेत्रयोः ।
विभ्रमं भ्रमरभ्रान्त्या विडम्बयति किं नु ते ॥ ८ ॥
रणो वा रणोद्दामो हयो वा स्मर ! दुर्हरः ।
न यतो नयतोऽन्तं नस्तद्हो विक्रमस्तव ॥ ९ ॥
राजितैराजितैर्नाम जीयते त्वाद्दशैर्नृपैः ।

यत्र मधुरगोनीन् यमकभेदान् दर्शयन् तल्लक्षणं क्रमेण दर्शयति मधुरमिति । हे अम्भोजवदने । पद्ममुखि । मधुरमिति भ्रमरभ्रान्त्या भ्रमराविमौ इति भ्रमेण ते तव नेत्रयोः । विभ्रमं विडम्बयति अनुकरोति किम् ? वद कथय । अम्भोजं मधुरमिति अम्भोजे भ्रमरविलाससम्भवात् नु इति वितर्के । वद इत्यत्र गुरुमत्र गुरुमत्र । तस्मात्तव मुखपद्म नेत्रभ्रमरविलसित दृष्ट्वा निजमुखभूतमम्भोज भ्रमरविलासेन शोभयतीति तर्कयामीति भावः । केचित् तु अम्भोजवदने इति सम्बुद्ध्या पदमुक्त्वा तव वर्त्तमानयोर्नेत्रयोरिति योजयन्ति । न इत्यत्र नेति च पाठः तदा न विडम्बयति किम् अपितु विडम्बयत्येवेत्यर्थः । अत्र मधुर मधुरमिति वदने वदने इति च प्रथमद्वितीयपादगतमव्यवहितमादिभागयमकम् ॥ ८ ॥

रणो इति । हे स्मर । यतः यस्मात् तव रणोद्दामो युद्धदक्षः रणो वा दुर्हरः दुर्धर्षः हयः अश्वो वा न दुर्हर इति शेषः, तव तस्मात् युद्धोपकरणाभावादपीत्यर्थः नः अस्माकं विरहिणां हत्यर्थः अन्तं नाशं नयत प्रापयत तव विक्रमः अहो आश्चर्यभूत इत्यर्थः । अत्र प्रथमतृतीयपादगतमव्यवहितमादिभागयमकम् ॥ ९ ॥

राजितैरिति । त्वाद्दशैः राजितैः शोभितैः नृपैः आजि-

नीयते च पुनस्तृप्तिं वसुधा वसुधारया ॥ १० ॥
करोति सहकारस्य कलिकोत्कलिकोत्तरम्।
मन्मनो मन्मनोऽप्येष मत्तकोकिलनिस्वनः ॥ ११ ॥
कथं त्वदुपलम्भाशाविहतावि ह तादृशी।
अवस्था नालमारोढुमङ्गनामङ्गनाशिनी ॥ १२ ॥

तैक्ष्ण्येन युद्दुर्मदत्वेन वसुधा पृथिवी जायते, वसुधारया वसूना धनाना धारया धारावर्षणेन पुनस्तृप्तिं नीयते च। अत्र प्रथमचतुर्थपादगतमिश्रमव्यवहितमादिभागयमकम् ॥ १० ॥

करोतीति। सहकारस्य आम्रस्य कलिका तथा एष मन्मन', सुरते कर्णमूले तु निजदेशीयभाषया। दम्पत्योः कथन यत् तु मन्मनं त प्रचक्षते इत्युक्तरहस्यालापरूपः मत्तानां कोकिलाना निखनश्च मन्मन' मस मानसम् उत्कलिकोत्तरम् उत्कण्ठाकुलमित्यर्थः करोति। विरहिण उक्तिरियम्। आम्रकलिकायाः कोकिलालापस्य च अतीवोद्दीपकत्वातिति भावः। अत्र द्वितीयतृतीयपादगतं मिश्रमध्यरहितमादिभागयमकम्। अत्र उत्कलिकोत्कलिकेति तकारस्य मध्यपातित्वेऽपि स्वरशून्यत्वात् व्यवधानमध्ये अगणन सस्वरस्यैव व्यञ्जनस्य व्यवधायकत्वाभ्युपगमात् इति बोध्यम् ॥ ११ ॥

कथमिति। इह अस्मिन् प्रदेशे तव उपलम्भः प्राप्तिः तस्य आशा प्रत्याशा तस्या' विहतौ अभावे इत्यर्थः अङ्गनाशिनी शरीरनिकृन्तनी तादृशी अवस्था अङ्गनाम् अबलां माम् आरोढुम् आक्रमितु न अल न समर्था ? अपितु समर्था एव, त्वद्विरहे अह मृतप्राया जाताऽस्मीति तात्पर्यार्थः। अत्र द्वितीयचतुर्थपादगतं मिश्रमव्यवहितमादिभागयमकम् ॥ १२ ॥

निगृह्य नेत्रे कर्षन्ति बालपल्लवशोभिना ।
तरुणा तरुणान् कृष्टानलिनो नलिनोन्मुखाः॥१३॥
विगदा विगदामत्तसारसे सारसे जले ।
कुरुते कुरुतेनेयं हंसी मामन्तकामिषम् ॥ १४ ॥
विषमं विषमन्वेति मदनं मदनन्दनः ।
महेन्दुकलयापोढ़मलया मलयानिलः ॥ १५ ॥

निगृह्येति। नलिनेषु पद्मेषु उन्मुखा पतनाभिमुखा अलिन भ्रमरा बालपल्लवे नवपल्लवै. शोभते इति तथोक्तेन तरुणा तरुणेन कृष्टान् आकृष्टान् तद्दर्शनोत्सुकान् इत्यर्थ तरुणान् युवन नेत्रे निगृह्य कर्षन्ति निजदर्शनोत्सुकनयनान् कुर्वन्तीत्यर्थ । अत्र तृतीयचतुर्थपादगत मिथ्यमव्यवहितादि-भागयमकम् ॥ १३ ॥

विगदेति। विगता. आमत्ता सारसा: जलपक्षिविशेषा यस्मिन् तादृशे सारसे जले सरोवरजले इय विगदा शुभ्रवर्णा हसी राजहसीत्यर्थ कुरुतेन कुत्सितरवेण स्वस्य कुत्सितत्व-मुत्पादयन्त्येन विरहिणाममङ्गलात् इति भाव', मा विरहिण-मिति यावत् अन्तकस्य यमस्य अमिष भोग्यवस्तु कुरुते। अत्र प्रथमद्वितीयतृतीयपादगत मिथ्यमव्यवहितमादिभागयमकम् १४ ।

विषमेति। मलयानिल. अपोढमलया परित्यक्तमालि-न्यया विमल्यर्थादि भाव, इन्दुकलया सह मदनन्दन मा मदप्रीतिजनन इत्यर्थ. सन् विषमम् विषमं विषरूप मदन कामम् अन्वेति अनुगच्छति उद्दी

मानिनी सा निनीषुस्ते निषङ्गत्वमनङ्ग ! मे।
हारिणी हारिणी शर्म तनुतां तनुतां यतः ॥ १६ ॥
जयता त्वन्मुखेनास्मानकथं न कथं जितम्।
कमल कामलं कुर्वदलिसङ्गलि मत्प्रिये ! ॥ १७ ॥
रमणी रमणीया से पाटलापाटलांशुका।

पयतीत्यर्थः। अत्र प्रथमद्वितीयचतुर्थपादगतं मिश्रमव्यवहितमादिभागयमकम् ॥ १५ ॥

मानिनीति। हे अनङ्ग ! मा मा ते तव निषङ्गत्व तूणत्वम् अनवरतशरसम्पातेन तदाधारत्व निनीषुः प्रापयितुमिच्छुमती हारिणी हारालङ्कारशोभिनी हारिणी मनोहारिणी इयं मानिनी मानवती नारी तनुतां क्षीणताम् अस्या प्रत्याख्यानादिति भावः, यतः गच्छतः प्राप्नुवतः मे मम शर्म तनुता यद्येयं मानिनी मान विहाय मामाश्रयति तथानुग्रहः कार्य्य इति भावः। अत्र प्रथमद्वितीयचतुर्थपादगतं मिश्रमव्यवहितमादिभागयमकम् ॥ १६ ॥

जयतेति। हे मत्प्रिये ! मम प्रेयसि ! अस्मान् जयता वशीकुर्वता तव मुखेन कं जनम् अलकुर्वत् शोभयत् तथा अलिमन्ति भ्रमरयुक्तानि दलानि अस्य सन्तीति तथाभूतं कमलम् अकथं कथारहितं यथा तथा कथं न जितम् ? अपितु जितमेवेत्यर्थः, अस्माकं चेतनानामपि जयिना ते मुखेन अचेतनानि तादृशानि कथनानि जितानीति का कथेति भावः। अत्र द्वितीयतृतीयचतुर्थपादगतं मिश्रमव्यवहितमादिभागयमकम् ॥ १७ ॥

रमणीति। पाटलावत् तदाख्यतरुकुसुमवत् पाटलम्

वारुणीवारुणीभूतसौरभा सौरभास्पदम् ॥ १८ ॥
इति पादादियमकमव्यपेतं विकल्पितम् ।
व्यपेतस्यापि वर्ण्यन्ते विकल्पास्तस्य केचन ॥ १९ ॥
मधुरेणाहृतां मानं मधुरेण सुगन्धिना ।
मत्तकारोद्गमेनैव शब्दशेषं करिष्यति ॥ २० ॥
कारोऽतितान्त्री रामाणां तन्त्रीताड़नविभ्रमम्
कारोति सेर्ष्यं कान्ते च श्रवणोत्पलताड़नम् ॥२१॥

वारुणीवारुणीभूतसौरभा वारुणीभूता सौरी सूर्यसम्बन्धिनी भा दीप्तिर्यस्याः तादृशी सौरभास्पदं शोभनगन्धिर्भा रमणी वारुणीभूता सौरी सूर्यसम्बन्धिनी भा दीप्तिर्यस्याः तादृशी वारुणीव सुरेव मे मम रमणीया रतिप्रिया भवतीति शेषः । प्रथमद्वितीयचतुर्थपादगत मित्यमव्यवहितमादिभागयमकम् ॥ १८ ॥

इतीति । इति उक्तरूपेण पादादिगतम् अव्यपेतम् अव्यवहित यमक विकल्पित सप्रभेदम् उदाहृतम्, इदानीं तस्य पूर्वोक्तस्य व्यपेतस्य व्यवहितस्य केचन विकल्पा भेदाः वर्ण्यन्ते ॥ १९ ॥

मधुरेणेति । मधुवमन्त. मधुरेण मनोहरेण सुगन्धिना मत्तकारोद्गमेनैव आम्रमुकुलोद्गमेनैव एणदृशा हरिणाक्षीणा रामा रमणीकोपः शब्दशेषं मानेति शब्दमात्रावशिष्टं करिष्यति न लक्षयते रक्षिष्यतीति भावः । अत्र प्रथमद्वितीयपादगत व्यवहित मित्यमादिभागयमकम् ॥ २० ॥

कार इति । रामाणा रमणीनाम् अतितान्त्र अतिरक्तः कार वीणावादनविभ्रम वीणावादनविलास तथा कान्ते सेर्ष्यं

सकलापोल्लसनया कलापिन्यानु नृत्यते।
मेघाली नर्त्तिता वातैः सकलापो विमुञ्चति॥२२॥
स्वयमेव गलन्मानकलि कामिनि! ते मनः।
वर्षास्विह नीपस्य दृष्ट्वा कां न स्पृशेद्दशाम्॥२३॥
आरुह्याक्रीड़शैलस्य चन्द्रकान्तस्थलीमिमाम्।
नृत्यत्येष चलच्चारुचन्द्रकान्तः शिखावलः॥२४॥

सप्रणयकोप यथा तथा श्रवणोत्पलताडन कर्णोत्पलाभ्या प्रहार करोति। अत्र प्रथमतृतीयपादगत व्यवहित मिश्र-मादिभागयमकम्॥ २१॥

सकलेति। वातैः नर्त्तिता सकला मेघाली घनश्रेणी सप कलानि विमुञ्चति वर्षति. ननु पश्चात् अनन्तरमेव कलापस्य पिच्छस्य उल्लसनेन वर्त्तमानया कलापिन्या मयूर्या नृत्यते। वर्षादर्शनमिदम्। अत्र प्रथमचतुर्थपादगत मिश्र व्यवहित-मादिभागयमकम्॥ २२॥

स्वयमिति। हे कामिनि! स्वयमेव कान्तानुनय विनैव गलन् मानरूप कलि कलह यस्मात् तादृश तव मन इह वर्षासु इत्यर्थ नीपस्य कलिका कोरक दृष्ट्वा का दशाम् अवस्था न स्पृशेत्। अपितु सर्वामेवेत्यर्थ। वर्षासु अति-कोमल मन. विरहे कथ सान्त्वयिष्यतीति भाव। अत्र द्वितीय-तृतीयपादगत मिश्र व्यवहितमादिभागयमकम्॥ २३॥

आरुह्येति। आक्रीडशैलस्य क्रीडापर्वतस्य इमा चन्द्रकान्त-मणिविशेषनिर्मितां स्थलीं स्थानम् आरुह्य एष शिखावलः मयूरः चलत् चारु मनोज्ञं यत् चन्द्रकं नेत्रक तेन अन्तः

...
...न गजादुर्वीं त्रिगतेऽद्य भुजेन ते ।
...मी वराहेणेव परिस्थिता ॥ २५ ॥
...ते रणेष्वजकरेण द्विषतां हताः ।
...रक्ता भान्ति सन्ध्यावना इव ॥ २६ ॥
...राजीव वातैर्ध्वस्ता भटैरमूः ।
...रिव सापि परागततमम्बरम् ॥ २७ ॥

...ण्य प्रसादार्थं मन्त्रयति । अत्र द्वितीयचतुर्थपादगतं
...मादिभागयमकम् ॥ २४ ॥
...यति । हे राजन्, या अमी उर्वीं वराहेण शूकर-
...या भगवता उद्धृता मतौ वराहे श्रेष्ठनागश्च वासुके
...स्थिता, अद्य ते तव भुजेन सा उर्वी राजकात् राज-
...पालात् हेतोः त्रियते । अत्र द्वितीयचतुर्थपादगत मित्य
...मादिभागयमकम् ॥ २५ ॥
...तीति । हे राजन्, रणेषु द्विषताम् अन्तकरेण विना-
...ते तव करेण हस्तेन हता, अतएव रक्तरक्ता रक्तस्रा-
...करेणव गजेन्द्रा करेणुभिर्यां स्त्री नेभे इत्यमरः
...ना इव सन्ध्याकालीनमेघा इव भान्ति । अत्र प्रथम
...तीयचतुर्थपादगत मित्य व्यवहितमादिभागयमकम् ॥ २
...तीति । हे राजन्, वातैः ध्वस्ताः पाटिताः अ
...स्य तरुराजीव वृक्षश्रेणीव परा शत्रुपत्नीया चमू
...ते तव भटैर्निकेन ध्वस्ता नाशिता, अतश्च परागैः पलाय...
...शत्रुभटनिकाना पदरेणुभिः ततं व्याप्तम् अम्बरमाकाशं
...परागतमिव पलायितमिव धूलिभिरम्बरतलस्याद्दश्य-

पातु वो भगवान् विष्णुः सदा नन्दनद्युतिः ।
स दानवबलक्षुब्धसुरसन्दोहहारिहा ॥ २८ ॥
कमले, तव किं ब्रूमो कमलैर्व्याकरं मुखम् ।
कमलैरेव करोषि त्वं कमलेवोन्मदिष्णु यत् ॥ २९ ॥
मुदा रमन्ते सर्वोर्वीमनुयान्तीभृतस्ततः ।
सदस्यलुब्धाः कर्तुं ते सदस्यवता क्षमाः ॥ ३० ॥

त्वादिति भावः । अत्र प्रथमतृतीयचतुर्थपादगत मित्र व्यवहितमादिभागयमकम् । २७ ।

पातेति । सदानं सन्दं च वरदन्तौ यस्यैतादृशौ इवन्यादीडाद्यं न इन्दन् इति तथोक्तं स प्रसिद्ध दानवकुलक्षुब्धसुरसमूहहारी नन्दनद्युतिः भगवान् विष्णुः व युष्मान् सदा पातु । अत्र द्वितीयतृतीयचतुर्थपादगत मित्र व्यवहितमादिभागयमकम् । २८ ।

कमलेति । हे प्रिये ! ते तव कं शिरः अलं भवतस्य समाः कथं यत्र तादृशः, तथा मुखं कमलैर्व्याकरं कमलस्य इयत्करम् अतस्त्वं कमलैव लक्ष्मीरिव कं जलं उन्मदिष्णु उन्मत्तेषु मध्ये अलीकम् असत्यं करोषि : किंतु सर्वानेव उन्मादयसीत्यर्थः । अत्र सर्वपादगत मित्र व्यवहितमादिभागयमकम् । २९ ।

मुदेति । उदारा मनोज्ञा रत्नानि भूषणं यासां ताः, मदेन भवतस्य घूर्णन्त्य इयो यासां तथोक्ताः, तथा अदभ्रं विशालं जघनं यासां तथाभूताः प्रमदाः मुदा रमणं प्रियं अन्वीयुः अनुगतवत्यः अधीनमित्यर्थः कर्तुं क्षमाः अलं । अत्र प्रथम-

दक्षिणेऽन्यपुष्टानामाकूतैर्मे हृतं मनः ।
[illegible] ते दृति ! माकूतैरपि दक्षिणैः ॥ ३१ ॥
[illegible] यूनां तनुमध्यामते स्त्रियः ।
[illegible] मृगाजितमुखेन्दवः ॥ ३२ ॥
[illegible] यपक्रमभेदोऽप्येष दर्शितः ।
[illegible] र्शितात्मा विकल्पोऽप्यस्ति तद्यथा ॥ ३३ ॥

[illegible] मिश्र व्यवहितमादिभागयमकम् ॥ ३१ ॥

[illegible] दृति । ते दृति । अन्यपुष्टानां कोकिलानाम् [illegible] ते तव उदितैः कथितैः प्रियालापैः, तथा दक्षिणैः माकूतैरपि मे मम मनः [illegible] । अत्र प्रथमचतुर्थयोर्द्वितीयचतुर्थयोश्च मिश्रं व्यवहितमादिभागयमकम् ॥ ३१ ॥

[illegible] । तनु क्षीण मध्य यासां ताः, चरद्भिः गलद्भिः [illegible] मृगीभिता मुखेन्दवः मुखचन्द्रा यासां [illegible] , तथा मृग्या मद्यपानेन जिता क्रीलज्जा यासां तथा- [illegible] , स्त्रियः कामिन्यः यूना तरुणानां तनुं शरीरम् अध्या- [illegible] अत्र प्रथमचतुर्थयोर्द्वितीयतृतीययोश्च मिश्रं व्यवहित- मादिभागयमकम् ॥ ३२ ॥

[illegible] दृति उक्तप्रकारेण एषः व्यपेतानां व्यवहितानां [illegible] प्रभेदः दर्शितः उदाहृतः । अव्यपेतः अव्यवहितः [illegible] व्यवहितस्य आत्मा एषः तादृशः उभयमिश्र इत्यर्थः [illegible] प्रभेदः अपि अस्ति, तत् यथेति उदाहरणार्थम् ॥ ३३ ॥

मालं सालंवकलिकासालं सालं न वीक्षितुम्।
नालीनालीनवकुलानाली नालीकिनीरपि ॥३४॥
कालं कालमनालक्ष्यतारतारकमीक्षितुम्।
तारतारस्वरसितं कालं कालमहाघनम् ॥ ३५ ॥
याम यामत्रयाधीनायामया मरणं निशा।

सेति। सा मम आली सखी सालम्बा लम्बमाना या कलिका कोरकः तया सलति शोभते इति तथोक्तं, मालं हृद्यभेदं वीक्षितुं द्रष्टुं न अल न शक्ता, उपमेयकत्वादिति भावः, आलीनवकुलान् वकुलासक्तान् अलीन् भ्रमरान् अपि वीक्षितुं न अल, तथा अलीक विद्यते यासां ताहशीः मिथ्यावचनेन प्रियस्ते आगमिष्यत्यचिरेणेत्यादिना सान्त्वयन्तीरपि सखीरिति शेषः वीक्षितुं न अलम्। विदेशस्थ नायकं प्रति नायिकाप्रेरिताया दूत्या उक्तिरियम्। अत्र सर्वेषु पदेषु मिश्रमव्यवहितमादिभागयमक पर प्रथमद्वितीययोस्तथा तृतीयचतुर्थयोः व्यवहितमपीति अव्यपेतव्यपेतत्व बोध्यम् ॥ ३४ ॥

कालमिति। का विरहिणीति शेषः अनालक्ष्या मेघाच्छन्नत्वाददृश्याः तारा महत्यः समुज्ज्वला इत्यर्थः तारका नक्षत्राणि यत्र तथोक्तं तारतया अत्युज्ज्वलेन रम्याणि रसितानि मेघगर्जितानि यस्मिन् ताहशं तथा कालाः कृष्णवर्णा महान्तः घना मेघा यस्मिन् तथाभूतं कालं विरहिणा प्राणनाशकत्वात् यमस्वरूप कालं वर्षाकालम् ईक्षितुं द्रष्टुम् अलं समर्था न कापीत्यर्थः। अत्र सर्वेषु पादेषु मिश्र व्यवहित तथा प्रथमचतुर्थयोर्द्वितीयतृतीययोश्च व्यवहितमादिभागयमकम् ॥ २५ ॥

यामेति। यामत्रयस्य प्रहरत्रितयस्य अधीनः आयामो

तामगाम चियाऽस्वर्त्या या मया मथितेव मा ॥३६॥
[illegible] पादादियमकविकल्पस्येदृशी गतिः ।
एतमेव विकल्पानि यमकानीतराण्यपि ॥ ३७॥
न ग्रन्थभयाद् भेदाः कार्त्स्न्येनाख्यातुमीहिताः ।
दुष्करत्वाभिमता ये तु वर्ण्यन्ते तेऽत्र केचन ॥३८॥
[illegible]रावती । यतेन्द्रियो न क्षीयते यतेर्भवान् ।

[illegible]पया तापस्या चियामा रजनीं प्राक्तुल्यकाव्यन्तचतुष्टय-
[illegible]नात निशा रजन्या मरणं गाम गत्वा प्राप्नुवाम वय-
[illegible] यत्र निशाया मालिगयोद्दीपकत्वाद्विरहस्येति भाव-
[illegible] या मनसा या कान्तान्त गयाम अगच्छाम यस्या-
[illegible]तमयापगाम इलत्यं सा अस्वर्त्या या अस्वर्त्ति
[illegible] गाया प्राप्नोतीति तथाभूता सती आङ्पूर्वकात्
[illegible] क्विप् रूपम्। मया मथितेव नाग्नितेव, मम तु
[illegible], किन्तु सा तपस्विनो महियोगेन म्रियत एवेति
[illegible] विरहिण व्यवस्थानुभवेन विलापोक्तिरियम्। अत्र
[illegible] म्रियमव्यवहित व्यवहितत्वादिभागयमकम् ॥३६॥

[illegible]ति। पादादियमकाना विकल्पस्य भेदस्य इति
[illegible] इदृशी पूर्वस्मकारा गति नियम। इतराणि अपि
[illegible] एव विकल्पानि भेदानि ॥ ३७ ॥

[illegible]। ग्रन्थभयात् विस्तारभयात् कार्त्स्न्येन साकल्येन
[illegible] आख्यातुं न ईहिता न चेष्टिता, ये तु भेदा दुष्करत्वेन
[illegible]भिमता ख्याता, अत्र ते केचन वर्ण्यन्ते उदाह्रियन्ते ॥३८॥
[illegible]त्यत्र इति। स्थिरा आयतिरुत्तरकालो यस्य तत्सम्बुद्धौ

अमायतेयतेऽप्यभूत् सुखाय तेऽयते क्षयम् ॥३९॥

सभासु राजन्नसुराहतैर्मुखैः
महीसुराणां वसुराजितैः स्तुताः ।
न भासुराः यान्ति सुरान् नते गुणाः
प्रजासु रागात्मसु राशितां गताः ॥ ४० ॥

तव प्रियाऽसच्चरित ! प्रसक्त ! या
विभूषणं धार्य्यसिहांशुमत् तया ।

उत्तरः काल आयतिरित्यमरः । हे स्थिरायते ! निश्चलचित्त ! इत्यर्थः भवान् यतेन्द्रियः जितेन्द्रियः अतः यतेः सयमात् न क्षीयते क्षतो भवति, ते तव अमायता अमायित्व मायाराहित्यमित्यर्थः इयते एतत्परिमाणाय क्षय नाशम् अयते अगच्छते अक्षयाय इत्यर्थः सुखाय अपि अभूत् । अत्र सर्वेषु पादेषु मिश्रमव्यवहित व्यवहितञ्च मध्यभागयमकम् ॥ ३९ ॥

सभास्विति । हे राजन् ! महीसुराणा भूदेवाना ब्राह्मणानाम् असुराहतैः सुरापानेन अहतैः अनाशितैः पवित्रैरिति यावत् वसुना तेजसा भवदुक्तधनलाभेन वा राजितैः शोभितैः प्रफुल्लैर्वा मुखैः सभासु स्तुता कीर्त्तिता भासुराः समुज्ज्वलाः तथा रागात्मसु अनुरागपरासु प्रजासु राशितां बहुलीभावं गताः ते तव गुणाः सुरान् देवान् न यान्ति न प्राप्नुवन्ति, सुरा अपि एतादृग्गुणवन्तो न सन्तीति भाव । अत्र सर्वेषु पादेषु मिश्रं व्यपेतञ्च मध्यभागयमकम् ॥ ४० ॥

तवेति । हे असच्चरित ! धूर्त्त ! हे प्रसक्त ! अनवहित ! या तव प्रिया, त्वया प्रेमास्पदत्वेन कीर्त्यमाना इत्यर्थः तया

...तोत्पानन्दविशेषमत्तया
...योजनं नास्ति हि कान्तिमत्तया ॥ ४१ ॥
भवाट्टगा नाथ ! न जानते नते
...नं विभो ते खलु सन्नतेनते ।
... ... दीना शिरसा नतेन ते
...त्तान दैन्यरमेन तेन ते ॥ ४२ ॥

... ...तोत्पानन्दविशेष तेन मत्तया मत्या अगमत्
... ... विभूषण पार्श्व, तथाच विभूषणधारणस्य रतो-
... ... प्रयोजनं न तु शोभार्थमिति भाव. । ननु
... ... विभूषणधारणमस्तु इत्यत आह प्रयोजनमिति ।
... ... कान्तिमत्तया हेतुना प्रयोजन विभू-
... ... नास्ति हि न विद्यते एवेत्यर्थ । अन्या-
... ...मलङ्कारधारणे कथमस्या विराग इति पृच्छन्त
... ...विशेष । अत्र सर्वेषु पादेषु मिश्र व्यवहित-
... ...लम् ॥ ४१ ॥

... ...ति । हे नाथ प्रभो । भवाट्टगा जना नते
... ...रसमस्याद न जानते न विदन्ति, यत सन्नतता
... ...प्रभुना च ते सन्नतेनते नतिः प्रभुना चेत्यर्थः विरुद्धे
... ...रे वर्तते इति भाव, ये जनाः दीना एव दरिद्रा
... ..., ते तेन दैन्यरमेन दैन्यरूपेण विधेन हेतुना नतेन
... ... अनम् अत्यर्थं चरन्ति अतिशयेन त्वा सेवन्ते
... ... कर्मणि षष्ठी । अत्र सर्वेषु पादेषु मिश्रमव्यव-
... ... अन्त्यागमकम् ॥ ४२ ॥

लीलास्मितेन शुचिना मृदुनोदितेन
व्यालोकितेन लघुना गुरुणा गतेन ।
व्याकृञ्चितेन जघनेन च दर्शितेन
मा हन्ति तेन मनसिजं मम जीवितेन ॥ ६३ ॥

[illegible]

[illegible] ६४ ॥

[illegible] लीलास्मितेन शुचिना मृदुनोदितेन [illegible] व्यालोकितेन लघुना गुरुणा गतेन, व्याकृञ्चितेन जघनेन च दर्शितेन मनसिजं मा हन्ति मम जीवितेन। [illegible] ६३।

[illegible] ६४।

मारयन्तामुरमा रमयन्ती
मारभूतमुरुमारधरा तम् ।
मारमानुकृतमारमकाञ्ची
मा रमागनमारमवैति ॥ ४५ ॥
नयानगालोचनयानयानया-
नयानगाम्यान् विनयानयायते ! ।
न यानगामीर्जिनयानयानया-
नयानगांस्तान् जनयानयाश्रितान् ॥ ४६ ॥

[illegible] परमरामित्यर्थं नाम यस्य तथाभूत तथा अप्रतिमान [illegible] मानो यस्य तादृग सर्वाभिमतमित्यर्थं । आत्मान परमात्मानमित्यर्थं आनमत नमस्कुरुत । अत्र सर्वेषु पादेषु [illegible] व्यवहितत्व मित्थ मध्यान्तयमकम् ॥ ४४ ॥

मारेति । उरुमारणि स्वर्णभूषणानि धरतीति तथोक्ता, उरुमा [illegible] मुरणं स्यादिति व्याडि । तथा मारसै: पक्षिविशेषै- रनुकृता मारमा मनोज्ञा काञ्ची यस्यास्तथाभूता, मा रमणी [illegible] त्यन्तम् आश्रियन्त मारभूत जगत्सु सारत्वेन गणित त [illegible] उरमा वक्षःस्थलेन रमयन्ती प्रत्यालिङ्गनेन सुखयन्ती मार रमायनम् अमृतम् अमारम् अवैति, प्रियालिङ्गनसुखा- दधिक नृच्छमवगच्छतीत्यर्थ । अत्र सर्वेषु पादेषु मित्थं व्यव- हितत्व द्वितीयमकम् ॥ ४५ ॥

नयेति । हे अनयायते । अनया अपायरहिता आयति- र्यस्य तत्सम्बोधनम् । हे प्रभो । अनया नयानयालोचनया

रवेण भौमो ध्वजवर्त्तिवीरवे-
रवेजि रटत्यतुलास्त्रगौरवे ।
रवेरिवोग्रस्य पुरो हरेरवे-
रवेत तुल्यं रिपुमस्य भैरवे ॥ ४७ ॥

नयः नीतिः, अनय दुर्नीतिः तयोरालोचना तया सदसद्विवेकेनेत्यर्थः अनयात् नयरहितान् अयस्य शुभावहविधेरानये आनयने अनुष्ठाने एतान् जनान् विनय विनीतान् कुरु, भवनीतिमार्गानुसारिणस्तान् विधेहि । किञ्च जिनयान जैनमार्गं यान्तीति तथोक्तान् बौद्धमतावलम्बिन अयानम् अमार्गम् अपन्थानमित्यर्थं यान्तीति तादृशान् अपथगामिन अत एव अनयान्वितान् दुर्नयानुसारिण यान् जनान् अयामी गतवानसि यैः सह हतवानसि तान् अ विष्णु यान्तीति तथाभूतान् वैष्णवधर्मावलम्बिन जनय कुरु । इति समुदायार्थः । अत्र प्रथमतृतीययोरव्यवहितमाद्यन्तयमकं मित्र द्वितीयचतुर्थयोरव्यवहित मित्रमादिमध्ययमकञ्च । ४६ ।

रवेरिति । भौम भूमिसुत. नरकासुर ध्वजवर्त्तिन श्रीकृष्णरथध्वजस्थितस्य वीरस्य वीर्यशालिन वै. पक्षिण गरुडस्य रवेण नादेन अतुलम् अनुपमम् अस्याग्र गौरव यस्मिन् तादृशे भैरवे भयङ्करे स्यति सग्रामे रवेजि उद्वेजित त्रासित इत्यर्थः । तथाहि रवे सूर्यस्येव उग्रस्य अस्य हरेः श्रीकृष्णस्य मित्रस्य च पुर अग्रे रिपु नरकम् अवैर्मेषस्य तुल्यम् अवेत जानीत । श्रीकृष्णस्य नरकासुरेण युद्धवर्णनमिदम् । अत्र सर्वेषु पादेषु मित्रं व्यवहितमाद्यन्तयमकम् । ४७ ।

मयामयालम्बकलामयामया-
मयामयातल्पविरामया मया ।
मयामयार्त्तिं निशयामयामया-
मयामयामूं करुणामयामया ॥ ४८ ॥

मयेति । पदविभाग । मयामयालम्बकलामया-मयाम । मयाम्, मयातल्पविरामया मया । मया, अमयार्त्तिं विशया, शमया, शमया । अमय, आमय, अमू, करुणामय, मामया । हे अमय । नास्ति माया यस्य तत्सम्बुद्धौ, हे अकरुण । इत्यर्थ आकारलोपो महाकविप्रयोगादविरुद्ध । हे करुणामय । मयो । आम रोग कामपीडां याति प्राप्नोतीति मामया तेन मामया धातोराम्लुक् प्रसाद्यचीति आकारलोप । कामार्तेन इत्यर्थ मया मह मय अपचय अमय उपचय, ताभ्याम अपचयोपचयाभ्याम् आलम्बय: आश्रयणीय, हृद्धि-मयगोलत्वात् इति भाव, य, कलामयश्चन्द्र तस्मात् आमय रोग कामपीडा यस्या ताट्टगीं चन्द्रस्य कामोद्दीपकत्वादिति भाव, अमू रमणीम् आमय योजय । यते अहम् अयातव्य, विरामोद्यमान येषा ताट्टगा यामा: प्रहरा यस्यास्ताट्टश्या दीर्घयामया इत्यर्थ, नास्ति मा परिमाण यस्यास्तथाभूतया सुदीर्घया इत्यर्थ, तथा अमया नास्ति मा शोभा यस्या: तथोक्तया अतिकुत्सितया विरहिणामिति भाव: निशया रात्र्या हेतुना अमयेन अप्राप्या तस्या इति भाव, अर्त्तिं पीडा तदप्राप्या मातिशया पीडामित्यर्थ, अयाम् अप्राप्नवम् । इति समुदायार्थ । मल्लाय प्रत्युक्तिरियम्, अत्र सर्वेषु पादेषु अयकारश्रुति मियप्राद्यन्तयमकम् ॥ ४८ ॥

मतान्धुनानारमतामकामता-
मतापलब्धाग्रिमतानुलोमता।
मताव्यलुत्तमता विलोमता-
मतान्यतस्ते समता न वामता॥ ४८॥

कालकालगलकालकालसुखकालकाल!
कालकालघनकालकालपनकाल! काल!।

मतामिति। पदविभागश्चैष। मतां धुनाना, आरमताम् अकामताम्। अतापलब्धा, अग्रिमानुलोमता। मतौ अयतौ, उत्तमताविलोमताम्। अतान्यत ते समता न, वामता। हे साधो! अतान्यत अश्लिष्टकर्मणस्ते तव मतौ आरमता विषयव्याहृत्तानां योगिना मतां सम्मताम् अकामता निस्पृहतां धुनाना कम्पयन्ती तिरस्कुर्वतीत्यर्थः अतापेन अक्लेशेन लब्धा प्राप्ता स्वाभाविकीत्यर्थः अग्रिमताया श्रेष्ठताया अनुलोमता आनुकूल्यं मया तादृशी श्रेष्ठत्वसम्पादिनी तथा उत्तमताया गुरुवत्तायाः विलोमता प्रतिकूलताम् अयतौ अगच्छन्ती गुरुवत्त्वसमानाधिकरणा समता अपक्षपातित्वं सर्वत्र समदर्शित्वमित्यर्थः विदते, वामता प्रतिकूलता नेत्यर्थः। क्वचित् साधोर्गुरुत्वकीर्त्तनमिदम्। अत्र सर्वेषु पादेषु व्यवहितमादिमध्यान्तयमकम्॥ ४८।

कालेति। पदच्छेदस्वयम्। प्रथमपादे एक पदम्। कालकालघनकालकालपनकालः, कालः। कालकालगलितकालकः, गलनिकः, गलकालकालकः, आगलतुः, कालकालः, कलिकालकालः। हे कालकालगलकालकालसुखकालकाल! कालः

कालकालमितकालकालकालिकाकालकाल

कालकालमतु कालकाल कृ ह कालकाल ॥५०॥

[illegible] कालका मोरका मयूरा इत्यर्थे के शब्दे इत्यस्य क्विपि [illegible] तथा कालकालघनकालकालमुखा तेषा [illegible] कालकालघनकालकालमुखानि तानि कलन्ते शब्दायन्ते इति तत्सम्बुद्धौ, तथा हे कालकाल। कालस्य यमस्य काल संहारकः तत्सम्बुद्धौ, यमभयनिवर्तक इत्यर्थः। किञ्च, हे कलिकालकाल! कलिकालस्य काल कल्किरूपेण दण्डयिता तत्सम्बुद्धौ, हे काल! हे कृष्ण। कालकालमितकालका कालकेन कृष्णवर्णेन आलमित शोभित क शिव. यै, ताट्टशा. अलकाः मूर्धकुन्तला यस्यास्ताट्टशी, अलकालकालका अलकान् चूर्णकुन्तलान अलते मुक्तादिभिर्भूषयतीति अलकाली अलङ् भूषणार्थमित्यस्य धातो रूपम्। तथा कलमेव काल मधुर यथा तथा कायतीति कालका मधुरभाषिणीत्यर्थ ततश्च अलकाली चासौ कालका चेति कर्मधारयः, ललनिका ललना राधा तत्सं आगलन् तव अनुकम्पनीया भवतु इति निर्गलितोऽर्थः। अत्र प्रति राधाया. मध्युक्तिरियम्। अत्र सर्वेषु पादेषु अक्षरसंदृब्धम् आदिमध्यान्तयमकम् ॥ ५० ॥

सन्दष्टयमकस्थानमन्तादौ पादयोर्द्वयोः ।
उत्तान्तर्गतसदृशं स्वातन्त्र्यात् कीर्त्यते ॥५१॥

उपोढ़रागाप्यबला मदेन सा
मदेनसा सन्युरसेन योजिता ।
न योजिताऽत्मानमनङ्गतापिता-
ङ्गतापि तापाय समास सेयते ॥ ५२ ॥

समप्रति सन्दष्टयमकस्थान निर्दिशति सन्दष्टेति । सन्दष्ट-यमक सन्दशाहति यमक इयो पादयो अन्तादौ प्रथम-पादस्य अन्त द्वितीयपादस्य आदि तथा द्वतीयपादस्य अन्त चतुर्थपादस्यादिश्च आक्रम्य स्थितमिति शेष । एतत् उक्तेषु यमकेषु अन्तर्गतमपि सदृश भीम इत्यादौ पतितमपीत्यर्थ. स्वातन्त्र्येण पृथग्भावेन कीर्त्यते विशेषादिति भाव । ५१ ।

उपोढेति । सा अबला मदेन यौवनजनितविकारेण उपोढ. उद्रिक्त राग अनुरागो यस्यास्तादृशी सन्युरागिणी अपिमदेनसा समापराधेन हेतुना सन्युरसेन क्रोधावेशेन योजिता क्रोधपरवशा अत एव योजित अभिनिवेशित न्यस्त मन यस्या तथाभूतान् अनङ्गतापितान् अनङ्ग कामम् अङ्ग-तापयतीति अनङ्गतापिनी तस्या भाव ता गतापि सती मम इयते एतादृशाय ताप न आस. न बभूव. न अपितु बभूव एवेत्यर्थ । सखाय प्रति कस्यचित् मानिन्या प्रत्याख्यातस्य उक्तिरियम्। अत्र पूर्वार्द्धे मदेन सा मदेनसा इति उत्तरार्द्धे च इतापिता इतापितेति सन्दष्टयमकम् ।५२।

पादाभ्याम. समुद्गः स्याद्य भेदास्त्रयो म
पादाभ्यामेवनिर्जात्मा व्यज्यते म निदर्शने ॥५०॥

नार्या मत्वा वर्ज्य. परमायतमालया । ति इति
नार्या न तया वर्ज्यः परमायतमालया ॥ नुगः
तया

अत्र पादाभ्यामसमर्थानि दर्शयित्वा समर्थानि दर्शयितुमाह पादाभ्यामिति । यस्य पाद
द्वयस्य सभावः पुनर्भावः समुद्ग स्यात् समुद्गशब्दश्च सम्पुटक
वाची । स यथा भागद्वयात्मक तथा त्रय पादद्वयात्मक इति
दर्शयति । यस्य समुद्गस्य त्रयो भेदा भवेत् भवन्ति । तान्
दर्शयति, प्रथमद्वितीयौ द्वितीयचतुर्थौ च पादौ तृतीयं श्लोक,
प्रथमद्वितीयौ द्वितीयचतुर्थौ च तया इति द्वितीय तया प्रथम-
तृतीयौ द्वितीयचतुर्थौ इति तृतीय । पादाभ्याम अपि अने-
कधा अर्थ दर्शित तथाच प्रथमो द्वितीये तृतीये चतुर्थे च
इति त्रय । द्वितीय तृतीये चतुर्थे चेति द्वौ । तृतीयचतुर्थे
इत्येक । पुनश्च प्रथम द्वितीये तृतीये च, द्वितीये चतुर्थे च,
तथा तृतीये चतुर्थे च इति षट् । मिलित्वा च एकादशविध
समुद्ग म निदर्शने वक्ष्यमाणैकदाहरणे व्यज्यते व्यक्तीक्रियते
इति ॥

नेति । परमायात अतिदीर्घ मानो यस्या तादृश्यापि
वर्ज्यत्व न अतिस्त्रिया मत्व स्वभाव व्यवसायश्च यस्या. तया-
भूतया त्वया स वा पुरुष न वर्ज्य. न प्रत्याख्येय । परम्
तु वक्ष्यमाणया युक्तया मत्वा आख्येय आदर्त्तव्य. तथा आ-
दरः कार्य्यः । तवायमुद्यम न स्थिरतर. अत
एव [illegible] फल तस्मात् यथाय स्वर्गे तिष्ठेत्

नन्दनरा जिता माननया समेत्य
उत्तान राजिता माननयासमेत्य ।
विनाशिता वै भवताऽयनेन
विनाऽशिता वैभवतायनेन ॥ ५५ ॥

कलापिनां चासतयोपयान्ति
हृन्दानि लापोढ़घनागमानाम् ।
हृन्दानिलापोढ़घनागमानां
कलापिनां चासतयोऽपयान्ति ॥ ५६ ॥

तथा यत्र क्रियतामिति मानिनी प्रति तत्सख्या उक्तिः । अत्र प्रथमतृतीयौ द्वितीयचतुर्थौ च तुल्याविति समुद्गमेदः ॥ ५४ ॥

नरा इति । माननया सम्मानेन समेत्य सङ्गत्य स्थितेन इति अध्याहार्य्य. माननमेत्यर्थं भवता अयनेन सभागमनेन जिता पराभूता नरा. रिपव इत्यर्थ. माननयो सन्मान-नीत्यो. आस क्षेपम् अभावमित्यर्थं एत्य प्राप्य न राजिता न शोभिता:। पलायमानानामेषा गतिरुक्ता. ये तु न तथा तेषा गतिमाह विनाशिता इति। तथा वैभव विभुत्व तायति विस्तारयति इति तथोक्तेन तायृञ् पालनविस्तारयोरित्यस्मात् नन्दादित्वादनप्रत्यय.। भवता विनाशिता वै निहतास्तु रिपव विना पक्षिण्य गच्छेरु इत्यर्थं अशिता भक्षिता । राज्ञः स्तुतिरियम्। अत्र प्रथमद्वितीयौ तथा तृतीयचतुर्थौ च तुल्यौ इति समुद्गमेदः ॥ ५५ ॥

कलापिनामिति। लापेन केकाध्वनिना उट सम्मानित' घनागम. वर्षाकाल: यै तादृशानां कलापिनां मयूराणां

न मन्दया वर्जितमानमात्मया
न मन्दया वर्जितमानमात्मया ।
दयोज्झितोर्णापयोधरद्वयं
मया ममालिङ्गत जीवितेश्वरः ॥ ५७ ॥
सभा मृणामाला विभूषिता
मृणोऽसारोऽपि मृणालनिर्मलैः ।

[illegible] सभया सभया उपयान्ति मङ्गच्छन्ते शोभां प्राप्नु- [illegible] तया उत्सानिनेन मदातरागेन अपोढ निरस्त [illegible] तं विभागेन पतन् स्यात् काम्यतालादि वाद्यमध्यनृत्य- [illegible] भिनो भागमो येषा ताट्टगाना परिलक्तनृत्यानाम् [illegible] यम् स्थाना मदगजित्यादिति भाव के जले लप- [illegible] तयोक्ताना कलापिना क्रमाणां च आरुतय. मधुरस्वरा [illegible]। एवार्णनमिदम्। अत्र प्रथमचतुर्थौ तथा [illegible] तोयो तृ पो इति समुद्भेद ॥ ५६ ॥

मन्दया। मन्दया मृदया, अवर्जिते अत्यक्ते माने सात्मया सदृशा अवज्ञया यत्नेन मान रचन्त्या, तया दयया वर्जितौ सन्त्यक्तौ यस्या स्वभावत्य यस्या तथाभूतया मया नमन् कृता- वनत्या पादयो पतन् जीवितेश्वरः उरसि वक्षसि उपा- [illegible] र्पित पयोधरद्वय यस्मिन् तद् यथा तथा न ममा- [illegible] नाद्रक निराकृत्य गलितमानाया [illegible] अनुनयोक्तिरियम्। अत्र प्रथमद्वितीयौ पादाव- [illegible] ५७।

मृणेति। हे राजन्! तव मृणालनिर्मलैः मृणालवत् [illegible] दुर्बलत्वा बलासुररहिता इन्द्रेण निघृतत्वात्

स भासुराणामबला विभूषिता
विहारयन् निर्विश सम्पदः पुराम् ॥ ५८ ॥
कलङ्गसुक्तं तनुसद्ध्यनामिका
स्तनद्वयी च त्वदृते न हन्त्यतः ।
न याति मृतं गणने भवन्मुखे
कलङ्गसुक्तं तनुसद्ध्यनामिका ॥ ५९ ॥

निश्चलत्वात् बलाधिरोत्पातविहीना इत्यर्थः विभूषिता देव-भोग्यद्रव्यजातैः विशेषेण सज्जिता सुराणां देवानां सभा आरोहि आरुहा स त्वं विभूषिता विशेषेण अलङ्कृता अबला विहारयन् रमयन् त्वं भासुराणां दीप्यमानानां मरुद्गणानाम् इत्यर्थः पुरां नगराणां सम्पद निर्विश उपभुङ्क्ष्व। राजानं प्रति वैतालिकस्योक्तिरियम्। प्रथमचतुर्थौ अभ्यस्तौविति ॥ ५८ ॥

कलमिति। कल मधुरम् उक्तं वचनं विलासिनीनामिति अध्याहार्य्यं तथा तनु क्षीणं मध्यं नमयतीति तथोक्ता स्तनद्वयी च क्वचित् मध्यशब्दस्य धकारविर्भाव। त्वदृते त्वां विना कं जनं न हन्ति न पीडयतीति अपितु सर्वमेव इत्यर्थः. अत कारणात् भवन्मुखे भवादृशे विषये गणने भवादृशां जितेन्द्रियाणां गणनायामित्यर्थः हि निश्चितम् अनामिका अङ्गुलि-चतुर्थी अङ्गुलिः. कलङ्गसुक्तं निर्दोषं तनुमत् शरीरिभूतम् अपरं प्राणिनं न याति न गच्छति त्वां विना अन्यं न गणयति इत्यर्थः। कमपि महान्तं प्रत्युक्तिरियम्। अत्र प्रथमचतुर्थौ पादावभ्यस्तौविति ॥ ५९ ॥

गजराज ते दिशु गजेश सैनिका
वितन्वतेऽजोपम ! दंशिता युधा ।
वितन्वतेजोऽपमदं शितायुधा
दिशान्न कुर्वन्ति कुलं तास्विनः ॥ ६० ॥
बिभर्ति भूमंडलमं भुजेन ते
भुजङ्गभोऽसौ स्मरतो मदङ्गितम् ।
भुजङ्गभोगाय कामवैल्ल भूधरं
भुजङ्गभो सौम्य स्मरतो मदङ्गितम् ॥ ६१ ॥

गज इति । हे गजोपम ! गजराजसदृश ! नारायण-पक्षे ! हे नरसम ! गजा विष्णुरारुक्षागा इत्यमरः । दंशिता सन्नद्धाः शितानि तीक्ष्णानि सायुधानि येषां ते तथोक्ता, तथा तरस्विनः सत्त्ववन्तो ते सैनिकाः, योद्धृपुरुषा युधा सङ्ग्रामेण दिशु गजान् वितन्वते विस्तारयन्ति । तथा हिषा गजाना कलत्र वितनु देहरहितम् अतेज तेजोहीन तथा अपमद निर्मद निरहङ्कार वा कुर्वन्ति । विजिगीषुस्तुति-विषय । अत्र द्वितीयचतुर्थावभ्यस्तावितिः ॥ ६० ॥

बिभर्तीति । हे राजन् ! भुजङ्गभो वासुकिः ते तव भुजेन बलेन स्वभुजमात्राच्चेत्यर्थः भूमंडलं बिभर्ति अतः एतावता गर्वो न विधेय इत्याह स्मरत इति । स्मरत

स्मरानलो मानविवर्द्धितो यः
स निर्हतिन्ते किमपाकरोति।
समन्ततस्तामरसेक्षणे! न
समन्ततस्तामरसे! क्षणेन ॥ ६२ ॥
प्रभावतो नामन! वासवस्य
प्रभावतो नाम नवासवस्य।
प्रभावतोऽनाम! न वा सवस्य
विक्षिप्तिरासीत् त्वयि विष्टपस्य ॥ ६३ ॥

मद गर्वं मास्म गम गर्वं मा कुरु इत्यर्थः। राजानं प्रत्युपदेशगर्भस्तुतिरियम्। अत्र द्वितीयचतुर्थावभ्यस्ताविति ॥ ६१ ॥

स्मरानल इति। तामरसेक्षणे। मानेन रक्तोत्पलनयने। रक्तोत्पल तामरसमित्यमर। हे अरसे। अरसिके। मानेन विवर्द्धितः विशेषेण वृद्धिं गतः यः स्मरानल कामाग्निः, स ततः विस्तारं गतः सन् क्षणेन उत्सवेन सम समन्ततः सर्वतो भावेनेत्यर्थः। ता पूर्वानुभूता निर्हतिं सुखं किं न अपाकरोति न निरस्यति अपि तु निरस्यत्येवेत्यर्थः अतः नितरां कामपीडितासि मान मुञ्च विलम्बेनालमिति भावः। मानिनीं प्रति तत् सख्युक्तिरियम्। अत्र तृतीयचतुर्थावभ्यस्ताविति ॥ ६२ ॥

पादत्रयाभ्यासं क्रमशो दर्शयति प्रभावत इत्यादि। हे प्रभावतः प्रभावात् प्रभावत प्रभा दीप्तिः तत्सम्बन्धस्य वासवस्य इन्द्रस्यापि नामन! नमयतीति नतं करोतीति तत्सम्बुद्धौ, यज्ञभङ्गपारिजातहरणादिना इन्द्रस्य गर्वहरणादिति

परम्परागा बलवा रणानां
परम्परागा बलवारणानाम् ।
भनो. श्लोर्व्योम विधाय कृन्वन्
परम्परागाऽजलवारणानाम् ॥ ६४ ॥
न पर्वन गानमलज्ज ! मिथ्या
ममर्दिरानाममसमाहितानाम् ।

[illegible] नास्ति आमो रोगो [illegible] तस्मिन् मत अस्य पठास्तम् विह [illegible] ममो यति नामास्य नास्य आमवस्य मुराया [illegible] निर्लज्जनिश्चिन्त नामीत भोगिना मुरापानो [illegible] यजादिक मतत प्रवर्तते इत्यर्थ । औक्तपाद [illegible] पर प्रथमद्वितीयचतुर्थीयषष्ठीनामभ्याम ॥ ६३ ॥

परमिति । हे पराय । पर उत्कृष्ट अय शुभ [illegible] परमकल्याणमित्यर्थ हे बल [illegible] वारयति वारयतीति तत्सम्बुद्धौ वारयते क्षिपि रू [illegible] बलवन्त अत्रादित्वाटप्रत्य [illegible] तथोक्ताना तथा अबलान् दुर्ब [illegible] अबलवारणा तेषा रणाना परम्पराया मस [illegible] व्योमित्यर्थ श्लोविधाय व्योम आकाश [illegible] मन पर श्रेष्ठ पर शत्रु पराया गतवान् जित [illegible] परापूर्वकाट याधातोर्ध्यो मध्यमपुरुषैकवच [illegible] प्रथमद्वितीयचतुर्थी अभ्यस्ता

[illegible] हे अलज्ज । निर्घृण । अममाहितानाम् अव

भवद्विधानामसमाहितानां
भवद्विधानानसमाहितानाम् ॥ ६५ ॥
सन्नाहितोमानमराजसेन !
सन्नाहितोऽमानम ! राजसेन ।
सन्नाहितो मानस ! राजसेन
सन्ना हितोऽमानमराजसेन ! ॥ ६६ ॥

चित्तानाम् अव्यवहितानामित्यर्थः तथा अनमा अनद्मा अहिता अतव येषाम् अधिकशत्रूणामित्यर्थः भवद्विधाना मिथ्या भवत् अनत्य भवत् विधान कार्य यस्यास्ता कार्येषु अपरिणतामित्यर्थः । तथा अनमः विषम. यः अहि सर्प. तस्येव तानो विस्तारो यस्या. तादृशी अतिवक्रदारुणामित्यर्थ. पुनश्च भवे उत्पत्तौ अवणमात्र एवेत्यर्थ द्विधा द्विविध अन प्राण. अर्थरूप यस्या तथाभूताम् अर्थानामेव वाचा प्राणत्वात् इति भाव. वाद न अहर्ष न विस्मयमि । अठनायक प्रति नायिकाया उक्तिरियम् । अत्र द्वितीयतृतीयचतुर्थपादाना-मभ्यास. ॥ ६५ ॥

सन्निति । हे सन् ! साधो ! हे आहितोमानमराजसेन ! न नमन्तीति अनमा. ब्राह्मण्या पचादित्वादन् । अनमाना राजा अनमराजइन्द्र. उमा च अनमराजश्च तौ उमानमराजौ आहितौ स्वाङ्गीकृतौ उमानमराजौ येन स. आहितोमान-मराज: शिव: तेन सेन इन स्वामी तेन सह वर्त्तमान सम्बुद्धौ इत्यर्थः तत्सम्बुद्धौ शैव इत्यर्थ. तथा हे अमानम ! अमाना अपरिमाणा मा लक्ष्मीर्यस्य तत्सम्बुद्धौ. पुनश्च हे राजसेन !

सकृद् द्विस्त्रिश्चतुर्भिर्वा पादैस्त्वेवं प्रदर्शितः ।
श्लोकस्तत्तत् तुल्यार्थं श्लोकाभ्यामः स्मृतो यथा ॥६७॥
विनायकेन भवता हतोपचितबाहुना ।
स्वमित्रोदारिणाऽमीता पृथ्वीयमतुलाश्रिता ॥६८॥

[illegible] मानममानम्यते इति तत्सम्बोधनं लोभाद्य-
[illegible] इत्यर्थः, किंवा हे अमानामराजमेन । मान-
[illegible] मा लक्ष्मीर्यस्मिन् मानमे न विद्यते मानमे यस्या तादृशी
[illegible] तत्सम्बुद्धौ । त्वं समाश्रित कृत-
[illegible] न राजसे न शोभसे, यतस्त्वं मन्नाश्रित. मन्ना
[illegible] पाश्रिता यतो यस्य तथोक्त, तथा मन्ना सत्
[illegible] तत्र तिष्ठ' सर्वेषां हिते रत इत्यर्थः अत-
[illegible] पृथ्वीयता न युज्यत इति भाव' । एव राजान प्रति
[illegible] पादा अभ्यस्ता' ॥ ६६ ॥

सम्प्रति श्लोकाभ्यां निर्दिशति सकृदिति । एवम् उक्त-
[illegible] पादस्य सकृत् द्वि त्रि च' अभ्याम पुनरावृत्ति. स:
[illegible] उदाहृत । तत्र सकृदभ्याम पादद्वयगत, द्विरभ्यास:
पादद्वयगत, त्रिरभ्याम पादचतुष्टयगत इति । युक्त: अर्थो
यस्य सकलाकाक्षतापन्नमित्यर्थ' श्लोकद्वयं समानानुपूर्वपदवर्ण-
[illegible] पद्यद्वितय श्लोकाभ्याम' स्मृत कथित' । यथेति वक्ष्य-
[illegible] प्रदर्शनार्थम ॥ ६७ ॥

विनायकेनेति । हे राजन् । विनायकेन दुर्जनानां शास्त्रा,
[illegible] वर्द्धितौ उपचितौ पीनौ बाहू यस्य तथोक्तेन स्वमित्राणां
[illegible] मित्राणा शत्रूणाम् उदारिणा विनाशकेन तथा
[illegible] अतुलाम् अतुलयता केनापीति भाव: आश्रयतीति

विनायकेन भवता हत्तोपचितबाहुना ।
स्वमित्रोद्वाऽरिणाऽभीता पृथ्वी यमतुलाश्रिता ॥६८
एकाकारचतुष्पादं तन्महायमकाह्वयम् ।
तत्रापि दृश्यतेऽभ्यासः सा परा यमकक्रिया ॥ ७० ॥
समानयान्न ! सानया समानयासमानया ।
समानया समानया समान या समानया ॥ ७१ ॥

तथोक्तेन निरुपमेन इत्यर्थः भवता हेतुना इयं पृथ्वी अभीता दुर्वृत्तेभ्यो भयरहिता जाता इत्यर्थः ॥ ६८ ॥

किञ्च अभीता युद्धाय भवत्समीपमभ्यागच्छता अभिपूर्वादिक्षधातोर्हि[पि] हृतीयैकवचनम् । तव अरिणा शत्रुणा विनायकेन नायकरहितेन भवता सता हृत्तौ जातौ उपचितौ स्थूलतां प्राप्तौ बाहू यस्य तथोक्तेन, तथा स्वमित्राणि निजबन्धून् उज्जहातीति तथाभूतेन, स्वमित्रशब्दात् उत्पूर्वकस्य ज्हाते र्हि[पि] हृतीयैकवचनम् । पृथ्वी गुर्वी यमतुला यमस्य अन्तकस्य तुला परिमाणयन्त्र विचारस्थानम् इत्यर्थः मानयन्त्रे न्यूनाधिकत्वनिश्चयवत् ज्ञातान्तविचारालये पुण्यपापनिश्चय इति भावः, आश्रिता प्राप्ता यमसदनं गतम् इत्यर्थः । राज्ञः स्तुतिविषयकं श्लोकद्वयमिति श्लोकाभ्यासोऽयम् ॥ ६८ ॥

एकेति । एकाकारा चत्वारः पादा यत्र तत् महायमकाह्वयं महायमकमज्ञ तत्रापि महायमकेऽपि यत्र पादचतुष्कस्य अभ्यासः पुनरावृत्तिः दृश्यते सा परा श्रेष्ठा यमकक्रिया यमकवत् पद्यानुष्ठानमित्यर्थः ॥ ७० ॥

समानयेति । अत्रायं पदच्छेदः समानयान्न सा अनया,

धराधराकारधराधराभुजां
भुजा मही पातुमहीनविक्रमाः ।
क्रमात् सहन्ते सहसा हतारयो-
रयोद्धुरा मानधुरावलम्बिनः ॥ ७२ ॥

समानया, सममानया, ममानया, ममानया, समान, या समानया इति । कि समानयाम । समानः यामः यत्र यस्य तत्समानो, मनोज्ञ तुल्ययत्र इत्यर्थः, तया समान । समदर्शिन् । यति यासमादर्शन इत्यर्थः असमानया निरुपमया, समानया मानेन्या समानया सम्माननीयया अनया नायिकया मा मां समानय सङ्गमय, या नायिका समानया मा लक्ष्मी, शोभा तया नाति त्रिया इत्यर्थः ताभ्यां सह वर्त्तमाना सुन्दरी त्रिदशी तेत्यर्थः, ततोऽस्या सङ्गमो अतीवादरणीय इति भाव । अत्र पादचतुष्टयाभ्यासे पादखण्डस्यापि अभ्यासात् समुच्चयालङ्कारः ॥ ७१ ॥

पूर्वं सजातीयसमभिव्यञ्जनितप्रभेदा दर्शिता इदानीं विजातीयसभिव्यञ्जनोदाहरणं दर्शयति धरेति । धराधराकारधराः धराया धर नागराज तस्य आकारः धराधराकार तस्य धरा अतिदीर्घा इत्यर्थः, अक्षीनविक्रमाः अक्षीन अनल्पः विक्रम येषां ते, अथवा अक्षीनस्य अक्षीनामीश्वरस्य विक्रम इव विक्रमो येषां तादृशा, सहसा हतारय, हता नाशिता अरय शत्रव ये तथोक्ता रयोद्धुरा रयेण वेगेन उद्धुराः उत्कटा अतिवेगवन्त इत्यर्थः तथा मानधुरावलम्बिनः मानस्य धुरा भारम् अवलम्बन्त इति तथाभूताः धराभुजा राज्ञा पुत्रा क्रमात् मही पातु पालयितु सहन्ते क्षमन्ते । अत्र

आवृत्तिः प्रातिलोम्येन पादार्द्धश्लोकगोचरा।
यमकं प्रतिलोमत्वात् प्रतिलोममिति स्मृतम्॥७३॥
या मताश्च हृताया सा याता क्लृप्ता मया।
रसगारुता तेऽस्तु स्तुतेतारुगामर!॥ ७४॥

प्रथमे पादे प्रथमार्द्धस्यादिमध्ययमक, पादान्ते सन्धिषु अन्त्यमन्तस्थादिमध्ययमकञ्च। तृतीये च पादे एवमेवान्तस्थादि मध्ये तृतीये च वर्णद्वयव्यवधिना धुरा धुरीति मध्ययमकम्। इत्थं बहुना विजातीयानां सन्धिष्वन्त्य इत्यन्तर्धिनम्। ७२।

इत्थम् अनुलोमे यमकभेदानुक्त्वा इदानीं प्रातिलोम्ये दर्शयन्नाह आवृत्तिरिति। प्रातिलोम्येन वैपरीत्येन पादार्द्ध-श्लोकगोचरा पादगोचरा, अर्द्धगोचरा, श्लोकगोचरा च एव त्रिविधा आवृत्तिः प्रतिलोमत्वात् प्रतिलोमं यमकम् इति स्मृतम्। तथाच यत्र पूर्वपादस्य प्रतिलोमावृत्त्या उत्तरपाद, पूर्वार्द्धस्य प्रतिलोमावृत्त्या उत्तरार्द्धं तथा एकस्य श्लोकस्य प्रति-लोमावृत्त्या श्लोकान्तर निष्पद्यते तत् प्रतिलोममिति निष्कर्षः। तस्य चोक्तरीत्या त्रैविध्यम्। ७३।

पादगोचरमुदाहरति यैति। हे मताश! मता ज्ञाता आशा यस्यासौ तथोक्तौ तस्य तत्सम्बुद्धौ मया या हृदता चौरेता हृतायाना हृत आयाम क्लेश यया तथोक्ता, सा आयाता प्राप्ता तव दुर्व्यवहारेण महान् क्लेशोऽनुभूत इदानी-मपि यथारुचि क्रियतामित्यर्थः। हे स्तुते! स्तुतं स्तवम् इत. प्राप्तः स्तवार्ह इत्यर्थः अथवा स्तुतात् इत च्युत अस्त-वार्हः निन्दिताचरणात् अप्रशस्तीय इत्यर्थः, तत्सम्बुद्धौ हे

मदनाभो मदनस्त्वं न मे काचन कामिता ।
तामिजा न च तामेन स्वाधीना दम इन्द्रिय ॥७५

[illegible] प्रकरणे प्रकाशनिष्ठानि प्रमाद दोषमदृग
[illegible] दोषाणाम कार्यकरणमहङ्काराज्ञानत्वादिक
[illegible] तेन आरक्तता कथ्यतीति आरक्त
[illegible] प्रकाशप्रकाश । यस्य भाव. आरक्तता यथे
[illegible] यस्मिन् भात् त्व या कामयसे तामेव व्रज
[illegible] भाति । मानिन्या नायक प्रति सकोपो-
[illegible] । एव षष्ठमपादस्य प्रतिलोमानुलोम्या द्वितीयपादस्तथा
[illegible] प्रतिलोमानुलोम्या प्रथमपाद', एव तृतीयचतुर्थयोरपि,
[illegible] प्रतिलोमयमक्रम ॥ ७४ ॥

[illegible] नादिन इति । नादिन नाद-
[illegible] योति तथोक्तस्य नादब्रह्मानुध्यानरतस्य इत्यर्थ
[illegible] मदनाभो मदनस्त्वं स्वाधिश्च तो काम कामजनिता
[illegible] त्वर्थ तथा स्वा निजा काचन कामिता
[illegible] न विद्यते इत्यर्थ तथा दम' इन्द्रियसयम
[illegible] इति निरूपयतीति तथोक्तेन इन्द्रियसयमध्वसकारिणा
[illegible] स्वम् आत्मा अधीन यस्यास्तादृशी आत्म-
[illegible] तामिजा ताम्यति अनयेति तम्धातोर्भावे
[illegible] ग्लानिरित्यर्थ नास्तीत्यर्थ । तथाच,
[illegible] विषयाभिलाष ग्लानिरेति चत्वारो मम
[illegible] इति निष्कर्ष । नादोत्पत्तिरीक्षा सुरेश्वराचार्येण
[illegible] मर्वासु नाडीषु विशोधितासु ।
[illegible] स्वात्मावगम्य स्वयमेव नाद इति ।

यानमानय मारविकशोनानजनासना।
यासुदारशताधीनासायासायसनादि सा ॥ ७६ ॥
सा दिनासयनायासा नाधीता शरदाऽसुया।
नासनाजनना शोकविरामायतसानया ॥ ७७ ॥

यमकचक्रम्।

योगिनो वचनमिदम्। अत्र श्लोकार्द्धस्य प्रतिलोमाहत्या श्लोकार्द्धान्तर निष्पन्नमिति प्रतिलोमयमक श्लोकार्द्धविषयम् । ७५ ।

इदानीं प्रतिलोम दर्शयति यानमिति। हे सखे! इति पूर्वाहार्य्यं, त्व यान वाहन यज्ञायन्यतममित्यर्थः आनय। किमित्याह यामिति। अहम् उदारशताधं नाम् उदाराणा महता धनिनामित्यर्थं शतम् अधीन यस्यास्तादृशी या वेश्यामित्यर्थ आया गतवानस्मि, मारविकशा मार. काम एव अविर्मेष तस्य ताडनो कामिना कामार्त्तिहन्त्रीत्यर्थ तदा ऊन हीन धनाभावादिति भाव ऊन प्राप्त देषा ते ऊनाना धनहीना इत्यर्थ ते च ते ऊनाश्चेति ऊनानजना तान् अस्यति निरस्यतीति ऊनानजनाम्ना निर्धनान् वहिष्कुर्वतीत्यर्थ सा वेश्या आयम् आगच्छन्तम् अनादि उक्ता मयेति शेष. अद्य तव सन्निधावागमिष्यामीति अभिहिता इत्यर्थ । ७६ ।

सापि मद्यनुरागिणीत्याह सेति। सा वेश्या अनुया उपस्थितया इत्यर्थ शरदा शरत्कालेन आधीता आधि मनःपीडां सहिरहैरेति भाव इता प्राप्ता अतएव शोकविरामा

इत्येतन्नामैकरूपत्वं यत्त्वेकान्तरमर्द्धयोः ।
गोमूत्रिकेति तत् प्राहुर्दुष्करं तद्विदो यथा ॥ ७८ ॥

[illegible] विरुद्धमपि विरामं भजमान यस्याः तादृशी न [illegible] विरुद्धमनुभवतीत्यर्थः, तथा दिना-[illegible], दिने दिने य आमय रोग तस्य माया कुलम् [illegible] गच्छति प्रकाशयतीत्यर्थः दिवसे सखीना समक्ष रोग-[illegible] विरुद्धमपि गोपयन्ती तिष्ठतीत्यर्थः किञ्च नामना-[illegible] नास्ति आमनाया उपवेशनस्य जनन क्रिया यस्या. [illegible] शक्तिरत्वात् विरुद्धमपि नैनैकत्र उपविशतीत्यर्थः, पुनश्च [illegible] मनाया शयनस्य मर्दनस्य मान ज्ञान यातीति तथोक्ता [illegible] शयनमर्दनमेवानुभवन्ती तिष्ठतीत्यर्थः । सख्याय प्रति [illegible] वैरूप्यायामाभक्ष्योक्तिरियम् । अत्र श्लोकस्य प्रति-लोमनाम्ना श्लोकान्तरप्रणयात् श्लोकगोचर प्रतिलोमयमकम् ॥ ७७ ॥

अथ चित्रालङ्कारान् कांश्चित् निरूपयिष्यन् प्रथम गोमू-त्रिका निर्दिशति वर्णानामिति । अर्द्धयोः श्लोकस्य यथाक्रम [illegible] व्यवहितया एकाक्षरम् एकाक्षरव्यवहित यत् एकरूपत्वम् [illegible] चित्राकारत्व दुष्कर महता कर्त्तुमशक्य तद्विद चित्रालङ्का-[illegible] गोमूत्रिका चलतो गोमूत्राकारत्वेन घटितत्वात् गोमू-त्रिकामेव प्राहुः । तद्विदश्च तमिति च पाठ, तदा तम् [illegible] तद्विदारमित्यर्थः । गोमूत्रिका च त्रिविधा पादगोमूत्रिका, [illegible] गोमूत्रिका, श्लोकगोमूत्रिका च । इयन्तु अर्द्धगोमूत्रिकेति [illegible] दिदर्शिता । यथेति उदाहरणार्थम् ॥ ७८ ॥

मदनो मदिरा क्षौद्रो मासपाङ्क्तिस्त्रयोऽजयेदक्षम्।
+ + + + + + + + + + + + + + + + + + + +
मदनो यदि तत्क्षौद्रो मासमपङ्क्तिर्जयेदक्षे ७९

इति गोमूत्रिका।

प्राकुरुते यं नाम गोमूत्रिकमण्डलं यदि।
तदिह सर्वतोभद्रं मण्डलं यदि सर्वतः॥ ८०॥

अथैकोत्तरिकाक्रमादाह मदन इति। अत्र मदन मदिरा क्षौद्रो मासपङ्क्तिरित्यासां स्थाने क्रमेण पञ्च तत्र मृत मन् यदि जयेत् सा प्रकृत्, तत् तदा लक्षं मम पाण क्षौद्र स्यादिति शेषः तदा च मदनाय मन् यदि दद्यात् पुष्पाञ्जलिं ददामि इत्यर्थः यदि अत्र क्षौद्रिणीभि मदनाद्य गीतं तदा कृतार्थो भवामि इति भावः। अत्र पूर्वयोर्विपक्षवर्णानि एकरूपाणि, तदा उत्तरयोरेव विपक्षाक्षराणि पूर्वयोरेव सदृक्षाणि इत्यनुसारेणोद्धारादि गोमूत्रिकाणि इति गोमूत्रिका। एतद्विपरीतानि अपि उद्धारादीनि भवन्ति तानि च बुद्ध्येति॥ ७८।

अथ सर्वतोभद्रं निरूपयति प्राकुरुते इति। गोमूत्रिकमण्डलं यस्य नाम सर्वतोभद्रं भवतीति शेषः यदि भवति लक्षणेन पादोर्ध्वाधोरेखाभिरिति शेषः तदा सर्वतोभद्रं नाम चित्रं प्रायुङ्क्ते। यदि सर्वतः सर्वतोभद्रचित्रोक्तलक्षणोपेतं मण्डलं स्यात् इत्यर्थः भवति तदा तत् सर्वतोभद्रं नाम चित्रं ज्ञेयम्। तथाहि, द्विविधमिदं पद्याक्षरयुक्तिघटितमेव प्रायेण दृश्यते तत्र प्रथमं चतुर्दश कोष्ठानि पद्यपङ्क्तिघटितानि वेद्यानि, ततः प्राग्यपङ्क्तिचतुष्टये क्रमेण पादचतुष्टयं वर्णा निवेशनीया,

। म । नो । भ । व । त । वा । नी । कं ।
नो । द्र । या । य । न । मा । नि । नी ।
। भ । या । द्र । मे । या । मा । मा । वा ।
। त । य । मे । नो । म । या । न । त ।
। ७ । ६ । १६ । १५ । १५ । १५ । १५ । १५ ।
। १८ । १३ । १३ । १३ । १५ । १५ । १३ । १५ ।
। १८ । १५ । १३ । १५ । १५ । १३ । १५ । १५ ।
। ११ । १२ । १३ । १५ । १५ । १५ । १५ । १५ ।

॥ ८१ ॥

अर्द्धभ्रमः ।

अत्र निरग्रपङ्क्तिचतुष्टये चतुर्थचतुर्थीयद्वितीयप्रथमपादा [illegible] । अर्द्धभ्रमे अध पङ्क्तिचतुष्टये परावृत्त्या, सर्वतोभद्रे तु परावृत्त्या समावृत्त्या च चतुर्थादिपादरीखनम् इति भेद एव आवृत्तिक्रमस्तु अर्द्धभ्रमे ऊर्ध्वषड्कौ वामाद् दक्षिणम्, अध षड्कौ दक्षिणाद् वामत । किञ्च, वामस्थोर्ध्व-[illegible] दक्षिणस्य अध कोष्ठाद् ऊर्ध्वक्रमेण च अनु-[illegible] प्रथमादिपादोपस्थितिः । सर्वतोभद्रे तु दक्षिणाद् [illegible] वामस्थदक्षिणस्य ऊर्ध्वक्रमेण अधस्त ऊर्ध्वक्रमेण च [illegible] प्रतिलोमाभ्यां सर्वत आवृत्त्या पादोपस्थितिरिति [illegible] ८१ ।

[illegible] । हे मनोभव हे नत । कामिजननमस्कृत । [illegible] मार्गी इय मानवती तव उदयाय

। सा । मा । या । मा । मा । या । मा । सा ।							
। मा । रा । ना । या । या । ना । रा । मा ।							
। या । ना । वा । रा । रा । वा । ना । या ।							
। मा । या । रा । मा । मा । रा । या । मा ।							
। मा । या । रा । मा । मा । रा । या । मा ।							
। या । ना । वा । रा । रा । वा । ना । या ।							
। मा । रा । ना । या । या । ना । रा । मा ।							
। सा । मा । या । मा । मा । या । मा । सा ।							

॥ ८२ ॥

सर्वतोभद्रम्।

हृदये नो न अपितु उदयायैव, ननु विजयिना सैन्यम् अपराधिदण्डञ्च तव अत्र किमित्याह वयम् एनोमया पापिनः मा वा न वा, किन्तु भयात् अनियामा अमेय आस. रोग येषा तथोक्ता. यदि च वयमनपराधिन तथापि मृग भयार्त्ता जाता स्मेत्यर्थ ॥ ८१ ॥

सेति। अमायामानाया. अमायस्य अकपटस्य अमस्य अपरिमितस्य आमस्य रोगस्य कामपीडाया इत्यर्थ आयः आगमन यया तथोक्ता. तथा मारानायायानाम मारः काम एव आनाय जाल बन्धनहेतुत्वात् इति भाव तस्य आयानेन आगमनेन आराम. प्रीति यस्या तादृशी. सततकामव्यापारवता इत्यर्थ. किञ्च यानावारारावा यानं विदेशगमनम् आवारयती यानावार. यानावार आराव वचन यस्या तथाभूता मम विदेशगमन वारितवतीत्यर्थः किञ्च अनाया नास्ति नायः नीति. यस्याः तादृशी मम प्रवासाकरणे कार्यहानिः

क्षितिविजितिस्थितिविहितिव्रततयः परतयः ।
उरु गुरुधुर्यु दुधुदुर्युधि कुरव. स्वमरिकुलम् ॥८५॥
श्रीदीप्ती ह्रीकीर्ती धीनीती गीःप्रीती ।
एधेते हे हे ते ये नमे देवेशे ॥ ८६ ॥
सासायासासाया सासा सारानायायानारासा ।
यानावारारावानावा साया रासा सारायासा ॥८७

स्वरनियमः ।

इच्छा तत्रास्यभिलाष ते विधेये इति शेष धेच्छे इत्यत्र धेच्छे इति पाघे ध्या ध्यानमित्यर्थ । अत्र आ ई ओ ए इति चतुर्भिरेव स्वरै पद्यबन्ध । विद्युन्मालाहृत्तमिदम् ॥ ८४ ॥

द्विस्वरमुदाहरति क्षितीति । क्षितै पृथिव्या विजिति विजय स्थितेर्मर्यादाया विहिति विधान ते एव व्रते क्षितिविजितिस्थितिविहितिव्रते तयो रति अनुरागो येषा तथोक्ता तथा परा उत्तमा गतिर्येषा तादृशा कुरव युधि युद्धे स्वम् अरिकुलम् उरु अत्यर्थ गुरु यथा तथा दुधुदु कम्पितवन्त । अत्र इ अ उ इति त्रिभिरेव स्वरै पद्यबन्ध । त्वरितगतिर्हृत्तमिदम् । ८५ ॥

द्विस्वरमुदाहरति श्रीदीप्ती इति । श्री लक्ष्मी दीप्ति कान्तिश्च ते ह्री लज्जा कीर्तिश्च ते, धीर्बुद्धि नीतिश्च ते, गी मधुरवाक् प्रीतिश्च सन्तोषश्च ते हे हे ते तव एधेते वर्धते, ये इमे हे हे देवेशे देवानामीश्वरे इन्द्रे इत्यर्थ न विद्यते इति शेष । अत्र ई ए इति द्वाभ्यामेव स्वराभ्यां पद्यबन्ध । वाणीहृत्तमिदम् ॥ ८६ ॥

अगा गाङ्काङ्काकागाङ्काघकाकाकहा।
अहाहाङ्ग! खगाङ्गागकाङ्गागखगकाकाकक!॥८१॥

स्नानविधयः।

स्नानेन शीतवातादिबाधामोटेन नतानि व्याकृतानि अङ्गानि यस्य तत्सम्बुद्धौ, स्वकृता साध्वी नारी असङ्गसङ्गत नास्ति सङ्गो येषां ते असङ्गा दुर्जना तेषां सङ्ग तस्मात् अनङ्गलुब्धेन कामवीक्ष्या लग्ना जाता नाना विविधा आतङ्का सन्देहा यस्या तादृशी भवति, भर्तृविरहेण मृती अपि दुर्जनानां सङ्गतीति भाव। तस्मात् भार्या प्रतिचिन्तय केवल इदामोदेनालमिति स्नाय प्रति कस्यचिदुक्ति। अत्र वन्द्यवृत्तेरिव पद्यरचना॥८०॥

एकस्थानमुदाहरति अगा इति। हे गाङ्काकाकागाङ्क! गङ्गाया इद गाङ् यत् क जल तस्य आकाक समूहवक्रगति गाङ्पूर्वात् कै शब्दे इत्यस्मात् भावे क्विपि आका अक कुटिलगतावित्यस्मात् भावे ङप्रत्यये अक आका सह अक आकाक तस्य इत्यर्थ न गाहते इति तथोक्त तत्सम्बुद्धौ तथा हे अहाहाङ्ग! हाहा दीनतासूचक ध्वनिविशेषं गच्छतीति हाहाङ् न हाहाङ् अहाहाङ् तत्सम्बुद्धौ, किञ्च हे खगागाङ्गकङ्ग! ख गच्छन्तीति खगा सूर्यादय, ते अङ्गावयवा यस्य स खगाङ् स च असौ अग पर्वतश्चेति खगाङ्ग सुमेरुरित्यर्थ त कङ्कते गच्छतीति तथोक्त ककिगतावित्यस्मात् अन्प्रत्यय। तत्सम्बुद्धौ, पुनश्च हे अगखगकाकाक! अगति गच्छति इति अगं नश्वरमित्यर्थ खानि इन्द्रियाणि गच्छतीति खगम् इन्द्रियविषयं ततश्च अग खगञ्च यत् क सुख तदर्थ न कक्ते

देवानां नन्दनो देवो नोदनो वेदनिन्दिनः ।
दिवं दुदाव नादेन दानवनन्दिनः ॥ ८३ ॥
सूरिः सुरासुरारिसारः सारसारसाः ।
ससार सरसीः सीरी सस्नूसः स सुरारसी ॥ ८४ ॥

यस्य तादृश [illegible] यतस्त्व न मे योग्य इति भाव । दारुकृतसभिरूपस्य दक्षिण आधकुमार प्रति तथा. प्रत्याख्यानोक्तिरियम् । अत्र र क ग स इति चतुर्भिरेव वर्णै पद्यबन्ध. । दन्त्यैरेव च पद्यप्रक्रमवर्णाना ग्रहण. तेन ग्रहेति टकारयोगेऽपि न चातुर्वर्ण्यव्याघात , तस्य पद्यपूरकत्वाभावात् ॥ ८२ ॥

द्वितीयमुदाहरति देवानामिति । देवानाम् इन्द्रादीनां नन्दनो हैत्यदलनात् प्रीतिजनक , तथा वेदनिन्दिनो वेदनिन्दकस्य नास्तिकजनस्य नोदन निरासक देव मूर्तिरूपी भगवान्, दानवान् नन्दयति त्रिभुवनविजयेन सन्तोषयतीति तथोक्तस्य दानवनन्दिन हिरण्यकशिपो दानै वक्षोविदारणे दोय खण्डने हेत्वर्थात् तृतीयप्रत्यय. । नादेन सिंहनादेन दिवम् अन्तरीक्ष दुदाव तापितवान् । अत्र दवन इति त्रिभिरेव वर्णै. पद्यबन्ध ॥ ८३ ॥

तृतीयमुदाहरति सूरिरिति । सूरि. विद्वान् तथा सुरासुरारिसार सुरान् असुरान् आसरति आक्रन्दति इति तथोक्त सारो बलं यस्य तादृश किञ्च ससूस शोभनौ जङ्घे सूस तास्या सहित वामोरुरित्यर्थ, पुनश्च सुरारसी सुराया रस आस्वाद अनुराग इत्यर्थ. विद्यते अस्येति सुरारसी स प्रसिद्ध. सीरी सीरं लाङ्गलमस्यास्तीति तथोक्त. बलदेव. सारस-

[illegible] नानेन नाननेनाननानि नः ।
[illegible] निनी: ॥९५॥

[illegible] ।

[illegible] ऽपि कालिदासस्य [illegible] ।
[illegible] गतिः ॥ ९६ ॥

[illegible] गतेन मत्तवर्तमाना मामसा पत्निविशेषा [illegible] गतवान् । जलदेवस्य जल- [illegible] । तत द्वाभ्यामेव [illegible] ॥ ९४ ॥

[illegible] । अननेन प्रबलेन एनेन [illegible] सामान्यगुणा इत्यर्थः, अनेन [illegible] करणेन न अस्माकम् [illegible] अपनीतानि न न अपितु [illegible] । नन्वेवं सति तथापि इत्यर्थं इनः ना पुरुष. अस्माक [illegible] प्राणान् निनी नेतुमिच्छतीति नीधातो [illegible] । रक्षितुमिच्छु. सन्नित्यर्थः, [illegible] न भवति, शत्रुविजितस्य युद्धे मरण जीवि- [illegible] । अतोऽनेन यथाशक्ति युद्ध कर्त्तव्यमिति भाव । [illegible] । अत्र [illegible] ॥ ९५ ॥

[illegible] । इति उक्तप्रकारेण [illegible] । एतावता अन्येऽपि [illegible]

क्रीडागोष्ठीविनोदेषु तज्ज्ञैराकीर्णसङ्गते।
परव्यामोहने चापि सोपयोगाः प्रहेलिकाः ॥ ९७ ॥
आहुः समागतां नाम गूढार्थां पदसन्धिना।
वञ्चितान्यत्र रूढेन यत्र शब्देन वस्तुना ॥ ९८ ॥

दृष्टराद्धिकालङ्कारा पञ्चदशादय' प्राचीनोक्ता ग्रन्थविस्तार-भयेन नात्रोक्ता ग्रन्थान्तरत ते ज्ञातव्या इति भाव. पुन. इदानी प्रहेलिकानां प्रकाराणा विशेषाणा गति. नियम उद्दिश्यते निरूप्यते। तल्लक्षणन्तु सामान्यत उक्तम्। यथा. प्रहेलिका तु सा ज्ञेया वच्च सहतिवारि यदिति ॥ ९६ ॥

यदि च प्रहेलिकाया यमकादिवत् शब्दार्थोपस्कारकत्वेन रसादुपकारकाभावात् नालङ्कारत्व. यदुक्त रसस्य परिपन्थित्वात् नालङ्कार प्रहेलिकेति. तथापि अस्या उपयोगित्वमाह क्रीडेति। क्रीडागोष्ठीषु विहारसभासु ये विनोदा प्रमोदा: तेषु विषये तज्ज्ञै प्रहेलिकाभिज्ञै सह आकीर्णे जनसङ्कुले टेगे यत् सङ्गत गुप्तभावेन परस्परसलाप तस्मिन्, तथा परस्य व्यामोहने विशेषरूपेण अर्थावबोधवशेन मनस व्याकुलतायान् अथवा परस्य दोद्धव्यव्यतिरिक्तस्य जनस्य व्यामोहने अव-बोधनिराकरणे विषये प्रहेलिका सोपयोगा. सप्रयोजना: उपकारिण्य इत्यर्थ तस्मात् अस्या उपयोगित्वे अलङ्कारत्वम् अन्यच्च दोषावहत्वमिति बोध्यम्। ९७।

अस्या भेदान् क्रमेणाह आहुरिति। पदसन्धिना पदयो सन्धिना सन्निध्यजनितसन्धिकार्येण गूढ दुर्बोध. अर्थो यस्यास्तां समागता नाम प्रहेलिकामाहु. अन्यत्र यत्र विव-

[illegible]लितप्रयोगान्मोहकारिणी ।
[illegible]त् प्रमुषिता यस्यां दुर्बोधार्था पदावली ९९
[illegible]रूपा गौणार्थारोपितेर्थिता पदैः ।
[illegible]लक्षणास्तित्वमात्रव्युत्पादितश्रुतिः ॥ १०० ॥
[illegible]ा नाम संख्यानं यत्र व्यामोहकारणम् ।
[illegible] भासते यत्र वाक्यार्थः सा प्रकल्पिता १०१

[illegible]ग्रथितायां कर्त्रा प्रथितेन ग्रन्थेन या वञ्चना प्रतारणा [illegible] ग्रथितायां प्रतिलिक्षेत्यर्थः ॥ ९८ ॥

[illegible]ति । पतित्यवहितानां पदानां प्रयोगात् मोह- [illegible] मोहकारिणी या सा व्युत्क्रान्ता [illegible] पदावली पदानामुत्प्रयं दुर्बोध अर्थो यस्मा- [illegible]थिता नाम प्रकर्षेण बुद्धेर्मुषितत्वादित्यर्थः । वह्नि- [illegible] पद दुर्बोधार्थमिह तु पदानामुत्प्रयमेदः ॥९९॥

[illegible]ति । गौणार्थेन लाक्षणिकार्थेन आरोपिते [illegible] पद ग्रथिता विरचिता या सा समानरूपा नाम [illegible]स्मनत्वादित्यर्थः लक्षणस्य सूत्रस्य अस्तित्वमात्रेण [illegible]ख्यानं न तु प्रकाशकविवेचनया इत्यर्थः व्युत्पादिता [illegible] यत्र तादृशी या सा परुषा नाम अप्रक्लिन्नबन्धन- [illegible]त्वयो परुषायबोधादिति भावः ॥ १०० ॥

[illegible]ति । यत्र संख्यान वर्णगणना वा संख्यावाचकशब्द. [illegible]स्य प्रबोधबोधार्थस्य कारणं सा संख्याता नाम, [illegible] अन्यथा भासते आपातत' प्रतीयमानादर्थात् [illegible] प्रतीयते सा प्रकल्पिता नाम ॥ १०१ ॥

सा नामान्तरिता यस्यां नास्ति नानार्थकल्पना।
निभृता निभृतान्यार्थां तुल्यधर्मस्पृशा गिरा॥१०२
समानशब्दोपन्यस्तशब्दपर्य्यायसाधिता।
संमूढा नाम. या साक्षान्निर्दिष्टार्थापि मूढये॥१०३
योगमालातिरिक्ता नाम या स्यात् सा परिहारिका।
एकच्छन्नाश्रितं व्यक्तं यस्यामाश्रयगोपनम्॥१०४॥

सेति। यस्या नास्ति सङ्गविषये नानार्थकल्पना नानार्थाना वक्तव्यार्थाना वक्त्रा सा नामान्तरिता नाम यस्याश्च तुल्यधर्मस्पृशा प्रस्तुताप्रस्तुतयो साधारणधर्मं स्पृशन्त्या गिरा वाचा निभृत गोपित अन्य अपर यर्थो यत्र सा निभृता नाम। अस्याश्च साधारणधर्मबलेन विषयस्य सूचनात् समासोक्तिमूलता बोध्येति। १०२।

समानशब्देति। उपन्यस्तेन उक्तेन शब्दाना प्रकृतार्थबोधकपदाना पर्य्यायैरेव नामान्तरैरेव साधिता विरचिता समानशब्दा नाम. अत्र च लक्षण्या एकार्थशब्दस्यैव ग्रहण न तु अभिधालभ्यार्थस्य. तथात्वे स्वरसीयत्वाभावेन प्रकृतानुपयोगित्वादिति ध्येयम्। या साक्षात् अभिधायकशब्देन निर्दिष्ट निरूपित अर्थो यत्र तादृशी अपि मूढये व्यामोहाय भवतीति शेष. सा सम्मूढा नाम। १०३।

योगमालेति। या योगाना यौगिकपदाना माला सम्मूहो यस्यां सा परिहारिका नाम स्यात् परिहरति अनिष्टार्थबोधं वारयतीति व्युत्पत्त्या तथा व्यपदेश अनिष्टभ्यार्थात् यौगिकार्थस्य नानाकष्टकल्पनामूलत्वेन सहसाबोधविरहादिति

[illegible] भवेदुभयरूपत्वा यस्यामुभयगोपनम् ।
[illegible] नाम सा यस्यां नानालक्षणसङ्करः ॥१०५॥
[illegible] षोडश निर्दिष्टाः पूर्वाचार्यैः प्रहेलिकाः ।
[illegible] प्रहेलिकाभान्यास्तेरभीताश्चतुर्दश ॥ १०६ ॥
[illegible] परिमेयान् मन्यमाना वयं पुनः ।
[illegible] अभिधास्यामस्ता दुष्टा यास्त्वलक्षणाः १०७

[illegible] यस्यां गोपितम् आधेयं व्यक्तं स्फुटम् आश्रयस्य [illegible] गोपनं सा एकरूपत्वा नाम ॥ १०४ ॥

यस्यां उभयस्य आधेयस्य आधारस्य च गोपनं [illegible] रूपत्वा नाम भवेत् उभयोरपि निभृतत्वात्, यस्या [illegible] नाम उक्ताना प्रहेलिकाभेदलक्षणाना सङ्करः [illegible] सङ्कीर्णिति सा सङ्कीर्णा नाम ॥ १०५ ॥

[illegible] इति । एता समागतप्रभृतय षोडश प्रहेलिकाः [illegible] निर्दिष्टा अदुष्टत्वेन कथिता इत्यर्थः, ताः पूर्वाचा- [illegible] एता चतुर्दश दुष्टा प्रहेलिकाः, च्युताक्षरादिकाः [illegible] दुष्टत्वेन सदोषत्वेन कीर्तिता इत्यर्थः ॥ १०६ ॥

[illegible] दुष्टा प्रहेलिका पूर्वाचार्यैरुक्तास्तथाप्यस्माकं न [illegible] लक्षणविरुद्धत्वात् दोषाणीति । वयं पुनः अपरिमेयान् [illegible] दोषान् मन्यमाना जानन्त मन्त साधीरेव उत्कृष्टा [illegible] दोषा एव प्रहेलिका अभिधास्यामः उदाहरिष्यामः । [illegible] दुष्टा पूर्वोक्तलक्षणानन्तर्भूता ता दुष्टाः सदोषाः, [illegible] न मम प्रयास इति भावः ॥ १०७ ॥

न मयागोरसाभिज्ञं चेतः, कस्मात् प्रकुप्यसि ।
अस्थानरुदितैरेभिरलमालोहितेक्षणे ! ॥ १०८ ॥
कुलामासेवमानस्य तथा ते वर्धते रतिः ।
नैवं निर्विशतो नारीरमरस्त्रीविडम्बिनीः ॥ १०९ ॥
दण्डे चुम्बति पद्मिन्या हंसः कर्कशकण्टके ।

अत्र समागतामुदाहरति नेति । हे आलोहितेक्षणे ! आरक्तनयने ! कोपादिति भावः, मया समेत्यर्थः षष्ठ्यर्थे तृतीया । चेत गोरसस्य दुग्धादेः अभिज्ञं रसज्ञं न, दुग्धादिकं मया न हृतमित्यर्थः, कस्मात् प्रकुप्यसि, एभिः अस्थानरुदितैः, अकारणरोदनैः अलम् इति सहजोऽर्थः सहृदिकारका गूढार्थस्तु मे चेतः आगसं अपराधस्य नायिकान्तरसङ्गरूपस्य रसस्य प्रमोदस्य अभिज्ञं न नाहम् अन्या कामये कथं तवेदृशो मानः इति अत्र मे आगोरसाभिज्ञमिति सन्धिसूत्रेण एकारस्य अयादेशेन मयागोरसाभिज्ञमिति निष्पन्नत्वात् प्रकृतार्थस्य सवरणम् । काञ्चित् गोपीं प्रति औडुलोमेः जनसमाजे उक्तिरियम् ॥ १०८ ॥

वञ्चितामुदाहरति कुलामिति । कुलां भुक्तपूर्वां कामपि नारीम् आसेवमानस्य उपभुञ्जानस्य ते तव तथा रतिः सन्तोषः वर्धते, अमरस्त्रीविडम्बिनीः सुरकामिनीसदृशीः अन्याः नारीः निर्विशतः उपभुञ्जानस्य एव रतिः न वर्धते इति सहजोऽर्थः गूढार्थस्तु कुलां कान्यकुब्जनगरीं तत्रत्यनारीं वेत्यादि । अत्र कुलाशब्दो भुक्तपूर्वनार्यामेव प्रसिद्धः अन्यत्र तु नेत्यभिप्रायार्थस्य प्रतिपादनम् । कान्यकुब्जनगरीं वा तत्रत्यनारीं प्रति अनुरक्तजने उक्तिरियम् ॥ १०९ ॥

मृदु वल्गुरवं शुचिस्मृगडेनाङ्गानि घट्टयन् ॥ ११० ॥
स्खलत कनि । काले ते स्फातयः स्फार्ह्वल्गवः ।
चन्द्रे साक्षान्ननन्दात वायवो मम धारिणः ॥१११॥
अशोकानि मया दृष्टा वल्लरी पञ्चपल्लवा ।
यत्रे पतति तापा मम्मां कुसुममञ्जरी ॥ ११२ ॥

[illegible] इति दण्डे इति । हम. कर्कशकठके [illegible] नाले मङ्गानि घट्टयन् वल्गुरव मनोज्ञं नाद [illegible] मृदु कोमलतोल्लन्वयः । अतान्वयबोधे आम- [illegible] ॥ ११० ॥

[illegible] दर्शयति स्खातय इति । हे कनि । कुमारि । [illegible] कुमारी चेति हेमचन्द्र । ते तव कान्यते चिप्यते [illegible] काम गतौ तस्मिन् कान्त प्रेरणे इत्यस्य घञन्तस्य रूप [illegible] स्फा [illegible] ति तस्य अति. गति यत्र ते स्फीता इत्यर्थः [illegible] ति गाति अस्मातत्यगतावित्यस्य क्विप्प्रत्ययान्तस्य [illegible] । खानाय खम् आकाश तस्याय गुण: खे खगच्छादि- [illegible] । अतिर्गति । स्वस्य अति: येषु ते नूपुरादयोऽल- [illegible] इत्यर्थ । स्फार्ह्वल्गव स्फा स्फीतताम् अर्हन्तीति [illegible] प्रभूता वल्गव वल्गनात् चलनात् जाता ध्वनय [illegible] तत्र स्फार्ह्वल्गव येषा तथोक्ता. भवन्तीति शेष, [illegible] आ [illegible] दयति इति चन्द्रे तस्मिन् नूपुरादयलङ्कृते मिञ्जि- [illegible] पादे भावात् प्रत्ययीकृत इत्यर्थ मम वायव. प्राणा [illegible] स्थिरा भवन्ति। अत्र अप्रसिद्धै. बहुभि पदै. [illegible] त्वात् प्रसादगुणम् ॥ १११ ॥

[illegible] दर्शयति । अत्रेति अत्र उद्याने मया पञ्च-

सुराः सुरालये स्वैरं स्वनन्ति दशनार्चिषा।
सज्जन्त इव सन्तप्ते सौरे सरसि सम्प्रति॥११३॥
नासिक्यमध्या परितः पुरी विभूषिता।
अस्ति काचित् पुरी, यस्यामष्टवर्णाख्या नृपा.११४

वल्लरी लता दृष्टा, यस्या कुसुममञ्जरी पल्लवे पल्लवे प्रतिपल्लवमित्यर्थः। ताम्रा रक्ता। अत्र नायिका काचित् उद्यानत्वेन अध्यारोपिता तस्या बाहु वल्लरीत्वेन, अङ्गुल्य पल्लवत्वेन, नखाश्च कुसुममञ्जरीत्वेन। तेषाञ्च ताम्रत्व रक्ताङ्गुलिप्रभयेति बोध्यम्। अत्र पदाना गौणार्थारोपितत्वम्॥११२॥

परुषा दर्शयति सुरा इति। सुरा शोभना या मत्तो गीतध्वनिरिति यावत् येषा ते रै शब्दे इत्यस्य क्विबन्तस्य रूपम्। शोभन गायन्त इत्यर्थः सुरापा इति कर्तृपदमूह्यम्। तथा दशनार्चिषा हास्येन विहताख्यतया दन्तकिरणैरोपलक्षिताः सन्तः सम्प्रति सौरे सुरासये सरसि सज्जन्त अतएव मत्ता इव सुरालये शुण्डिकालये स्वैर स्वनन्ति। सुरा इति पद देवतावाचकमेव अनुशासनबलात् पुरुषरगायके प्रयुक्तम् इति पारुष्यम्॥ ११३॥

सख्यातामुदाहरति नासिक्यमध्येति। नासिक्य नासिकायां भव अकार इत्यर्थः स मध्ये यस्या सा मध्यस्थअकारा इत्यर्थ तथा परित उभयत. चतुर्षि वर्णे विभूषिता विरचिता आदौ ही वर्णौ अन्ते च ही मध्ये अकार एवरूपा इति यावत् काचित् पुरी नगरी काशीत्यर्थ अस्ति, यस्या नृपा राजान. अष्टवर्णाख्या अष्टाभिर्वर्णै निवद्ध आख्या सज्ञा येषां तादृशा. पुण्ड्रका इति ख्याता इति शेषः। पुण्ड्रक-

[illegible] नर्मणा शिरसा दीनया दृशा ।
[illegible] मां नानुकम्पसे ॥११५॥
[illegible] राजातनेति नैरात्रि ! पार्थिवः कोऽपि गीयते ।
[illegible] नेमो राजा नापि सनातनः ॥११६॥

[illegible] इति चतुर-
[illegible] मोल्लम् ॥ ११४ ॥

[illegible] दर्शयति शिरसेति । हे सुते ! स्थविरे ! स्खलन्त्या [illegible] शिरसा, दीनया कातरया दृशा चक्षुषा [illegible] तृतीयया । मोल्लम्प मभय तिष्ठ- [illegible] नानुकम्पसे न दयसे । सहजोऽर्थ, गूढार्थस्तु हे [illegible] इति पितृसम्बोधनेनैरण्यास्तया इमे [illegible] । अन्य सप्तानम् । अत्र प्रथम प्रतीयमानादर्थात् [illegible] ॥ ११५ ॥

नामान्तरेण दर्शयति राजातिति । हे अधीरात्रि ! [illegible] । कोऽपि पार्थिव पार्थिवशब्दप्रतिपाद्य: आदौ [illegible] म सनातनश्च गीयते, किन्तु अमौ नैव राजा भूपति सनातन नित्य इत्यर्थ । इति प्रथार्थ. सहज: उत्तरा- [illegible] राजातनशब्दरूप गूढ । तथाहि, राजातनशब्दस्यादि: [illegible] प्रथम स पार्थिव पृथिवीविकारज, स च नातन: [illegible] नशब्दरहितो न भवतीति नातन मिलित्वा राजा- [illegible] । राजातनशब्देन पितामहश्च उच्यते । यथा, [illegible] पितामह व्यादित्यमर । अत्र राजातनेति नास्नि [illegible] नामकथनम् । नचणे नामपदं वस्तुमात्रपर- [illegible] तेन तरुण्यालिङ्गित: कण्ठे नितम्बस्थलमा-

हृतद्रव्यं नरं लब्ध्वा धनवन्तं व्रजन्ति काः।
नानाभङ्गिसमाहृष्टलोका वेश्या न दुर्हराः ॥११७॥
जितपक्षाष्टवैशाख्यो यस्तवास्मिन्समाह्वयः।
स नानघ प्रमृतोत्कं करोति कलभाषिणि ! ११८

स्थितं। गुरुणा सन्निधानेऽपि वा व्रजति मुद्रुं- इत्यत्र सकलव्यक्तिपदत्वनि प्रतिपादे नानार्थकत्वमात्रमात्रिता इति बोध्यम्। ११६।

निहतादरान्तरमिति हृतद्रव्यमिति। नानाभङ्गिभि बहुविधविलासचेष्टितै समाहृष्टा लोका यासि तथोक्ता सत्या दुर्हरा दुःखेन ग्रियमाणा, यद्यपि प्रवरा वा हृतानि द्रव्याणि यस्य तादृशं नरं लब्ध्वा धनवन्तं व्रजन्ति ° वेश्या न वेश्या सन प्रकृतिष्वा नेत्यर्थः रहस्य। सवरणीयार्थेषु नाना विविधा भङ्गास्तरङ्गा यस्यामिति नानाभङ्गि जल तेन समाहृष्टा लोका यत्तरणोत्सुका यत्रा यासिन्ना दुर्हरा धरात् पर्वतात् दुःखेन गता कष्टेन निर्गता इत्यर्थः, हृतानि स्रोतोवेगेन भ्रस्तानि दत्तानि पार्वतीयानि यस्य तं नर नरमङ्गम् आश्रयभूत पर्वतमित्यर्थादायात लब्ध्वा धनवन्त रत्नाकरं व्रजन्ति। अत्र विशेषणसाधारण्यात् एकतरनिर्देशे अन्यतरप्रतीतिर्युक्तेति नद्य इति प्रकृतिपदयोर्यं। यस्य तु व्यविशेषणप्रतीतौ वाचकशब्दानुपादानात् निहतादरमित्यपि बोध्यम्। ११७।

समानशब्दा दर्शयति स्त्रीति। हे कलभाषिणि ! मधुरभाषिणि ! प्रकृतस्य केशस्य आख्या नाम प्रवाह, स्त्रिया

नयनीये पराहृत्य शयितौ क्षमिनौ क्षुधा ।
तत्रैव शयितौ यातां तौ पुत्रत्वचुखताम् ॥११९
विजितान्यनरेन्द्रेषु पुत्रवाद्यो जनः ।
हिमम्लानिमनैषीत्तं क्षीलाभिनन्दति ॥ १२० ॥

ा भूमिर्वेग नास्ति भूमिर्यत्र म
ाया सेट इत्यर्थे, म अथ मा
। प्रणालाहृतस्तवाधरो मा व्यर्थ-
ा पाठेऽपिशब्दस्य लक्षितलक्ष-
ते प्रकृतस्य समानशब्देनोपस्थिते

ति। क्षमिनौ क्षुधा क्षोपेन
शयितौ, यातां तत्रैव शयितौ
नुमताम्। अत क्षुधा पराहृत्य
दृष्टत्वादापाततो मोक्षः पर्य्यव-
पराहृत्य पार्श्वान्तरे शयितयो.
दृष्टमेवेति समूह्यम् ॥ ११९ ॥
जितेति। विना पक्षिणा गरु-
ये तस्य आत्मभव पुत्र अर्जुन
इत्यर्थे, तस्य गुरु पिता सूर्य्य
इत मन्यत जन. हिमम् अप-
तस्य अमित्रा शत्रव इलानि
ाग तै व्याप्त व्योम आकाशम्
पन्दै प्रहतार्थस्य हरणात् परि-

न स्पृशत्यायुधं जातु न स्त्रीणां स्तनमण्डलम्।
अमनुष्यस्य कस्यापि हस्तोऽयं न किलाफलः॥१२१
केन वः सह सम्भूय सर्वकार्य्येषु सन्निधिम्।
लब्ध्वा भोजनकाले तु यदि दृष्टो निरस्यते॥१२२
सहया सगजा सेना समटेयं न चेज्जिता।

एकच्छन्ना दर्शयति नेति। कस्यापि अमनुष्यस्य कापुरुषस्य इत्यर्थः. हस्तः जातु कदाचित् आयुधं न स्पृशति स्त्रीणां स्तनमण्डलञ्च न स्पृशति. तथापि अयं हस्तः न अफलः किल, अपि तु सफल एवेति आपाततः प्रतीयते, परन्तु आयुधस्त्रीस्तनस्पर्शाभावेन नायं वीरः न वा विलासीत्यत कथनस्य हस्तस्य फलवत्त्वमिति पर्य्यवसानात् अमनुष्यशब्देन गन्धर्वो लक्ष्यते, तस्य हस्तः गन्धर्वहस्तः एरण्डश्च इत्यर्थः। उक्तञ्च हारावल्याम्, अमण्डपत्राङ्गुलवर्द्धमानो गन्धर्वहस्तस्त्रिपुटीफलञ्च इति तस्य फलवत्ता विद्यत एवेति आश्रितस्य फलस्य स्फुटत्व न तु आश्रयस्य हस्तस्येति एकच्छन्नेयम्॥ १२१॥

उभयच्छन्नां दर्शयति केनेति। कः पदार्थः केन पदार्थेन सह सम्भूय मिलित्वा सर्वकार्य्येषु सन्निधिं सम्पर्कं लब्ध्वा भोजनकाले तु, तुशब्दोऽवधारणे। भोजनकाल एव यदि दृष्टो भवति तदा निरस्यते निराक्रियते? उत्तरमिदम्। यथा, कस्य अयं कः केशः वाशब्दार्थे षष्ठ्यर्थः। केन मस्तकेन सह सम्भूय तथा सर्वकार्य्येषु सन्निधिं समादरं लब्ध्वा भोजनकाले एव दृष्टो निरस्यते इति अत्र आश्रयाश्रयिणोर्मस्तककेशयोरिव हस्तेति उभयच्छन्ना॥ १२२॥

सङ्कीर्णां दर्शयति सहया इति। सहया सामा सगजा

मध्यविलोऽयं मूढः स्यादक्षरज्ञश्च नः मृतः ॥१२३॥
सा नामाक्षरितामिश्रा वक्षितारूपयोगिनी ।
तत्सैवेतरासामप्यूह्यः सङ्कीर्णक्रमः ॥ १२४ ॥

प्रहेलिकालक्षणम् ।

इति शब्दालङ्काराः ।

[illegible] मद्र वर्त्तमाना इयं सेना शात्रवी जिता चेत् पराभूता न यदि, तदा अयं मे विषयज्ञानवर्जित अत अक्षरज्ञश्च अक्षर [illegible], मूढ मूर्ख स्यात्। इति मद्रजोऽर्थ, यकारगकार जकारभकारटकारसहिता तथा [illegible] शक्तिहीना इत्यर्थ तेन सहिता साधिष्ठाटका [illegible] न जिता अभ्यस्ता चेत्, तदा अमात्रिक र्णानामुच्चारणकाल ना वेत्तीति मात्रिक न मात्रिक वर्णज्ञानरहित इत्यर्थ: अत: अक्षर अतश्च अस्यस्तवेद अपि मूढ मूर्ख [illegible] लेखितुं शिक्षिता इत्यर्थ: अक्षरज्ञ. वर्णज्ञ [illegible] ति सङ्कीर्णेति ॥ १२३ ॥

[illegible] ता घटयति सेति। सा पूर्वोक्ता सङ्कीर्णाख्या नामाक्षरितामिश्रा हयादिशब्दाना नानार्थ- [illegible] थ, तथा सेनाशब्दस्य चमूरूपार्थस्य प्रसिद्धस्य [illegible] या प्रहेलिकाया रूपयोगिनी तन्मिलिता [illegible] या प्रहेलिकाया सङ्कीर्णेतेति इतरासाम् [illegible] हेलिकाना सङ्कीर्णक्रम एवमेव ऊह्य. अन्येष-

अपार्थं व्यर्थमेकार्थं समंशयमपक्रमम्।
शब्दहीनं यतिभ्रष्टं भिन्नवृत्तं विसन्धिकम् ॥१२५॥
देशकालकलालोकन्यायागमविरोधि च।
इति दोषा दशैवैते वर्ज्याः काव्येषु सूरिभिः १२६
प्रतिज्ञाहेतुदृष्टान्तहानिर्दोषो न वेत्यसौ।
विचारः कर्कशः प्रायस्तेनालीढेन किं फलम् १२७

इत्थं काव्यशोभाकरान् धर्मान् गुणालङ्कारान् निरूप्य काव्यस्य हेयत्वप्रतिपादकानां धर्माणां वहूना दोषाणां सविस्तरवर्णने ग्रन्थवाहुल्यभिया प्राधान्येन नितान्तत्याज्यान् दश दोषानुद्दिशति अपार्थमित्यादि। अपार्थं निरर्थकं व्यर्थं विरुद्धार्थम् एकार्थम् अभिन्नार्थं समंशय सन्दिग्धम् अपक्रम यथाक्रमरहितं, शब्दहीनम् ऊहादिना पूर्त्य, यतिभ्रष्टं विच्छेदरहितं, भिन्नवृत्तम् असमवृत्त विसन्धिकम् अज्ञातसन्धि देशादिविरोधि च काव्य दुष्टमित्यर्थ तस्मात् सूरिभि विद्वद्भि इति उक्तरूपा एते अपार्थतादय. दश एव दोषा काव्येषु वर्ज्या. त्याज्याः शाब्दबोधप्रतिकूलतया प्रयोक्तुरज्ञताप्रकटनात्। उक्तञ्च. दुष्प्रयुक्ता पुनर्गौत्वं प्रयोक्तु सैव शमतीति। एवकारेण किञ्चिद्धैरस्यप्रतिपादकानां श्रुतिकटुप्रभृतीना व्यवच्छेद. तेषा चन्वयबोधाप्रतिकूल्येन नात्यन्त हेयत्वप्रतिपादकत्वात् इति निष्कर्ष. ॥ १२५ ॥ १२६ ॥

ननु दशैवेति अवधारणमनुचित प्रतिज्ञाहान्यादेरपि दोषत्वकीर्त्तनात्। उक्तञ्च. भगवता गोतमेन, प्रतिज्ञाहानि प्रतिज्ञानन्तरं प्रतिज्ञाविरोध इति। यथोदाहृतं, यावज्जीवमहं

समुदायार्थशून्यं यत्तदपार्थमितीष्यते ।
उन्मत्तमत्तबालानामुक्तेरन्यत्र दुष्यति ॥ १२८ ॥

अन्धो जन्मारभ्य पिता मम । माता च मम वन्ध्यासीदपुत्रश्च पितामह इति । भामहादयस्तु तथा नेच्छन्ति । यथा प्रतिज्ञातार्थविरुद्धत्वादिदोषं दुष्टत्वं नेच्छन्ति । तदेतं संशयमाशङ्क्याह प्रतिज्ञेति । प्रतिज्ञा साध्यनिर्देशः, हेतुस्तत्साधन दृष्टान्तः साधर्म्यवैधर्म्यविभागः, तेषां हानिः विरोधः अभावश्च दोषः । तत्र किमेतावतैव दुष्टत्वं भवति उत नेति संशये अयं प्रश्नविषयो भवति किमयं एकपक्षावधारणे प्रायः कर्कशः नैयायिकत्वात् प्रतिज्ञा नोक्तम इत्यर्थः, तस्मात् तेन विचारेण आलोढेन सारासारविदा ज्ञातेन इत्यर्थः किं फलं न किमपि फलमस्ति इत्यर्थः । तथाहि काव्यस्य वैरस्यजनकधर्म एव दोषपदार्थः, स च यत्र एव प्रतीयते नात्र विचारप्रयासेन फलं केवलम् अन्धत्वापत्तिरेव कतिपये दृश्यन्ते प्रतिज्ञाहान्यादीनाञ्च नाव्यत्वापत्तिरेव इष्यते अप्रतिज्ञातानाम् अपि प्रसङ्गसङ्गत्या अभिधेयवर्णितत्वात्, हेतुभावश्च प्रसिद्धवर्णने न वैरस्यमाहरति, दृष्टान्तश्च अलङ्कारस्वरूप एव तदभावेन न काव्यत्वं व्याहन्यते अनलङ्काराणाम् अपि काव्यत्वस्य सर्वैरेवाङ्गीकृतत्वात् इति ध्येयम् ॥ १२७ ॥

तत्र अपार्थं निरूपयति समुदायेति । समुदायस्य वाक्यघटकपदसमूहस्य य अर्थः शाब्दबोधेन एकतामापन्नः प्रतिपाद्यः तेन शून्यं यत् काव्यं तत् अपार्थम् इति इष्यते, तच्च उन्मत्तानां मातृलानां मत्तानां सुरापानेन विकृतानां तथा बालानां शिशूनाम् उक्तेः वचनात् अन्यत्र दुष्यति, उन्मत्तादिवचने तु न दोष इत्यर्थः ॥ १२८ ॥

समुद्र पीयते देवैरत्रास्मिन् जगतुरं।
अमी गर्जन्ति जीमूता हरिरैरावणः प्रिय ॥१२८॥
इदमस्वल्पचित्तानामभिधानमनिन्दितम्।
इतरत्र कवि: को वा प्रयुञ्जीतैवमादिकम् ॥१२९॥
एकवाक्ये प्रबन्धे वा पर्वापरपराहतम्।
विरुद्धार्थतया व्यर्थमिति दोषेषु पठ्यते ॥ १३० ॥

अत्रार्थे दर्शयति समुद्र इति। देवैः एतैः मेघैः समुद्र पीयते देवैरित्यत्र सौदर्यमिति पाठः क्वचित्। अत्र जगतुरं अमि. अमी जीमूता मेघा गर्जन्ति ऐरावत ऐरावतनामा मत्तो हरिरिन्द्रस्य प्रिय। अत्र वाक्यचतुष्टयस्य परस्परानाकाङ्क्षाभावेन न्यूनपदत्वात् एकवाक्यता नास्तीयत समुद्रादयस्य एतदीयौ नास्ति। उक्तञ्च खार्थबोधस्याकाङ्क्षान्यूनपदत्वमिष्यते। वाक्यानाम् परस्परञ्च पुन रुक्तं जायत इति इदञ्च वाक्यगतम् प्रबन्धेऽपि वाक्यसमूहेऽपि दृश्यते। यथा. उक्तिना निर्वोढादौ दोषतामाह्वेन नैवार्थता इति बोध्यम्। १२८।

इदमिति अस्वल्पचित्तानाम् उत्तमादीनाम् इदं पूर्वोक्तम् अभिधानं समुद्र पीयत इत्यादि वचनम् अनिन्दितम् अदुष्टत्वेन परिगृहीतं भवतीति शेष. इतरत्र अस्वल्पचित्तेभ्य इति शेष उत्तमादीन् विना इत्यर्थ को वा कवि एवमादिक प्रयुञ्जीत न कोऽपि कवि. प्रयुञ्जीतेत्यर्थ। १२९।

अर्थं निरूपयति एकवाक्ये इति। एकस्मिन् वाक्ये वा प्रबन्धे महावाक्ये विरुद्धार्थतया विपरीतार्थत्वेन यत्

जहि शत्रुबलं कृत्स्नं जय विश्वम्भरामिमाम् ।
तव नेशोऽपि विद्वेष्टा सर्वभूतानुकम्पिनः ॥१३२॥
परस्मिन् काचिदवस्था मा साभिषङ्गस्य चेतसः ।
यस्यां भवेदभिमता विरुद्धार्थापि भारती ॥१३३॥
परदारेष्वभिलाषो मे कथमार्य्यस्य युज्यते ।
विलोकामि तवल्लं तस्याः कदा नु दशनच्छदम् ॥१३४॥

परापरयोगात् परापरयो आद्यन्तभागयोः परावृत्त सङ्गतिः यत्र तत् क्रमेण अर्थेन इति दोषेषु मध्ये पठ्यते गण्यते । परापरयोः आद्यन्तोभागनन्तर पर्य्यालोचनया प्रतीयते, अपार्थे तु पाकादीनाम् अभावेन आद्यन्तोध एव नास्तीत्यनयोः भेदः ॥ १३१ ॥

अथैतां दर्शयति जहीति । कृत्स्नं समग्रं शत्रुबलं जहि नाशय, इमां विश्वम्भरां जय, सर्वभूतानुकम्पिनः सर्वभूतेषु दयावतस्तव एकोऽपि विद्वेष्टा शत्रु न अस्तीति शेषः । अत्र शत्रुसम्बन्धस्य समग्रशत्रुहननेन सर्वभूतानुकम्पिनश्च पृथिवीविजयः पर्य्यालोचनया विरुद्धतया प्रतीयते ॥ १३२ ॥

अवस्थाविद् व्यर्थतायां गुणत्वमपीत्याह अस्तीति साभिषङ्गस्य वियोगादिदुर्घटनाभिभूतस्य, अभिषङ्गः पराभवे इत्यमरः । चेतसः काचित् अनिर्वचनीया अवस्था अस्ति भवति, यस्यां सा विरुद्धार्थापि भारती वाणी अभिमता समादृता भवति ॥ १३३ ॥

अथैतां गुणत्वं दर्शयति परेति । आर्य्यस्य साधोः मे मम परदारेषु परस्त्रीषु अभिरतिः कथं युज्यते, तस्याः पर-

अविशेषेण पूर्वोक्तं यदि भूयोऽपि कीर्त्यते।
अर्थतः शब्दतो वापि तदेकार्थं मतं यथा ॥१३५॥
उल्कासुन्मनयन्त्येते वालां तद्वलक्वित्विषः।
अम्भोधरालडित्वन्तो गम्भीराः स्तनयित्नवः ॥१३६॥
अनुकम्पाद्यतिशयो यदि कश्चिद् विवक्ष्यते।
न दोषः पुनरुक्तोऽपि प्रत्युतैयमलङ्क्रिया ॥१३७॥

नार्याः तरल लज्जाभयजनितसम्भ्रमात् मकस्य दशनच्छद कटा नु पिबामि। अत्र पूर्वार्द्धे शान्तभाव उत्तरार्द्धे तु पुन परदारोत्सुक्यमिति विरोधोऽपि प्रयोक्तुर्वियोगाभिभूततया गुणत्वे सङ्क्रामति इति बोध्यम् ॥ १३४ ॥

एकार्थं दर्शयति अविशेषेणेति। यदि पूर्वोक्त वच. अर्थत शब्दत. वापि अविशेषेण अभिन्नतया भूयोऽपि पुन कीर्त्यते तत् एकार्थं मतम्. एवञ्च दोषोऽय अर्थगत एकार्थकशब्दगतश्चेति, तयाच अर्थस्य एकार्थत्वमिति बोध्यम्। यथेति उदाहरणप्रदर्शनार्थम् ॥ १३५ ॥

अर्थगतमेकार्थं दर्शयति उल्कामिति। तस्या बालाया चलकानामिव त्विषो येषां तादृशा स्तनयित्नव गर्जनशीला तडित्वन्तः सौदामिनीसहिताः गम्भीराः एते अम्भोधरा मेघा उल्कां विरहेणोत्कण्ठितां बालाम् उन्मनयन्ति उन्मनस कुर्वन्ति उद्दीपकत्वादिति भाव.। अत्र उल्कोन्मन शब्दौ अम्भोधरादिशब्दाश्च स्वरूपाभेदेऽपि एकार्थशक्तत्वात् पुनरुक्तार्था। एवं शब्दगतम् अपि यथायथमूहनीयम् ॥ १३६ ॥

अस्य प्रतिप्रसवमाह अनुकम्पेति। यदि कश्चित् अनु-

ईदृशं संशयायैव यदि वातु प्रयुज्यते ।
स्यादलङ्कार एवासौ न दोषस्तत्र तद् यथा॥१४१॥
पश्याम्यनङ्गजातङ्कलङ्घितां तामनिन्दिताम् ।
कालेनैव कठोरेण यस्तां किं नस्त्वदाशया॥१४२॥

रसलोलेक्षणे ! मनोरथप्रियः वाञ्छितप्रेमिकः तस्य आलोक दर्शनं तस्मिन् यः रसः आवेशः तेन लोले चञ्चले ईक्षणे यस्याः तत्सम्बुद्धौ, जारदर्शनव्याप्तनयने । सखि । असौ तव माता आराद् वृत्ति. दूरवर्त्तिनीत्यर्थः अतः ईदृशं तव व्यवहार द्रष्टु न क्षमा, अथवा आराद्वृत्तिः समीपवर्त्तिनी अतस्तव ईदृशं दुर्व्यवहारमित्यर्थः द्रष्टुं न क्षमा, आराद् दूरसमीपयोरित्य-मरः । अत्र प्रथमार्थे त्वं यथेच्छं विहरेति द्वितीयार्थे इदा-नीम् ईदृशं कर्म मा कुरु इत्येतयोरर्थयो. संशयः । जार प्रत्यनु-रागिणीं नायिकां प्रति तन्मातुस्तदाचरणपरिज्ञानशङ्कया सख्या उक्तिः ॥ १४० ॥

अस्य कदाचित् गुणमाह ईदृशमिति । यदि वातु यद्यपि ईदृशं ससंशयं वाक्यं संशयाय संशयप्रतिपादनाय एव प्रयुज्यते व्यवक्रियते, तदा असौ संशयः अलङ्कार एव स्यात्, तत्र न दोषः, तथाच यत्र संशय एव विवक्षित. तत्र असौ गुण एव अविवक्षितस्तु दोष एवेति भावः । तत् तस्य उदाहरण यथेति वक्ष्यमाणसूचनार्थम् । वातु इत्यत्र जातु इत्यपि पाठो दृश्यते ॥ १४१ ॥

पश्यामीति । अनिन्दितां तां तव कान्तामित्यर्थः अनङ्ग-जेन आतङ्केन कामपीडया इत्यर्थः लङ्घिताम् आक्रान्ताम् अत एव कठोरेण निर्दयेन कालेन मृत्युना ग्रस्तां पश्यामि, त्वदा-

कामार्त्ता धर्मतप्ता वेत्यनिश्चयकरं वचः ।
दूतानमाकुलीकर्त्तुमिति दूत्याह नर्मणा ॥१४३॥
उद्देशानुगुणोऽर्थानामनुद्देशो न चेत् कृतः ।
यथाक्रमाभिधानं तं दोषमाचक्षते बुधाः ॥१४४॥
स्थितिनिर्माणसंहारहेतवो जगताममी ।

[illegible] न फलाशया न अस्माकं किं फलम् ? इति अयमर्थः, यस्या मद्गतेन आतपेन आरोपितपीडया न लक्षितेति [illegible] तप्तलक्षिता तां कठोरेण कालेन ग्रीष्मेणेत्यर्थः ग्रस्तां [illegible], तदाशया न किम् ? अपितु त्वदाशया एवेत्यर्थः । [illegible] आरोपितो पीडा नास्ति, केवलं तदप्राप्तिजनित-[illegible]लादिभिरालक्षितोष्णाम्य उद्रेकात् पीडातें इत्ययमर्थः । यद्यपि [illegible] धर्मो दूत्याभिहितत्वात् गुण एव । प्रोषित नायक प्रति दूत्या उक्तिरियम् ॥ १४२ ॥

अथ च अस्य गुणत्वमुपपादयति कामार्त्तेति । दूती दूतानम् आकुलीकर्त्तुं नायिकाममीपगमनाय उत्सुकं कर्त्तुं कामार्त्ता अहो कामार्त्ता धर्मतप्ता वा इति अनिश्चयकर सन्देह-मुत्पादकं इति वच आह ॥ १४३ ॥

यथाक्रम निरूपयति उद्देशेति । अर्थानाम् उद्देशानुगुणः उद्देश प्रतिज्ञा तस्य अनुगुण अनुकूलः अनु पश्चात् उद्देशः [illegible] चेत् यदि न कृत, तदा तम् अपक्रम अभिधानं दोष, तत्र क्रमलङ्घनात् अपक्रमाख्य दोष बुधाः आचक्षते [illegible] । तस्माच्च, यथाक्रममुपन्यास एव गुण, तल्लङ्घनन्तु [illegible] ॥ १४४ ॥

[illegible] दर्शयति स्थितीति । जगतां स्थितिः पालनं

शम्भुनारायणाम्भोजयोनय: पालयन्तु व: ॥१४५॥

यत्र: सम्बन्धविज्ञानहेतुकोऽपि कृतो यदि ।

क्रमलङ्घनमप्याहु. सूरयो नैव दूषणम् ॥ १४६ ॥

वस्तुत्यागस्तनुत्यागो देशत्याग इति त्रिषु ।

आद्यन्तावायतश्लेषौ मध्यम: क्षणिकज्वर: ॥ १४७ ॥

शब्दहीनमनालक्ष्यलक्ष्यलक्षणमेवेति. ।

निर्माननष्टि संहार ध्वन तेषा क्रमेव कर्त्तार. अमी शम्भु-नारायणाम्भोजयोनय शिवविष्णुब्रह्माण व: युष्मान् पालयन्तु। अत्र प्रथमोद्दिष्टाना स्थितिर्निर्माणसंहाराणा यथाक्रममन्वये कर्त्तव्ये नारायणाम्भोजयोनिसम्भव इति वक्तुमुचित. परन्तु तद्विपरीतमुक्तमिति अपक्रमता ॥ १४५ ॥

अस्यादोषत्वमपि क्वचिदित्याह यत्र इति । यदि सम्बन्धस्य अन्वयस्य विज्ञान विशिष्टेष्वबोध एव हेतुर्यस्य तादृश यत्र विशिष्टसम्बन्धबोधायैव तादृशक्रमलङ्घनप्रयास इत्यर्थ कृत कविनेति शेष. तदा सूरय विद्वास क्रमलङ्घनमपि दूषण दोषावह नैव आहु ॥ १४६ ।

अदोषत्व दर्शयति वस्तुत्याग इति । वस्तुत्याग तनुत्याग देशत्याग इति त्रिषु विषयेषु मध्ये आद्यन्तौ वस्तुत्यागदेशत्यागौ आयता दीर्घा श्लेषा ययो तौ. मध्यमस्तनुत्यागस्तु क्षणिकज्वर क्षणमात्रश्लेषकर इत्यर्थ । अत्र यद्यपि क्रममुद्दिश्योक्तेऽपि वस्तुत्यागादिषु आयतश्लेषादित्वेन आद्यन्तयोरेव अन्वययोगात् मध्यमलङ्घनं न दोषाय इत्यवधेयम् । १४७ ।

शब्दहीन निरूपयति शब्दहीनमिति । अनालक्ष्या अदृश्या लक्ष्यस्य प्रहारस्य तथा लक्षणस्य नियामकस्य सम्बन्ध

पदप्रयोगोऽभिष्टः शिष्टेष्टस्तु न दुष्यति ॥ १४८ ॥

भवति भवते भारुर्मेखलामर्णवगह्वरीम् ।
अजिज्ञासा, नास्तीत्यासां गिरां रसः १४९

दक्षिणाद्रिपथेनेत्थं मारुतश्चूतपादपान् ।
कुर्वन् ललितताम्रपल्लवाङ्कुरशोभिनः ॥ १५० ॥

पदप्रयोगस्य शब्दहीनस्य अगणितानुशासन इत्यर्थः, पदानां प्रयोगः पदप्रयोगः तस्य अभिष्टानाम् अज्ञानाम् इष्टः अनवगतानुशासित इत्यर्थः, अतएव शब्दहीनेन शब्देन अनुशासनरहितेन तेन तदाप्यदोषानित्यर्थः. पदप्रयोगस्य कृताभिधानस्य दुष्यतीति प्रयुक्त पदमिति वक्तव्यं तेन च पदप्रयोगस्येत्यस्य अन्वय कर्तव्य इत्यवधेयम्। शिष्टेष्टस्तु शिष्टैः साधुभिरिष्टः. अवहृतस्तु न दुष्यति न दोषमावहति ॥ १४८ ॥

भवतीत्यादिना भवते इति। हे महाराजन्। भवते भवन्तं वहु अर्णव गह्वरी मेखला यस्या. ता ससागरामित्यर्थः, गह्वरी कुक्षिर्भेदे नदीमेखलयोरपीति मेदिनी। महीम् अजिज्ञासा मृगयाभावात् जिज्ञासा न विद्यते सत्यमेवैतदित्यर्थः, आसा गिरा वाचा रसः माधुर्य्यानुगुण आस्वाद नास्ति। अत्र अवते इत्यात्मनेपद, भवते इति षष्ठ्यर्थे चतुर्थी, महाराजेत्यत्र महाराजन्निति कर्मत्वस्य अनुशासनविरुद्ध अभिष्टैरुपन्यस्त ॥ १४९ ॥

अथैनमेव शब्दहीन दर्शयति दक्षिणाद्रेरित्यादि। दक्षिणाद्रे मलयपर्वतस्य उपसरन् मलयाचल गच्छन् मारुतः चूतपादपान् तत्रत्यान् आम्रतरून् ललितं सुन्दर यथा तथा

यादृशाम्रमाहात्म्यदर्शनालसचेतसाम् ।
पलाशपत्रवद् भाति न च सौभाग्यसुज्झति ॥१५१॥
लोकेषु नियतस्थानं पदच्छेदं यतिं विदु: ।
दूषितं यतिभ्रष्टं श्रवणोद्वेजनं यथा ॥ १५२ ॥

धृता ये प्रवाला नवपल्लवा अङ्कुराश्च ते शोभिन दृश्ने स्थिय । इत्यादि वाक्ये शास्त्रस्य अनुशासनस्य यत् शास्त्र तस्य दर्शने आलस चेतो येषां तथाभूतानां विदुषाम् अर्थ पलाशपत्रवत् अपलक्षवत् भाति न तु अपलक्षरूपेण अर्थ । अयं भाव. वर्त्मनि द्वितीयेति अनुशासनबलेन ईषादेरिव्यत्र द्वितीया भवितुमर्हत्येव पर ता विहाय वर्त्मविवक्षया षष्ठीविधानेऽपि न दोष.। उक्तञ्च अविवक्षितं वर्त्मादौ सम्बन्धविवक्षया षष्ठीति । द्वितीयाया अभावे। श्रोतृणा न वैरस्योदय इत्याह न चेति। सौभाग्यञ्च लित्यत्र न च उज्झति न त्यजति. तथाच दृष्टशास्त्रेऽविरामे दोष एवेति भाव.। मलयपर्वतीयकस्मिंतत्तत्व-तरोर्वायोर्वर्णनमिदम्। दक्षिणाद्रेरपसर्पन्नित्यत्र दक्षि-णे. मलयाचलात् उपसर्पन् आगच्छन्नित्यर्थबलेन क्वचित् नुयोग इति बोध्यम्।' १५०। १५१।

यति तद्भ्रष्टञ्च निरूपयति लोकेष्विति। लोकेषु पदेषु न पदेषु नियत इन्द शास्त्रञ्च निरूपितं स्थान यस्य तादृशं स्त्र छेद विरति यति विदु जानन्ति बुधा इति शेष. यदाह्ने दृष्टविश्रामस्थानं यतिरिति निष्कर्ष । उक्तञ्च. यतिर्निर्दिष्ट-शास्त्रस्थान कविभिरुच्यते । तदेतत तस्या. विद्युत यतिभ्रष्ट एयो: श्रोत्रयो उद्वेजनम् अस्वस्थजनकम् इत्यर्थ । १५२ ।

मस्तकारम्भ जिमलगान्यार्द्रागीत्यधिकाक्षरम्॥१५७

कामेन जागा निर्गिता विमुक्ता
मृगेक्षणास्तिलयत्रयागुरुत्वम् ।
स्मरस्य जागा निर्गिताः पतन्ति
वामेक्षणास्तिलयत्रयालघुत्वम् ॥ १५८ ॥

न संहिता विरतामीत्यसन्धानं पदेषु यत् ।

[illegible] वक्तव्ये मसाजरागीति एको वर्णः न्यून [illegible] मस्तकारम्भ जिमलगानि आर्द्राणि, इति [illegible] वक्तव्ये नवाक्षरागीति एको [illegible] ॥ १५७ ॥

[illegible] इत्यादिमुदाहरति कामेनेति। कामेन मृगेक्षणास्तिलयत्रयागुरुत्वम्। तथाच, [illegible] उपेन्द्रवज्रावृत्तम् उपेन्द्रवज्रा जतजास्ततो गाविति [illegible] ततश्च जगणे प्रथम निवेश्ये का इति गुरुवर्णो निवेशित जगणश्च जो गुरुमध्यगत इत्युक्तत्वात् आद्यन्तौ लघू [illegible] गुरुरित्येवं वर्णत्रयात्मक इति बोध्यम्। तथा, स्मरस्य निर्गिता बाणा वामेक्षणाम् पतन्ति, इत्यत्र अयत्रयालघुत्वम्। [illegible], उपेन्द्रवज्रावृत्तं स्यादिन्द्रवज्रा ततजास्ततोगा- [illegible] लक्षणात् ततश्च तगणे प्रथम निवेश्ये स्मेति लघुवर्णो निवेशित, तगणश्च अन्त्यलघुस्त इत्युक्तत्वात् प्रथमद्वितीयौ गुरू अन्त्यो लघुरित्येव वर्णत्रयात्मक इति बोध्यम्। अत्र [illegible] इन्द्रवज्रा प्रथादुपेन्द्रवज्रा इत्येवमुपजातिच्छन्दसि [illegible] दृश्यमानमर इति ध्येयम् ॥ १५८ ॥

[illegible] निर्दिशति नेति। संहिता वर्णयोर्मिलनरूपां

तद्विसन्धीति निर्दिष्टं न प्रश्लाद्यहेतुकम् ॥१५८॥

सन्दानिलेन चलता अङ्गनागण्डमण्डले।

लुप्तमुद्वेदि घर्माम्भो नभस्यम्लानपुष्पपि ॥ १६० ॥

मानेर्ष्ये इह शीर्यंते स्त्रीणां हिमऋतौ प्रिये।

श्यासु रात्रिष्विति प्राज्ञैराख्यातं व्यस्तसौहृदम्॥१६१

सन्धि न विच्छिनत्ति वक्तुमिच्छामि इति अभिप्रेत्य न प्रश्लाद्यहेतुक प्रश्लाद्यहेतु विनेत्यर्थ पदेषु यत् प्रसन्धान प्रसन्धोजन सन्ध्यभाव इत्यर्थ. तत् विसन्धि विसन्ध्याख्यदोष इत्यर्थः प्रश्लाद्य नाम सन्धिसूत्रेण यत्र सन्धिर्निषिद्धः। तद् यथा, अमी ईक्षा इत्यादि ॥ १५८ ॥

विसन्धिदोषमुदाहरति सन्दानिलेनेति। नभसि आकाशे चलता सन्दानिलेन अङ्गनाया गण्डमण्डले कपोलदेशे अम्लानपुष्पे अम्लान शरीरेऽपि उद्वेदि घर्माम्भः स्वेदजल लुप्तम् अपनीतम्। अत्र चलता इत्याकारस्य अङ्गनेत्यकारेण सह दीर्घत्वविधायकसूत्रे सत्यपि सन्धिर्न कृत इति ॥ १६० ।

प्रश्लाद्यहेतुक दर्शयति मानेर्ष्ये इति। इह हिमऋतौ हेमन्ते श्यासु रात्रिषु हेमन्तनिशासु इत्यर्थ प्रियेऽतिनि स्त्रीणा मानेर्ष्ये मान प्रणयकोपः ईर्ष्या नायिकान्तरासङ्गजनित. कोपविशेषश्च शीर्यंते शीर्णं भवत नश्यत इत्यर्थ। इत्यत्र ईदृग व्यस्त सन्ध्यभाव प्राज्ञै सहृद्भि पण्डितैः आख्यातं कथितम्। तद्यथा, मानेर्ष्ये इत्यत्र ङेङसोर्यं इति सूत्रेण हिवचननिष्पन्नस्य एकारस्य सन्धिर्निषिद्ध. तथा हिमऋतौ इत्यत्र ऋत्यकीति सूत्रेण ऋकारे परे अकारस्य विकल्पेन सन्धिर्निषिद्ध इति बोध्यम्। १६१ ॥

...[illegible]...नराणादिः कालोरात्रिन्दिवर्त्तवः ।
...[illegible]...गोत्तमभृतयः कला कामार्थसंश्रयाः ॥ १६२ ॥
...[illegible]...गराणां भूतानां प्रवृत्तिर्लोकसंज्ञिता ।
...[illegible]...तिर्न्यायात्मको न्यायः सम्मृतिः श्रुतिरागमः ॥१६३
...[illegible]...तेषु तेष्वगणा रूढं यदि किञ्चित् प्रवर्त्तते ।
...[illegible]...मादादेशादिविरोधीत्येतदुच्यते ॥ १६४ ॥
...[illegible]...र्षणात्पार्णमुरभिर्मलयानिलः ।

अथ दशादीन् निरूप्य तद्विरोधं निर्दिशति देश इति । यदि यत्र देशे वर्षं राज्यम् इत्येवमादिर्देशः, रात्रिर्दिवा इत्यत्र काल उक्तत्वात् मासवत्सरादीनां ग्रहणम् । कामार्थसंश्रया कामश्च अर्थश्च तौ संश्रयौ येषां तथोक्ताः कामार्थसाधका अर्थसाधकाश्च नृत्यगीतप्रभृतयः प्रभृतिशब्देन वादित्रादि परिग्रहः चतुःषष्टिप्रकारा तत्रोक्ताः कलाः ॥ १६२ ॥

चराचराणां जङ्गमस्थावराणां भूतानां प्रवृत्तिः वार्त्ता लोकसंज्ञिता लोक इति संज्ञा जाता अस्या इति अस्य जातार्थे इतच्प्रत्ययः । लोकशब्दप्रतिपाद्या, न्यायः हेतुविद्यात्मकः [illegible] कारणेन तर्कितो या विद्या युक्तिमूलकशास्त्रमित्यर्थः [illegible]दात्मक तन्त्राय इत्यर्थः तथा सम्मृतिः स्मृतिः वेदार्थस्मरणात्मकं ऋषिप्रोक्तं तन्त्रसंज्ञिता मन्वादिसंहितासंहिता इत्यर्थः [illegible]दः आगमः आगमशब्दवाच्य इत्यर्थः ॥ १६३ ॥

[illegible]तेषु तेषु लोकेषु देशादिषु अयथारूढम् अप्रसिद्धं किञ्चित् [illegible]दि [illegible]ये प्रमादात् अनवधानात् प्रवर्त्तते उपन्यस्यते तदा [illegible]देशादिविरोधेऽपि तदाख्यदोषवदित्यर्थः इति उच्यते ॥१६४

कलिङ्गवनसम्भृता मृगप्राया मतङ्गजाः ॥ १६५ ॥
चोलाः कालागुरुश्यामकावेरीतीरभूमयः।
इति देशविरोधिन्या वाच प्रस्थानमीदृशम्॥१६६॥
पद्मिनी नक्तमुन्निद्रा स्फुटत्यह्नि कुमुद्वती।
मधुरुत्फुल्लनिचुलो निदाघो मेघदुर्दिनः॥ १६७॥

देशविरोधमुदाहरति कर्पूरेति। मलयानिल कर्पूरपादपानाम् आमर्शेन सम्पर्केण सुरभि सुगन्धि, तथा कलिङ्गवनसम्भृता मतङ्गजा हस्तिनः मृगप्राया मृगवत् अतिक्षुद्रा इत्यर्थः अत्र मलयाद्रौ कर्पूरपादपाना नोत्पत्ति, चीनाटिदेशे एव तदुत्पत्तिरिति तथा कलिङ्गवने मतङ्गजाना सम्भवो न प्रसिद्ध इत्युभयत्र मलयपर्वतः तथा कलिङ्गवनरूपो देशविरोध ॥ १६५ ॥

चोला इति। चोलाः कर्णाटान्तर्गतदेशभेदाः कालागुरुभिः श्यामाः कावेरीनद्या, तीरभूमय येषु तथोक्ताः। अत्र कावेरीतीरे कालागुरवो न जायन्ते इति राष्ट्ररूपो देशविरोध। देशविरोधिन्याः वाचः इति ईदृशम् उक्तरूप प्रस्थान नियम इत्यर्थः॥ १६६ ॥

कालविरोध दर्शयति। पद्मिनी नक्त रात्रौ उन्निद्रा विकसिता इति दिवस एव पद्मिन्या विकासस्य प्रसिद्धे रात्राविति कालविरोधः। कुमुद्वती अह्नि स्फुटति इति रात्रावेव कुमुदिन्या विकासस्य प्रसिद्धे अह्नि इति कालविरोध। मधु वसन्तः उत्फुल्लाः निचुला यत्र तथोक्त अत्र निचुलाना प्रावृष्येव विकासस्य प्रसिद्धेः मधुरिति कालविरोधः निदाघः ग्रीष्मः मेघेन दुर्दिनं यत्र तथोक्त अत्र वर्षास्वेव दुर्दिनत्व-

[illegible]मगिरो वर्षाः शरटो मत्तबर्हिणः ।
हेमन्तो निर्मलादित्यः शिशिरः शीतकाव्यचन्दनः ॥१६८
इति कालविरोधस्य दर्शिता गतिरीदृशी ।
मार्गः कालाविरोधस्य मनागुद्दिश्यते यथा ॥ १६९ ॥
वीरशृङ्गारयोर्भावौ स्थायिनौ क्रोधविस्मयौ ।
वर्णप्रसरः सोऽयं भिन्नमार्गः प्रवर्त्तते ॥ १७० ॥

[illegible] निदाघ इति कालविरोधः । निदाघेऽपि कदाचित् दुर्दिनत्वं सम्भवति वर्णितञ्च अकालदुर्दिनं मृच्छकटिकादौ इति गर्गोक्तं नित्यम् ॥ १६७ ॥

वर्षा अम्बा इमाना गिरः यासु ताः, अत्र शरत्स्वेव [illegible]माना मयूरनादस्य प्रमितेः वर्षा इति कालविरोधः । शरटः मत्ता बर्हिणः यासु ताः अत्र वर्षास्वेव मयूराणां मत्तताया प्रमितेः शरद इति कालविरोधः । हेमन्तः निर्मलः आदित्यो यत्र तत्राभवत्, अत्र हेमन्ते आदित्यस्य हिमावृतत्वात् निर्मलत्वं अप्रमितम् इति कालविरोधः, तथा शिशिरः शीतर्तुः स च अत्र आदरणीय चन्दनः यस्मिन् सः अत्र चन्दनस्य शैत्यात् शिशिरे तस्य आद्यत्वम् अप्रमितम् इति च कालविरोधः ॥ १६८ ॥

कालविरोधमुपसंहृत्य कालाविरोधं दर्शयितुमाह इतीति । इति इदृशी उक्तप्रकारा कालविरोधस्य गतिः नियमः दर्शिता, इदानीं कालविरोधस्य मार्गः नियमः मनाक् अल्पं यथा तथा [illegible]प्रदर्शते यथेति उदाहरणार्थम् ॥ १६९ ॥

[illegible] वीरशृङ्गारयोः रसयोः क्रोधविस्मयौ स्थायिनौ [illegible]विस्मयौ इति शेषः तथाहि वीरे उत्साहः, शृङ्गारे रतिः

इत्थं कलाचतुःषष्टिविरोधः साधु नीयताम्।
तस्याः कलापरिच्छेदे रूपमाविर्भविष्यति॥ १७१॥

स्थायिभावत्वेन कथ्यते. क्रोध रौद्रस्य विस्मय अद्भुतस्य स्थायित्वेन निर्दिष्टौ तदेव स्थिते तद्विरोधो दोष एवेति भावः। स्थायिभावश्च दर्पणकारेणोक्त. यथा. अविरुद्धा विरुद्धा वा यं तिरोधातुमक्षमाः। आस्वादाङ्कुरकन्दोऽसौ भाव स्थायीति कीर्त्यते इति रसावस्थ पर भाव स्थायितां प्रतिपद्यते इति च। क्रोधविस्मयौ च तेनैवोक्तौ यथा प्रतिकूलेषु तैक्ष्ण्यस्य प्रबोध. क्रोध इष्यते। तथा विविधेषु पदार्थेषु लोकसीमातिवर्त्तिषु। विस्फारश्चेतसो यस्तु स विस्मय उदाहृत इति. रसविवेकस्य भरतादिभि नाट्यशास्त्र एव कृतत्वात् नाट्यरूपकलाविरोधोऽयम् इति बोध्यम्। गीतरूपकलाविरोधमाह पूर्णेति पूर्णा सम्यक् प्रयुक्ता सप्तस्वरा निषादादय यत्र तयोक्त सङ्गीतविधिरिति शेष निषादर्षभगान्धार षड्जमध्यमधैवता। पञ्चमश्चेत्यमी सप्त तन्त्रीकण्ठोत्थिता स्वरा। भिन्नमार्ग भिन्न. तत्तत्कालनिषिद्धस्वरासम्बलित मार्ग प्रयोगनियम यस्य तादृश सन् प्रवर्त्तते प्रचलति अतस्तद्विपरीत्य दोष एवेति फलितार्थ उक्तञ्च भरतेन प्रभाते सुरतो निद्य ऋषभ पञ्चमोऽपि च। पञ्चमस्य विशेषोऽय कथित पूर्वसूरिभि। प्रगे प्रगीतो ज्ञानेद्दर्शनस्य विपर्ययम् इति। १७०।

इत्थमिति। इत्थम् अनेन प्रकारेण कलानां चतुःषष्टि तस्या विरोध साधु यथा तथा नीयता यथा नाट्यगीतरूपयो कलयोर्विरोध प्रदर्शित तथा तदुदाहरणेषु अन्यासामपि कलाना विरोध ज्ञायतामित्यर्थ कलापरिच्छेदे तदाख्यग्रन्थे तस्याः कलायाः रूपम् आविर्भविष्यति प्रकटिष्यति. अनन्तरं

आधूतकेसरो हस्ती तीक्ष्णशृङ्गस्तुरङ्गमः ।
गुरुसारोऽयमेरण्डो निःसारः खदिरद्रुमः ॥ १७२ ॥
इति लौकिक एवायं विरोधः सर्वगर्हितः ।
विरोधो हेतुविद्यासु न्यायाख्यासु निदर्श्यते ॥ १७३
मत्समेजात मुगतः संस्कारानविनश्वरान् ।
तथाहि मा चकोराक्षी स्थितैवाद्यापि मे हृदि १७४

कलापरिच्छेदं नाम ग्रन्थं करिष्यामि तत्रैव तासां विशेषो द्रष्टव्य इति भावः ॥ १७१ ॥

लोकविरुद्धता दर्शयति आधूतेति । अयं हस्ती आधूताः केसरा जटा यस्य तथोक्तः, तुरङ्गमः अश्वः तीक्ष्णे शृङ्गे यस्य तादृशः, एरण्डः तदाख्यद्रुतः गुरुः सारो यस्य तथाभूतः, खदिरद्रुमः नास्ति सारो यस्य तादृक् हस्तिनः सकेसरत्वं तुरङ्गमस्य तीक्ष्णशृङ्गत्वम् एरण्डस्य सारवत्त्वं तथा खदिरतरोः निःसारत्वं लोकविरुद्धम् । अत्र पूर्वार्द्धे चरणयोरुत्तरार्द्धे अक्षरयोर्विरुद्धमवगन्तव्यम् ॥ १७२ ॥

इतीति । इति उक्तरूपः लौकिकः लोकप्रसिद्ध एव अयं विरोधः सर्वैः विद्वद्भिः गर्हितः निन्दितः, तथा च देशादिविरोधापेक्षया लोकविरुद्धोपन्यासः प्रयोक्तुर्निंतरां हास्यायेति भावः । सम्प्रति न्यायाख्यासु न्यायनाम्नीषु हेतुविद्यासु विरोधः निदर्श्यते उदाह्रियते ॥ १७३ ॥

कलापरिच्छेदरूपन्यायविरोधं दर्शयति । मत्समेति सुगतः मत्समान् ज्ञानविशेषान् अविनश्वरान् चिरस्थायिनः सकलेन आह, तथाहि तमेवार्थं जानीहि मा पूर्वानुभूता

कापिलैरसदुद्भूतिः स्थान एवोपवर्ण्यते।
असतामेव दृश्यन्ते यस्मादस्माभिरुज्झवाः॥ १७५॥
गतिर्न्यायविरोधस्य नैषा सर्वत्र दृश्यते।
अथागमविरोधस्य प्रस्थानमुपदिश्यते॥ १७६॥
अनाहिताग्नयोऽप्यत्र जातपुत्रा वितन्वते।
विप्रा वैश्वानरौमिष्टिमल्लिष्टाचारभूषणाः॥ १७७॥

त्वदोराक्षी अद्यापि मे हृदि स्थितैव. स्मरणविषयी भवतीत्यर्थः. स्मृति प्रति संस्कारस्य हेतुत्वात् तस्य चाविनश्वरत्वात् हेति भाव.। पदार्थमात्रस्य क्षणभङ्गुरत्वमिति वादिनान्तु तेषां सौगतानां मतविरहमेतदिति हेतुविद्याविरोध ।१७४।

साङ्ख्यदर्शनरूपन्यायविरोध दर्शयति कापिलैरिति। कापिलैः कपिलमतानुसारिभि. साङ्ख्यविद्भिः असदुद्भूति असतामनित्यानां दुष्टानाञ्च. उद्भूतिः उद्भव स्थान एव युक्तमेव उपवर्ण्यते, यस्मात् अस्माभि असतामेव दुष्टानामेव उज्झवा दृश्यन्ते प्रायेण दुर्जना एव जायन्ते न तु साधव इति भाव। अयं भाव: कापिलानुसारिण. सत. सदेव जायते नत्वसदिति मन्यन्ते तथाचोक्तम् असदकरणादुपादानग्रहणात् सर्वसम्भवाभावात्। शक्तस्य शक्यकरणात् कारणभावाच्च सत्कार्यमिति तस्मादत्र असदुद्भूतिदर्शन साङ्ख्यविरुद्धमिति निष्कर्ष ।१७५॥

न्यायविरोधमुपलक्षयति गतीति। सा एषा एवंप्रकारा न्यायविरोधस्य गति सर्वत्र वैशेषिकादिष्वपि दृश्यते अत इदानीम् आगमविरोधस्य प्रस्थानं गति उपदिश्यते। १७६॥

श्रुतिविरोध दर्शयति। अनेति। एते अहिताग्नयः अग्निहोत्राचारभूषणा.

[illegible]ऽपि वेदानधिजगे गुरोः ।
स्वभावशुचिः स्फटिको न संस्कारमपेक्षते ॥ १७८ ॥
विरोधः सकलोऽप्येष कदाचित् कविकौशलात् ।
उत्क्रम्य दोषगणनां गुणवीथीं विगाहते ॥ १७९ ॥
तस्य राज्ञः प्रभावेण तदुद्यानानि जज्ञिरे ।
पादाङ्गुष्ठप्रवालानामाम्यद् सुरशाखिनाम् ॥१८०॥

अनुपनीतोऽनाहिताग्निरमन्त्रितो जातपुत्रो विप्रः अनाहिताग्नयः सकलाध्यायिनो अपि वेश्वानरीम् इष्टिं यागं वितन्वते इति । अत्र च श्रुतौ श्रुताग्न्याधानादेरेव वेश्वानरेष्ट्यधिकारप्रतिपादनात् अनाहिताग्नेना तद्गणेन श्रुतिविरुद्धम्॥१७७॥

अनधिगमं दर्शयति अमाविति । अमी जनः अनुपनीतः अनध्ययनसंस्कार अपि गुरोः सकाशात् वेदान् अधिजगे अधीतवान् । तथाहि स्वभावेन प्रकृत्या एव शुद्धः निर्मलः स्फटिक संस्कार शुद्धि न अपेक्षते । अत्र अनुपनीतस्य वेदाध्ययन स्मृतिविरुद्धम् उक्तञ्च मनुना नाभिव्याहारयेद् ब्रह्म स्वधानियमनादृते शूद्रेण हि समस्तावद् यावद् वेदे न जायते इति । १७८ ॥

उक्तदोषस्य कदाचिद् गुणत्वमप्याह विरोध इति । एषः उक्तस्य सकलः समग्रः अपि विरोधः कवेः कौशलात् वर्णनानैपुण्येन कदाचित् दोषगणनाम् उत्क्रम्य विहाय गुणवीथीं गुणश्रेणीं विगाहते गुणत्वेन गणनीयो भवतीत्यर्थः ।

अत्र दोषस्यापि विरोधस्य गुणत्वं दर्शयति तस्येति । तस्य राज्ञः

राज्ञां विनाशपिशुनश्चचार खरमारुतः ।
धुन्वन् कदम्बरजसा सह सम्पक्वदोहदान् ॥ १८१ ॥
दोलाभिप्रेरणवस्तवधूजनसुखोद्गतम् ।
कामिनां लयवैपथ्य गेय रागमवर्धयत् ॥ १८२ ॥

प्रभावेण सहिता तदुद्यानानि तस्य राज्ञ उद्यानानि यान्यानि नवानि इत्यर्थः कुसुमानि वस्त्राणि प्रवालानि वेषा तेषा तस्य ज्ञातिना देवतरूणाम् आख्यद ज्ञान जनिर्। अथ मान्यो ज्ञानेषु सुरज्ञातिमन्यवो देवविरहतया वर्तमानोऽपि धर्मोदयक राज्ञ प्रभावातिशय द्योतयतीति चमत्कारजनक मुद्... साधयते इति श्लिष्टार्थः । १८० ।

जालविरोधेन कदाचित्कुसुमसदावनि राजधानी. राज्ञा प्रतिपक्षभूपानां विनाशपिशुन विनाशसूचक पिशु सुन्मृदङ्गाविरुत्तम् । खरमारुत प्रचण्डपवनः इमान् धुन्वन् कम्पयन् कदम्बरजसा सह सह कदम्ब पुष्प रज सम्पक्वदोहदान् सम्यक् पक्वानि दोहदानि यासा ता सम्पक्वदोहदा तान् । न जायते इति अजा तेन प्रदुर्भावेन सह वर्तमानो उद्भवे उत्पत्तौ द्वितीयोऽवतारो यस्य स तथोक्तः । १८१ । मुदन्त विदितो दुष्टनिग्रहकारित्वात् ... दितीयोऽवतारो यस्य स तथोक्तः १८१ ।

... दितीयोऽवतारो यस्य ... ।